द्वैन न

कथंपुनः कर्माणि अधिकृतेन मुमुक्षुणा कर्म कर्त्तव्यमित्याह ॥ मयिसर्वाणीति ॥ हे अर्जुन अध्यात्मचेतसा ईश्वराय भृत्यवत्कर्मकरोमीति बुद्ध्या मयि
परमेश्वरे सर्वाणि समस्तानि कर्माणि संन्यस्य निक्षिप्य निराशीः त्यक्तफलेच्छः निर्ममः ममत्वरहितो भूत्वा विगतज्वरः विगतशोकः सन् युध्य
स्व ॥ ३० ॥ एवं कर्मानुष्ठाने गुणमाह ॥ येमेमतमिति ॥ ये मानवाः मे मम इदं मतं ईश्वरार्थं कर्म कर्त्तव्यमित्यनुशासनं नित्यं श्रद्धावन्तः अनसू
यन्तः असहिष्णुतारहिताः अनुतिष्ठन्ति ॥ अनुवर्त्तन्ते ॥ तेऽपि कर्मभिः धर्माधर्माख्यैः मुच्यन्ते ॥ ३१ ॥ तद्विपरीतकरणे दोषमाह ॥ येत्वेतदिति ॥
पुनः ये एतत् मे मम मतं ईश्वरार्थं कर्मकर्तव्यमित्यनुशासनं अभ्यसूयन्तः द्विषन्तः नानुतिष्ठन्ति ॥ नानुवर्त्तन्ते तान् सर्वज्ञानविमूढान्
सर्वज्ञानेषु नष्टचेतसः अविवेकिनः ॥ नष्टान् नाशं प्राप्तान् विद्धि जानीहि ॥ ३२ ॥ ननु कस्मात्पुनः त्वदीयमतं नानुतिष्ठन्ति ॥ स्वधर्मं विहाय परधर्मं च कस्मा
दनुवर्त्तन्ते तत्र इति कृत्वा त्वच्छासनातिक्रमदोषात् कथं न बिभ्यतीत्यत्राह ॥ सदृशमिति ॥ ज्ञानवानपि गुणवान् स्वस्याः प्रकृतेः प्राचीनकर्म

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥ ३० ॥ ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ॥ श्रद्धा
वन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥ ३१ ॥ ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ॥ सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥ सदृ
शं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ ३३ ॥ इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥ तयो
मम र्न वशमागच्छेत् ॥ तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

जनितसंस्कारस्य वशवर्ती सन् सदृशं चेष्टते ॥ करोति ॥ भूतानि प्राणिनः प्रकृतिं प्राचीनकर्मसंस्कारं यान्ति अनुसरन्ति निग्रहः निवारणं किं करोति ॥
३३ ॥ यदि सर्वोऽपि जन्तुः स्वकीयप्रकृतिसदृशमेव चेष्टते प्रकृतिपूर्वकत्वान्नास्ति ततः पुरुषप्रयत्नविषयस्य अभावात् ॥ शास्त्रानर्थक्यं प्रा
प्तमित्याशङ्क्याह ॥ इन्द्रियस्येति ॥ इन्द्रियाणां इन्द्रियस्यार्थे शब्दादिविषये रागद्वेषौ इष्टे रागः अनिष्टे द्वेषः इत्येवं अवश्यंभाविनौ तयोः वशं नागच्छेत् हि यस्मात्तौ तौ परिपन्थिनौ
अस्य परिपन्थिनौ श्रेयोमार्गस्य परिपन्थिनौ तस्कराविव ॥ ३४ ॥ परधर्मोऽपि धर्मत्वात् अनुष्ठेय एवेति मत्वा तत्राह ॥ श्रेयानिति ॥ स्वधर्मः स्वीयो धर्मः अवस्थितौ
विगुणः विगतगुणोऽपि किञ्चिदङ्गहीनोऽपि परधर्मात् स्वनुष्ठितात् सगुणतया संपादितात् श्रेयान् प्रशस्यतरः स्वधर्मे स्थितेन निधनं मरणमपि श्रेयः मम
परधर्मो भयावहः नरकादिलक्षणभयप्रापक इति ॥ अथवा ॥ स्वधर्मः आत्मज्ञानं विगुणः सत्त्वादिगुणरहितः परेषां इन्द्रियाणां धर्मात् प्रवृ
त्तिजनितात् संसारपातहेतोः ममकारकत्वात् आत्मज्ञानं श्रेयः मुक्तिहेतुत्वात् स्वधर्मे आत्मज्ञाने धर्मे निधनं श्रेयः अपुनर्भवात् परधर्मः
इन्द्रियप्रवृत्तिको धर्मो भयहेतुः संसारहेतुत्वात् ॥ ३५ ॥

यद्यपि ध्यायतो विषयान्पुंसः इत्यस्य परिपंथिनं वित्यादिना रागद्वेषौ संसारयानहेतुत्वात् अनर्थमूलमित्युक्तं । तथापि विविक्तं अनवधारितं चतुर्
के इदानीं संक्षिप्तं निश्चितं वेदमेवेतत्तत्त्वच्छेदाय ज्ञातुमिच्छन् ॥ अर्जुन उवाच ॥ अथ केनेति केन अयं पुरुषः केन प्रयुक्तः पापं चरति । हे वार्ष्णे
य अनिच्छन्नपि बलादिव नियोजितः राज्ञा भृत्य एव बलात्प्रेरितः ॥३६॥ सर्वलोकवैरिणं सर्वानर्थहेतुं अर्जुनेन पृष्टः भगवानुवाच ॥ काम एष इति
एषः कामः सर्वलोकशत्रुः यन्निमित्ता संसारप्राप्तिः एषः कामः केनचित्प्रतिहतः क्रोधो भवति । अतः क्रोधोपि काम एव । रजोगुणसमुद्भवः रजो
गुणाद्भूतः रजोगुणस्य वा हेतुः महाशनः महत् अशनं यस्य सः दुःपूरत्वात् सः अत एव महापाप्मा महत्पापहेतुः इह संसारे एनं वैरिणं विद्धि ॥३७॥
कथं वैरित्वं इति दृष्टान्तैः प्रतिपादयति ॥ धूमेनेति ॥ यथा धूमेन वह्निः आव्रियते । न च पुनः आदर्शो मलेन आव्रियते यथा उल्बेन गर्भो वेष्टितः नेनु गर्भः
आव्रियते तथा तेन कामेन इदं आत्मज्ञानं आच्छादितं ॥३८॥ किं पुनस्तत् इदं शब्दवाच्यं यत् कामेनावृतं तदाह ॥ आवृतमिति ॥ हे कौन्तेय एतेन कामेन
निज

अर्जुन उवाच ॥ अथ केन प्रयुक्तोयं पापं चरति पुरुषः । अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३६॥ श्रीभगवानुवाच ॥ काम एष क्रोध एष रजोगुणसमु
द्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ॥३७॥ धूमेनाव्रियते वह्निर्यथादर्शो मलेन च । यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतं ॥३८॥
आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा । कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३९॥ इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते । एतैर्विमोहय
म त्येष ज्ञानमावृत्य देहिनं ॥४०॥ तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ । पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनं ॥४१॥ इन्द्रियाणि पराण्याहु
रिन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥४२॥

नित्यवैरिणा सर्वदा शत्रुरूपेण दुःपूरेण दुःखेन पूरणं यस्य स तेन अनलेन न विद्यते अलं पर्याप्तिर्यस्य स तेन कामरूपेण कामः इच्छा रूपं
स यस्य कामरूपस्तेन ज्ञानिनः आत्मज्ञस्य ज्ञानं आत्मज्ञानं आच्छादितं आत्मज्ञः कामं सर्वदा वैरिणं जानातीत्यर्थः ॥३९॥ शत्रोरधिष्ठाने ज्ञाते निर्वह रज्जुग्रहणं
भा रणं कर्तुं शक्यते इति कामस्याधिष्ठानमाह ॥ इन्द्रियाणीति ॥ इन्द्रियाणि श्रोत्रादीनि मनः अन्तःकरणं बुद्धिः ज्ञानं अस्य कामस्य अधिष्ठानं आश्रयः उच्यते ॥ एतैः इ
न्द्रियादिभिः एषः कामः ज्ञानं आच्छाद्य देहिनं प्राणिनं मोहयति ॥४०॥ अधिष्ठाननियमे कामस्य निग्रहो भवति इत्याह ॥ तस्मादिति ॥ हे भरतर्षभ तस्मात् कारणात्
त्वं आदौ इन्द्रियाणि नियम्य स्थितः स्यात् एवं ज्ञानविज्ञाननाशनं ज्ञानं शास्त्राचार्योपदेशजनितं विज्ञानं तत्स्फूर्तिः तयोः विनाशकः । तं पाप्मानं पापि
परि नं प्रजहि त्यज ॥४१॥ तत्र किं आश्रय कामं जहि इत्युच्यते ॥ इन्द्रियाणीति ॥ इन्द्रियाणि श्रोत्रादीनि बाह्यविषयदेहापेक्षया पराणि सूक्ष्माणि ॥१२॥
श्रोत्रादिभ्यः आहुः ॥ इन्द्रियेभ्यः मनः परं उत्कृष्टं तु पुनः मनसः अन्तःकरणात् बुद्धिः निश्चयात्मिका परा यो बुद्धेः परतः स आत्मा उत्कृष्टः ॥४२॥ राम राम राम रामराम

स्वधर्मेलयमाराध्य जंस्या मुक्तिरितावुधाः तेऽकंपरमानंदं तोषयेत्सर्वकर्मभिः

ने य

एवं बुद्धेः परं बुद्धा संस्तभ्यात्मानमात्मना। आत्मनापि मनसा आत्मानं मनः संस्तभ्य संयम्य धाय। हे महाबाहो कुरु मदं दुर्जयं अनेक विशेषं कामरूपं शत्रुं जहि।
परूपं हे दुर्ज्ञेयं विशेषं जहि परित्यज मारय॥४३॥ इति तृतीयोध्यायः॥३॥ ॥योयं योगः कर्म योगोपायः सम्यग्ज्ञाननिष्ठा लक्षणः अध्यायद्वयेनोक्तः
तस्यैव कर्त्तो तस्य कर्मिणा तस्य संप्रदायात् तं सकलं गीता र्थं परिसमाप्य मन्वानो भगवान् वंशकथनेन स्तौति॥ इमं विवस्वत इति त्रिभिः॥ गर्भे स्थ अध्या
यद्वयेनोक्तं योगं ज्ञाननिष्ठालक्षणं अव्ययं योगफलस्य मोक्षस्य विनाशाभावात्॥ अव्ययं विवस्वते प्रोक्तवान् विवस्वान् मनवे प्राह मनुः इक्ष्वाकवे अब्र
वीत्॥१॥ राजर्षयः एवं परंपराप्राप्तं क्षत्रियपरंपराप्राप्तं इमं योगं विदुः हे परंतप। सयोगः महता दीर्घकालेन नष्टः विच्छिन्नसंप्रदायः॥२॥ मयाद्य ते स्त
र्जुन ते तुभ्यं स एवायं पुरातनो योगः प्रोक्तः मे मम भक्तोसि सखासि इति यस्मात् एतत् योगज्ञानं उत्तमं रहस्यं इति कारणात् उपदिष्टं॥३॥ कस्मादे
व तं पूर्वं विवस्वन्तं प्रति इदानीं वसुदेवगृहे उत्पन्नस्य भगवतः योगोपदेशो अनुपपन्न इति निप्रायेण आक्षिपति॥ अर्जुन उवाच॥ अपरमिति॥ इ

एवं बुद्धेः परं बुद्धा संस्तभ्यात्मानमात्मना॥ जहि शत्रुं महाबाहो कामरूपं दुरासदं॥४३॥ ॥इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोध्यायः॥ ३॥ श्रीभगवानुवाच॥ इमं विवस्वते योगं प्रोक्तवानहमव्ययं। विवस्वान् मनवे प्राह मनु
रिक्ष्वाकवेऽब्रवीत्॥१॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः॥ स कालेनेह महता योगो नष्टः परंतप॥२॥ स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः॥
भक्तोसि मे सखा चेति रहस्यं ह्येतदुत्तमं॥३॥ अर्जुन उवाच॥ अपरं भवतो जन्म परं जन्म विवस्वतः कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति॥४॥
श्रीभगवानुवाच॥ बहूनि मे व्यतीतानि जन्मानि तव चार्जुन तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप॥५॥ अजोपि सन्नव्ययात्मा भूतानामीश्व
रोपि सन्॥ प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया॥६॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत॥ अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं॥७॥

हे कृष्ण त्वं आदौ प्रोक्तवान् इति एतत् अहं कथं विजानीयां भगवतो जन्म अपरं अर्वाक् वसुदेवगृहे विवस्वतः जन्म परं सर्गादौ एतत् संगतं कुतो र्थं कथं ज्ञास्यामि॥४॥
त्वात्मनि भजनं सर्वज्ञत्वं ईश्वरत्वं च भावि कुर्वन् परिहरति॥ बहूनीति॥ हे अर्जुन मे मम तव च बहूनि जन्मानि व्यतीतानि अहं भवान् तज्ज्ञानशक्तिः अतः जा
नि जानामि त्वं धर्माधर्मादिप्रतिबद्धज्ञानशक्तिः अतः तानि न जानासि॥५॥ कथं तर्हि भवति त्वेश्वरस्य सर्वज्ञस्य धर्माधर्माभावे जन्म इत्यत आह॥ अ
जन्मरहितः अव्ययात्मा अक्षीणज्ञानशक्तिस्वभावोपि सन् भूतानां ब्रह्मादिस्थावरान्तानां ईश्वरोपि सन् स्वां स्वकीयां प्रकृतिं मायां त्रिगुणात्मिकां अ
धिष्ठाय वशीकृत्य आत्ममायया स्वकीयामायया संभवामि॥ न परमार्थतः॥६॥ स च जन्म कदा इत्याह॥ यदा यदेति॥ हे भारत हि यस्मात् यदा धर्म
स्य वर्णाश्रमादिप्रयुक्तस्य ग्लानिर्भवति। अधर्मस्य धर्मविपरीताचरणस्य अभ्युत्थानं उत्पत्तिर्भवति॥ तदात्मानं सृजामि देहवान् भवामि॥७॥

एवं

॥१३॥ तज्जन्म किमर्थमित्यत आह ॥ परित्राणायेति ॥ हे अर्जुन अहं साधूनां परित्राणाय सन्मार्गगामिनां रक्षणाय च अपरं दुःकृतां पापकारिणां विनाशाय धर्मसंस्थापनार्था ४
र्थाय युगे युगे संभवामि उत्पत्तिं करोमि ॥८॥ दिव्यानां ईश्वर जन्मनां कर्मणां च ज्ञानेन फलमाह ॥ जन्म कर्मेति ॥ हे अर्जुन यः मे मम जन्म मायारूपं कर्म सा
धुपरित्राणादि दिव्यं अलौकिकं ईश्वरं एवं अत्यन्तानात्मकारेण तत्त्वतः यथा तथैव वेत्ति जानाति ॥ स देहं त्यक्त्वा पुनर्जन्म न एति किंतु मामेति मां एव प्राप्नोति
॥९॥ नैष मोक्षमार्गः इदानीं प्रवृत्तः किं तर्हि पूर्वमपीत्याह ॥ वीतरागेति ॥ हे अर्जुन बहवः वीतरागभयक्रोधाः गतरागभयक्रोधाः मन्मयाः मत्स्वरूपाः मामुपा
श्रिताः मन्निष्ठाः ज्ञानतपसा ज्ञानरूपेण तपसा पूताः मद्भावं आगताः परां सिद्धिं गताः मोक्षं प्राप्ताः ॥१०॥ तर्हि तव रागद्वेषौ स्तः येन कस्मैचित् वनं कस्मै
चिदात्मभावं प्रयच्छसि ॥ न तु सर्वेभ्य इत्यत आह ॥ ये यथेति ॥ हे पार्थ ये अधिकारिणः यथा येन प्रयोजनेन मां आश्रयन्ते ॥ तान् अहं तथैव तत्फलदानेन भजामि ॥
सर्वशः अनुगृह्णामि मनुष्याः सर्वप्रकारैः मम वर्त्म मार्गं अनुवर्त्तन्ते अनुसरन्ति ॥११॥ तर्हि मोक्षार्थमेव सर्वे त्वया सर्वे भजनेन प्रेरिताः त्वमेव किमिति न भ

परित्राणाय साधूनां विनाशाय च दुःकृतां धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥८॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥ त्यक्त्वा देहं पुन
र्जन्म नैति मामेति सो ऽर्जुन ॥९॥ वीतरागभयक्रोधा मन्मया मामुपाश्रिताः बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥ ये यथा मां प्रपद्यन्ते तांस्तथै
व भजाम्यहं ॥ मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ॥११॥ कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः क्षिप्रं हि मानुषे लोके सिद्धिर्भवति क
र्मजा ॥१२॥ चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ॥ तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययं ॥१३॥ न मां कर्माणि लिंपंति न मे कर्मफले स्पृ यं
हा इति मां यो ऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥

जंते इत्यत आह ॥ कांक्षंत इति ॥ इह अस्मिन् लोके कर्मणां सिद्धिं फलनिष्पत्तिं कांक्षंतः प्रार्थयंतः इंद्रादि देवताः यजंते हि यस्मात् मानुषे लोके मनुष्य लो
के मनुष्यलोके कर्मजा कर्मणो जाता फलरूपा सिद्धिः क्षिप्रं शीघ्रं भवति ॥१२॥ तस्मात् पुनः कारणात् नियमेन तवैव वर्त्मानुवर्त्तन्ते ॥ ना
न्यस्य ॥ अनेकत्र लोकानां नानाकामना निष्कामतया विचित्रप्रवर्त्तमानानां उत्तममध्यमादि वैचित्र्यं कुर्वतः त्वत् वैषम्यं प्राप्नोति ॥ इत्यत आह ॥
मया ईश्वरेण चातुर्वर्ण्यं वर्णचतुष्टयं गुणकर्मविभागशः गुणानां सत्त्वरजस्तमसां विभागेन तत्कार्यादि तत्सृष्टं प्रवृत्तिं एकं कर्मणां शमदमा
र्यं च क्षमादीनां ब्राह्मणानां क्षत्रियविट्शूद्रकर्त्तृकाणां सृष्टं तस्य चातुर्वर्ण्यस्य कर्त्तारमपि संतं मां परमार्थतः अकर्त्तारं अव्ययं असंसारि
द णं जानीहि ॥१३॥ नेदं वैषम्यं न तत्त्वज्ञानेन फलमाह ॥ न मामिति ॥ कर्माणि मां न लिंपंति देहाद्यहंकाराभावात् न च कर्मफले स्पृहा इति ॥१३॥
यः मां इति आत्मानं जानाति स कर्मभिर्न बध्यते तस्य कर्माणि देहारंभकाणि न भवंति ॥१४॥

ये यथा मां प्रपद्यन्ते इत्यादि चतुर्भिः श्लोकैः ईश्वरस्य वैषम्यं कुर्वतो वैषम्यप्रसक्तिं परिहृत्य पूर्वोक्तमेव कर्मयोगं प्रपञ्चयितुं अनुस्मारयति ॥ एवमिति ॥ वै
पूर्वैरपि मुमुक्षुभिर्जनकादिभिः एवं ज्ञात्वा अकर्ता नास्तीति कर्म बन्धकं न भवतीति विज्ञाय कर्म कृतं ॥ तस्मात्त्वं कर्मैव कुरु ॥ पूर्वैः पूर्वतरं
कृतं पूर्वैर्जनकादिभिः पूर्वतरं युगान्तरेऽपि तत्त्वं कृतार्थं कृतं ॥१५॥ ननु तत्त्वविदः सम्यग्विचार्य कर्तव्यं न तु लोकपरंपरामात्रेणेत्येतदर्थं कर्मस्वरूपे वि
दुर्विज्ञेयतां दर्शयति ॥ किं कर्मेति ॥ किं कर्म कीदृशं कर्म किमकर्म कर्मकरणमिति अत्र कर्म विनाऽगकवयोऽपि मेधाविनोऽपि मोहिताः ततः तत्कर्म यत्तेन
कर्म ते प्रवक्ष्यामि यज्ज्ञात्वा अशुभात्संसारात् मोक्ष्यसे ॥१६॥ ननु कर्म नाम देहादिचेष्टा लोकप्रसिद्धं अकर्म च तदकरणं किमत्र बोद्धव्यमित्यत आह त्वा
कर्म हियस्मात् कर्मणः शास्त्रविहितस्य तत्त्वं स्वरूपं बोद्धव्यं ज्ञातव्यं विधितः विकर्मणः प्रतिषिद्धस्य कर्मणः स्वरूपं बोद्धव्यं ज्ञातव्यं ज्ञानेनानि
षिद्धकर्म च नानादायन्तं इति कारणं कृतं तस्य दोषाय न भवति विवेकी देहेन्द्रियादिभिरेव कर्म कृतं मन्यते आत्मानं अकर्तारं कूटस्थं मन्यते ॥ आ

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ॥ कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं ॥१५॥ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ॥ तत्ते कर्म प्र
वक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१६॥ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ॥ अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥ क
र्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ॥ स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥

त्मानं अकर्तारं कूटस्थं मन्यते ॥ अज्ञस्य तु रागतः अहंकारेण कृतं निषिद्धं कर्म दोषाय भवति ॥ यतः अज्ञः देहेन्द्रियादिगतं कर्तृत्वं आत्मनि
अविद्यमानमपि विद्यमानं मन्यते ॥ एवं विकर्मणः स्वरूपं बोद्धव्यं अकर्मणः कर्माकरणस्य स्वरूपं बोद्धव्यं गहना दुर्विज्ञेया तत्त्वयादीनां कर्म णां कर्मादी
दीनां गतिः स्वरूपं ॥१७॥ किं पुनस्तत्तत्त्वं कर्मादेः यत्त्वं बोद्धव्यं भगवता वक्ष्यामीति प्रतिज्ञातं तदाह ॥ कर्मणीति ॥ यः आत्मतत्त्ववित् देहेन्द्रि नां
यातः करणाश्रिते आत्मनि आत्मा सर्वं प्रतीयमाने कर्मणि कर्माभावं नैः कर्म्यं इति ॥ आत्मानं पश्येत् दृष्टान्तमाह ॥ यथा अतिवेगेन रथे सा चल कर्म
त्सां तिनौकायां नदीतीरस्थेषु वृक्षेषु चलत्वं हृद्यपत्वे प्रतीतिस्तेन ध्यारोप्यते कर्मणि चलनं तत्र आत्मा प्रतीयमानेऽपि विवेकी नेषु कर्माभा
भावं वं पश्यति ॥ तथा अकर्मणि देहेन्द्रियादिव्यापारोपरमे अहं न कर्म करोमि ॥ सुखेन स्थास्यामीति देहेन्द्रियादिव्यापाराभावे आत्मनि अध्या
रोपयति ॥ तस्मिन्नकर्माभावे यः कर्म पश्येत ॥ तस्य कर्माभावस्य अहंकारसर्वकर्म उपलक्ष्यत्वात् अज्ञानेन सुखबुद्ध्या कर्मत्यागं स्थापि
ध्याचारत्वात्कर्मत्वं भवति ॥ स युक्तः योगी कृत्स्नकर्म कृत तथाभूता व ज्ञात्वा तेऽपि यः कर्माणि परमेश्वरार्पणबुद्ध्या क्रियमाणानि कर्म बन्धक
त्वात्कर्मेदं न भवतीत्येवं पश्यति ॥ यः अकर्मणि विहिताकरणे कर्म बन्धत्वं प्रत्यवायोत्पादकत्वात्पश्यति स मनुष्येषु बुद्धिमान् युक्तः योगी सकलकर्मकृत ॥१८॥

कः

गीतासटी० तदेतत्कर्म्मण्यकर्म्मादिदर्शनं स्तूयते ॥ यस्येति ॥ यस्य ज्ञात्मदर्शिनः सर्व्वे समारंभाः सर्व्वाणि कर्म्माणि कामसंकल्पवर्ज्जिताः कामः फलं संकल्पः कर्त्ता
॥१४॥ हमित्यादि वर्ज्जितानि बुधाः ते ज्ञानाग्निदग्धकर्म्माणं ज्ञानाग्निना दग्धानि नष्टानि कर्म्माणि यस्य तं पंडितं प्राहुः ॥१९॥ ब्रह्मविदोपि कुतश्चिन्निमित्तात्कर्म्माणि कर्म
प्रवृत्तोपि तत्फलासंगरहितत्वाल्लोकसंग्रहार्थं कुर्व्वाणः ज्ञानाग्निदग्धकर्म्मत्वात् नैव किंचित्करोतीत्याह ॥ त्यक्त्वेति ॥ यः कर्म्मफलासंगं कर्म्माणि कर्म्म
ब: फले च आसक्तिं त्यक्त्वा नित्यतृप्तः आत्मज्ञानेन सर्व्वदा तृप्तः निराश्रयः दृष्टादृष्टफलाश्रयरहितः सः कर्म्माणि प्रवृत्तोपि किंचिन्नैव करोति कृतमपि कर्म्म त
स्य बंधहेतुर्न भवतीत्यर्थः ॥२०॥ यः पुनः सर्व्वकर्म्मपरित्यागेन ब्रह्मणि संजातात्मदर्शनः स केवलं कर्म्मणि त्रयो जन्म अपप्रयत्न साधनं कर्म्म स्वा
त्मशरीरयात्रामात्रं चेष्टयति ॥ ज्ञाननिष्ठो भवतीत्याह ॥ निराशीरिति ॥ निराशीर्निस्पृहः यतचित्तात्मा संयतचित्तेंद्रियदेहः ॥ त्यक्तः सर्व्वः परिग्रहः पुमान्
केवलं शरीरं शरीराभिमानरहितं शरीरस्थितिहेतुमात्रं कर्म्मव्यापारं कुर्व्वन् किंचित्पापं न प्राप्नोति ॥२१॥ अथ चित्तमसंतो तत्प्रयत्नं यदृच्छाया इत्या

यस्य सर्व्वे समारंभाः कामसंकल्पवर्ज्जिताः ज्ञानाग्निदग्धकर्म्माणं तमाहुः पंडितं बुधाः ॥१९॥ त्यक्त्वा कर्म्मफलासंगं नित्यतृप्तो निराश्रयः ॥
कर्म्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः ॥२०॥ निराशीर्यतचित्तात्मा त्यक्तसर्व्वपरिग्रहः ॥ शारीरं केवलं कर्म्म कुर्व्वन्नाप्नोति किल्बिषं ॥२१॥
यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ॥ समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥२२॥ गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः ॥ यज्ञा
याचरतः कर्म्म समग्रं प्रविलीयते ॥२३॥ ब्रह्मार्प्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ॥ ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म्मसमाधिना ॥२४॥

अभिहितो हितावचनेन च ज्ञानमुपयते ॥ शरीरस्थितिहेतोरन्नादेः प्राप्तिद्वारमाह ॥ यदृच्छेति ॥ यदृच्छालाभसंतुष्टः अप्रार्थितलाभसंतुष्टः द्वंद्वा
तीतः द्वंद्वैः शीतोष्णादिभिः अनुपहतचित्तः विमत्सरः निर्वैरः सिद्धौ असिद्धौ च लाभालाभे समः तुल्यः हर्षविषादरहितः कर्म्म कृत्वापि कर्म्मणा न निबध्य
ते ॥२२॥ ब्रह्मविदोपि कुतश्चिन्निमित्तात् लोकसंग्रहार्थं कर्म्मणि प्रवृत्तस्य ॥ कर्म्म बंधकं न भवतीत्याह ॥ गतसंगस्येति ॥ गतसंगस्य कर्म्म
त दोषसंगरहितस्य मुक्तस्य निवृत्तधर्म्माधर्म्मादिनिबंधनस्य ज्ञाननिष्ठस्य यज्ञाय परमेश्वरार्थं कर्म्म कुर्व्वतः समग्रं सफलं फलेन सह विलीयते ॥ प्र
आत्मनि विलीयं याति ॥२३॥ कस्मात्पुनः कारणात् क्रियमाणं कर्म्म स्वफलारंभकं अकुर्व्वत् समग्रं प्रविलीयत इत्याह ॥ ब्रह्मार्प्पणमिति ॥
ब्रह्म ब्रह्मार्प्पणं अर्प्यते हूयते येन स्रुक्स्रुवादिना तदर्प्पणं ब्रह्मैव यद्धविरपि ब्रह्मैव तस्मिन्नग्नौ ब्रह्मणा कर्त्रा हुतं होमः ब्रह्मैव
तथा यः पश्यति तेन ब्रह्मकर्म्मसमाधिना ब्रह्मात्मके कर्म्मणि समाधिश्चित्तैकाग्र्यं यस्य तेन ब्रह्मैव गंतव्यं प्राप्यं न फलांतरमित्यर्थः ॥२४॥ ॥१४॥

ब्रह्माग्नौ

अधुनासम्यग्दर्शनस्ययज्ञत्वं संपादितं कृत्वा तत्साधनत्वेनान्यानपि यज्ञान् अधिकारभेदेन ज्ञानिनो यायान् प्यंते ॥ दैवमेवेत्यादिषड्भिः ॥ अपरे योगिनः
कर्मिणः दैवमेव यज्ञं देवा इज्यंते येन असौ दैवो यज्ञः तमेव पर्युपासते कुर्वंतीति अपरे ब्रह्मविदः ब्रह्माग्नौ परब्रह्मस्वरूपे अग्नौ यज्ञं प्रत्यगात्मानं यज्ञेनै
वपरमात्मैकदर्शनेनैव जुह्वति ॥२५॥ अन्ये योगिनः श्रोत्रादीनींद्रियाणि संयमाग्निषु इंद्रियसंयमरूपेष्वग्निषु तस्मिन् जुह्वति ॥ अन्ये योगिनः शब्दादी
न्विषयान् इंद्रियाग्निषु इंद्रियसंयम एकोऽग्निः तस्मिन् जुह्वति ॥ अन्ये योगिनः शब्दादीन् विषयानिंद्रियाग्निषु इंद्रियाण्येवाग्नयः तेषु जुह्वति ॥
श्रोत्रादिभिरविरुद्धविषयग्रहणं होमः ॥२६॥ अपरे योगिनः सर्वाणींद्रियकर्माणि इंद्रियव्यापारान् ॥ चकारात्प्राणकर्माणि प्राणादिपंचवायु
व्यापारान् आत्मसंयमयोगाग्नौ आत्मनि संयमः स एव योगः अग्निस्तस्मिन् विवेकज्ञानदीपिते जुह्वति ॥२७॥ द्रव्ययज्ञा इति ॥ द्रव्यदानं तीर्थेषु यज्ञं सत्पात्रेषु
ब्रह्म बुद्ध्या कुर्वंतीति ॥ ये ते द्रव्ययज्ञाः तप एव यज्ञो येषां ते तपोयज्ञाः अष्टांगः योग एव यज्ञो येषां ते योगयज्ञाः वेदाध्ययनमेव यज्ञो येषां ते स्वाध्याययज्ञाः ॥

दैवमेवापरे यज्ञं योगिनः पर्युपासते ॥ ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥ श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति ॥ शब्दादी
न्विषयानन्य इंद्रियाग्निषु जुह्वति ॥२६॥ सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे ॥ आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥ द्रव्य
यज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥२८॥ अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ॥ प्राणापान
गती रुद्ध्वा प्राणायामपरायणाः ॥२९॥ अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥ सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥३०॥ यज्ञशिष्टा
मृतभुजो यांति ब्रह्म सनातनं ॥ नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥३१॥

वेदार्थदर्शनमेव यज्ञो येषां ते ज्ञानयज्ञाः । यतयः सम्यक् संशितं तनूकृतं कर्मयैः ते संशितव्रताः ॥२८॥ अपरे योगिनः अपाने अधोवृत्तौ प्राणं
अपरे ऊर्ध्ववृत्तिं पूरकेण जुह्वति ॥ तथा रेचककाले प्राणे ऊर्ध्ववृत्तौ अपानं अधोवृत्तिं जुह्वति ॥ कुंभककाले प्राणापानयोः गती रुद्ध्वा प्राणायामप
रायणा भवंति ॥२९॥ अपरे नियताहाराः नियमितभोजनाः संतः प्राणान् वायुभेदान् प्राणेष्वेव जुह्वति योगी यं यं वायुं जयति तस्मिन्नितरेषु तस्मिन्
क्षिप्ता एव भवंतीत्यर्थः एते सर्वेपि यज्ञविदो यज्ञक्षपितकल्मषाः स्वस्वाधिकारविहितयज्ञनिर्धूतपातकाः भवंति ॥३०॥ एवं यथोक्तान् य
ज्ञान् निर्वर्त्य तेनिष्पापास्तेषां भोजिनः फलं तदकरणे च दोषमाह ॥ यज्ञशिष्टेति ॥ यज्ञशिष्टामृतभुजः यज्ञावशिष्टमेवामृतं भुंजते ॥ यद्वा यज्ञं कृत्वा
वशिष्टकाले विधिवद्भुंजते ॥ तेन सनातनं ब्रह्म यांति प्राप्नुवंति ॥ हे कुरुसत्तम अयं लोकः अल्पसुखोपि अयज्ञस्य यज्ञरहितस्य नास्ति अ य
न्यः विशिष्टसाधनसाध्यः कुतः ॥३१॥

गीतासटी॰ ॥१५॥

ज्ञानयज्ञेनैव तु ज्ञानयज्ञं जुह्वति॥ एवं बहुविधेति॥ एवं बहुविधाः बहुप्रकाराः यज्ञाः ब्रह्मणो वेदस्य मुखे विततः वेदेन प्रकाश्यमाना इत्यर्थः
तान्सर्वान् कर्मजान् कायिकवाचिकमानसव्यापारजनितान् विद्धि जानीहि॥ नत्वात्मविषयान् आत्मा तु निर्व्यापारः एवं यज्ञानां कायादिव्या
पारजत्वे आत्मनो निर्व्यापारत्वं ज्ञात्वा विमोक्ष्यसे॥३२॥ ब्रह्मार्पणमित्यादिश्लोके न सम्यक् दर्शनस्य यज्ञत्वं संपादितं यज्ञा अनेके उपदिष्टाः
तेभ्यः सिद्धपुरुषार्थत्वेन ज्ञानेभ्यः ज्ञानं स्तौति॥ श्रेयान्द्रव्यमयादिति॥ हे परंतप द्रव्यमयाद्यज्ञात् द्रव्यसाधनसाध्यात् फलारंभकात् यज्ञात् ज्ञा
नयज्ञः फलानारंभकत्वात् श्रेयान् प्रशस्यतरः॥ कथं यस्मात् हे पार्थ अखिलं सर्वं कर्म ज्ञाने मोक्षसाधने परिसमाप्यते॥ अंतर्भवतीत्यर्थः॥३३॥
एवं भूतात्मज्ञानं केन साधनेन प्राप्यते॥ तद्विद्धीति॥ तत् ज्ञानं गुरून् प्रणिपातेन परिप्रश्नेन सेवया विद्धि जानीहि॥ ते तुभ्यं तत्त्वदर्शिनः ज्ञानमुप ज्ञानिनः
देक्ष्यंति॥३४॥ ज्ञानफलमाह॥ यज्ज्ञात्वेति॥ हे पांडव यज्ज्ञानं ज्ञात्वा पुनः एवं प्रमुनाप्रकारेण मोहं न यास्यसि॥ न प्राप्स्यसि॥ येन ज्ञानेन भूता

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥ कर्म्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे॥३२॥ श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परंत
प सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥३३॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः॥३४॥ यज्ज्ञात्वा
न पुनर्मोहमेवं यास्यसि पांडव॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥३५॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः सर्वं ज्ञानप्लवेनैव
वृजिनं संतरिष्यसि॥३६॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥३७॥ नहि ज्ञानेन स
दृशं पवित्रमिह विद्यते॥ तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति॥३८॥

निःशेषेण एवं वै आत्मनि यथो मयि स्थितानि द्रक्ष्यसि॥३५॥ किं च अपि चेदिति॥ चेत् यद्यपि सर्वेभ्यः पापेभ्यः पापकृद्भ्यः पापकृत्तमोऽसि। तथापि ज्ञानप्लवे
नैव ज्ञानोडुपेन सर्वं वृजिनं पापार्णवं संतरिष्यसि॥३६॥ ज्ञानं कथं पापं नाशयति॥ तत्र दृष्टांतमाह॥ यथैधांसीति॥ हे अर्जुन यथा समिद्धोऽग्निः एधां
सि काष्ठानि भस्मसात्कुरुते॥ तथा च ज्ञानाग्निः ज्ञानमेवाग्निः ज्ञानाग्निः सर्वकर्माणि भस्मसात् निर्बीजानि कुरुते॥३७॥ तत्र हेतुः तत् ज्ञानं कस्य
चिदेवाधिकारिणो भवति न सर्वस्येति वक्तुमाह॥ नहीति॥ हि यस्मात् इह ज्ञानेन सदृशं समं पवित्रं न विद्यते॥ तत् ज्ञानं योगसंसि॥ द्धः यो
गेन कर्मयोगेन समाधियोगेन च संस्कृतः योग्यतामापन्नः बहुकालेन स्वयं आत्मनि विषये लभ्यते॥३८॥ रामरामरामरामरामराम ॥१५॥

ते नि

येनैकांतिकं ज्ञानप्राप्तिर्भवति तमुपायं उपदिशति ॥ श्रद्धावानिति ॥ श्रद्धावान् श्रद्धालुः तत्परः तन्निष्ठः गुरूपासनादौ अभियुक्तः संयते
न्द्रियः संयतानि विषयेभ्यो निवर्त्तितानि इंद्रियाणि यस्य सः ज्ञानं लभते ॥ ज्ञानं लब्ध्वा च अचिरेण क्षिप्रमेव परां शांतिं मोक्षं प्राप्नोति ॥ ३९ ॥ अ
त्र च संशयो न कर्त्तव्यः पापिष्ठो हि संशयः इत्याह ॥ अज्ञश्चेति ॥ अज्ञः अनात्मज्ञः च तत् ज्ञानसाधनेषु श्रद्धारहितः संशयात्मा संदेहचि
त्तो विनश्यति ॥ संशयात्मनः संदिग्धचित्तस्य अयं सर्वसाधारणो लोको नास्ति परलोकोपि नास्ति सुखं च न तत्रापि संशयोपपत्तेः ॥ ४० ॥ त्यक्त जा
संदेहो ज्ञाननिरस्तोऽस्ति ॥ योगसंन्यस्तेति ॥ हे धनंजय कर्माणि योगसंन्यस्तकर्माणं योगेन परमार्थदर्शनलक्षणेन संन्यस्तानि कर्माणि येन स
स्तं ज्ञानसंछिन्नसंशयं जीवपरमात्मनोरेकत्वज्ञानेन संछिन्नः संशयो यस्य तम् ॥ आत्मवंतं अप्रमादरहितं न निबध्नंति अनिष्टफलं न
बध्नंति जनयंति ॥ ४१ ॥ यस्मात् ज्ञानानुष्ठाने च संशयवान् विनश्यति ॥ तस्मात् संशयो न कर्त्तव्य इत्याह ॥ तस्मादिति ॥ हे भारत तस्मात् अज्ञानसं
कर्मानुष्ठाने

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः ॥ ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ॥ ना
यं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥ ४० ॥ योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं ॥ आत्मवंतं न कर्माणि निबध्नंति धनंजय ॥ ४१ ॥
तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः ॥ छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या
यां श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम चतुर्थोऽध्यायः ॥ ४ ॥ अर्जुन उवाच ॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ॥ यच्छ्रेय एत
योरेकं तन्मे ब्रूहि सुनिश्चितं ॥ १ ॥

हृत्स्थं भूतं अविवेकाज्ञानात् हृदि बुद्धौ स्थितं एनं आत्मविनाशहेतुभूतं संशयं आत्मनो ज्ञानासिना सर्वशोकोपशमनं आत्मज्ञानमेव असिः खड्गस्तेन
छित्त्वा योगं आत्मज्ञानसाधनं साधनकर्मयोगं आतिष्ठ कुरु युद्धाय उत्तिष्ठ ॥ ४२ ॥ इति चतुर्थोऽध्यायः ॥ ४ ॥ कर्मण्यकर्म यः पश्येत् ज्ञानाग्निद
ग्धकर्माणं शरीरं केवलं कर्म यदृच्छालाभसंतुष्टः ब्रह्मार्पणं ब्रह्म हविः इत्यादिवचनैः सर्वकर्मसंन्यासं उक्त्वा छित्त्वैनं संशयं योगमा
तिष्ठेत्यनेन कर्मयोगं च उक्तवान् तयोः च स्थितिगतिवत् परस्परविरुद्धयोः ॥ एकेन युगपत् अनुष्ठानं अशक्यत्वात् कालभेदेन अनुष्ठान
नविधानाभावात् अन्यतरकर्त्तव्यतायामेकस्य प्रशस्यतरस्य बुभुत्सया ॥ अर्जुन उवाच ॥ संन्यासमिति ॥ हे कृष्ण कर्मणां संन्यासं शास्त्रीयाणां
कर्मणां त्यागं पुनः योगं तेषां कर्मणां ईश्वरार्थं अनुष्ठानं च शंससि कथयसि एतयोः यत् एकं श्रेयः तत् मे सुनिश्चितं तत् कर्म निश्चित्य ब्रूहि ॥ १ ॥

सानिश्चयमाचष्टे मालानि एकाय

त्वाभिप्रायमजानानो निर्णयं पृच्छति। भगवानुवाच॥ संन्यास इति॥ संन्यासः कर्मणां त्यागः कर्मयोगः तेषां कर्मणामनुष्ठानं तावुभौ निःश्रेय करणं
तयो सकरौ मोक्षसाधकौ। तु पुनः कर्मसंन्यासात् केवलात् कर्मत्यागात् कर्मयोग ईश्वरार्थकर्मकरणं विशिष्यते॥ तत्कस्य॥२॥ ज्ञानरहितकेवलसंन्या
सकर्मयोगयोर्मुक्तिहेतुत्वे धर्म्ये कर्मयोगस्य तु त्वाव्ज्ञे तुमाह॥ ज्ञेय इति॥ य एवंविधः कर्मयोगी नित्यसंन्यासी ज्ञेयः। सुखे सुखदे हेतौ च
न कांक्षति॥ दुःखे दुःखहेतौ च न द्वेष्टि निर्द्वंद्वः शीतोष्णसुखदुःखादिद्वंद्वसहिष्णुः हि यस्मात् हे महाबाहो सुखमनायासेन बंधात्प्रमुच्यते॥३॥ क त
र्मयोगकर्मसंन्यासयोरंगप्रधानत्वेन व्यवस्थाभेदेन च॥ कर्मसमुच्चयेत्र निषिद्धे तत्र व्यविकल्पमंगीकृत्य तयोः कः श्रेष्ठ इति प्रश्नो मूढानि
मे नाम्भिज्ञ चितेन विवेकिनामित्याह॥ सांख्ययोगाविति॥ बालाः मूढाः सांख्ययोगौ ज्ञाननिष्ठत्कर्मणां त्यागः सांख्यं ईश्वरार्थे कर्मनिष्ठानं योगः
तौ पृथक्फलौ बालाः प्रवदंति न पंडिताः॥ कुत इत्यत आह एकमपि सम्यक्तयास्थितः एकस्य सम्यक्तयानुष्ठानात् नरः उभयोः फलं मोक्षं विंदते प्राप्नो

म

॥श्रीभगवानुवाच॥ संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ॥ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते॥२॥ ज्ञेयः स नित्यसंन्यासी यो न
द्वेष्टि न कांक्षति। निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते॥३॥ सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः॥ एकमप्यास्थितः सम्यगुभयो
र्विंदते फलं॥४॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति॥५॥ संन्यासस्तु महाबाहो दुःखमा
प्तुमयोगतः॥ योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥६॥ योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि
न लिप्यते॥७॥

न

म ति॥४॥ कथमित्यत आह॥ यत्सांख्यैरिति॥ सांख्यैर्ज्ञाननिष्ठैः संन्यासिभिः यत् स्थानं मोक्षं प्राप्यते ईश्वरार्थकर्मकारिभिः योगैः तदेव प्राप्यते॥ तदेव ज्ञान
यो प्राप्तिद्वारेण योऽसौ यः पुमान् सांख्ययोगौ एकफलत्वात् एकमेव पश्यति स पश्यति सम्यक् जानाति॥५॥ नन्वेवं यादि त एव संन्यासः कर्तुमुचित इति मत्वा तत्
प्रतिज्ञामाह॥ संन्यासस्त्विति॥ हे महाबाहो तु पुनः संन्यासः सर्वकर्मणां त्यागः अयोगतः ईश्वरार्पितफलनिरपेक्षकर्म विना दुःखं ज्ञातदुःखाय भवति॥
ते इके वार्तिकलहिंद्रि प्रमादिनो विक्षिप्ता चित्ता ...नाः कलहोत्सुकाः संन्यासिनोपि दृश्यंते देवेसं दुषितावाया इति योगयुक्तः मुनिः ब्रह्मवित्
चिरेण शीघ्रमेव ब्रह्म परमार्थज्ञानहेतुः संन्यासस्तत्र अधिगच्छति प्राप्नोति॥६॥ कर्मयोगादि केमेणा ब्रह्माधिगमेप्रसत्यपि तदुपरितने न कर्मणा
बंधः स्यादित्याशंक्याह॥ योगयुक्त इति॥ योगयुक्तः कर्मयोगयुक्तः विशुद्धात्मा विशुद्धा बुद्धिः विजितात्मा विजितदेहः जितेंद्रियः सर्वभूता ॥१६॥
त्मभूतात्मा ब्रह्मादीनां आत्मभूतः आत्मा यस्य सः लोकसंग्रहार्थं कर्म कुर्वन्नपि न लिप्यते॥७॥ भूतात्मा

ति

कुर्वन्नपि न लिप्यते। बद्धिविरुद्धमाशंक्य कर्तृत्वाभिमानाभावात् विरुद्धमित्याह। नैवेति। युक्तः समाहितः तत्त्ववित् आत्मनो याथात्म्यवित्
सन् किंचित् नैव करोमीति मन्येत चिंतयेत॥८॥ कदा कथं वा तत् तत्राह पश्यन्नित्यादि सार्धेन। तत्त्ववित्पर
विषये मार्थदर्शी दर्शनश्रवणादि क्रियां कुर्वन्नपि इंद्रियाणि इंद्रियार्थेषु वर्त्तंते नाहं किंचित्करोमीति एवं धारयन् चिंतयन् संन्यसन् मन्येत॥९॥ यस्तु
षु पुनः एवं तत्त्ववित् कर्मयोगस्वरूपः तस्य कर्म यथा बंधकं न भवति तत्प्रकारमाह। ब्रह्मणीति। यः कर्माणि ब्रह्मणि ईश्वरे आधाय तदर्थं
करोमीति बुध्या कर्मफले संगं त्यक्त्वा करोति। स पापेन न लिप्यते। सत्त्वस्य अंतःकरणस्य शुद्धिरेव तेषां फलमित्यभिप्रायः॥१०॥
कर्मणो बंधकत्वाभावप्रकारमुक्त्वा तस्य चित्तशुद्धिफलत्वं सदाचारेण दर्शयति। कायेति। योगिनः कर्मिणः आत्मशुद्धये एतत्कं

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित्। पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन्॥८॥ प्रलपन् विसृजन् गृह्ण
स्थिन्ति न्नुन्मिषन्निमिषन्नपि। इंद्रियाणींद्रियार्थेषु वर्त्तंत इति धारयन्॥९॥ ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवांभसा
॥१०॥ कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि। योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये॥११॥ युक्तः कर्मफलं त्यक्त्वा शांति
काम माप्नोति नैष्ठिकीं। अयुक्तः कामकारेण फले सक्तो निबध्यते॥१२॥ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी। नवद्वारे पुरे देही नैव कु
र्वन्न कारयन्॥१३॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः। न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते॥१४॥ राम राम राम राम राम राम

आत्मशुद्ध्यर्थं कायेन मनसा बुद्ध्या केवलैरिंद्रियैः कायमनोबुद्धींद्रियैः कायमनोबुद्धींद्रियव्यापारे संगं त्यक्त्वा फलविषये संगं त्यक्त्वा कर्म नित्यनै
मित्तिकं कुर्वंति॥११॥ ननु कथं तेनैव कर्मणा कश्चिन्मुच्यते कश्चिद्बध्यत इति व्यवस्था स्यात् तत्राह। युक्त इति। युक्तः फलनिरपेक्षः ईश्वरार्थं कर्म
का कुर्वन् शांतिं मोक्षाख्यां नैष्ठिकीं सत्त्वशुद्धिक्रमेण ज्ञाननिष्ठां प्राप्नोति। यस्तु अयुक्तः कर्मफलकामी स कामकारेण फले निबध्यते॥१२॥ एवं तत्
काम तत् चित्तशुद्धिमतः संन्यासः कर्मयोगे विशिष्यत इति। इदानीं शुद्धचित्तस्य संन्यासं श्रेष्ठं त्वाह। सर्वेति कर्माणीति। वशी यतेंद्रियो देही आत्मा मनसा
विवेकबुद्ध्या कर्माणि नित्यनैमित्तिकानि काम्यनिषिद्धानि कर्माणि संन्यस्य परित्यज्य नवद्वारे नवछिद्रे देहे स्वयं नैव कुर्वन्
त्र न्नन्यं च कारयन् अन्यं नेशयन् सुखं सुखेन आस्ते तिष्ठति॥१३॥ ननु परमेश्वरस्य लोककर्तृत्वात् पापपुण्यसंबंधः स्यादिति आशंक्याह। न कर्तृत्वमिति। प्र
भुः आत्मा लोकस्य न कर्तृत्वं स्वतः सृजति करोति ... प्रसादादीनि लोकस्य ईप्सितानि कर्माणि कर्तृफल फले

त्रै पुरे

नामकीर्त्तनादेव

गीतासटी०
३७॥

परमार्थतो विभोस्तत्त्वमाह ॥ नादत्त इति । विभुः ईश्वरः अविद्याकामवशात् लोके कर्मसु न नियुक्तः पुनः कस्यचिद्भक्तस्य पापं न गृह्णाति । किंतु
तस्य संनिधानादेव पापं नश्यत्प्रसादाद्भवति । च पुनः भक्तस्य सुकृतं नादत्ते । ईश्वराय निवेदिते नैकम्‌नं तं भवति । अज्ञानेनाविवेकेन बुद्धिः
आवृताः तेनाप्राणिनः मोहंगच्छंति । आत्मनिकर्तृत्वेनोक्ते त्वीश्वरे पापपुण्ययोरादानं मन्यते ॥१५॥ ज्ञानिनस्तु न मुह्यंतीत्याह ॥ ज्ञानेनेति ॥ तु पु
नः येषां तत् जंतुमोहकं अज्ञानं आत्मनो ज्ञानेन आत्मज्ञानेन नाशितं ॥ तेषां ज्ञानं आदित्यवत् परं तत् परं ब्रह्म प्रकाशयति ॥१६॥ परमार्थज्ञा
निनां ज्ञानफलमाह ॥ तद्बुद्धय इति ॥ तद्बुद्धयः तस्मिन्परब्रह्मणि बुद्धिर्येषां ते तद्बुद्धयः । तदात्मनः तदेव परं ब्रह्म आत्मा येषां ते । त
न्निष्ठाः निष्ठा । तात्पर्यं तस्मिन्नेव ब्रह्मणि सर्वकर्माणि संन्यस्य अवस्थानं येषां ते तन्निष्ठाः ॥ तत्परायणाः तदेव परं ब्रह्म परमयनं

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥१५॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्म
नः तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं ॥१६॥ तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्द्धूत
कल्मषाः ॥१७॥ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥१८॥ इहैव तैर्जितः सर्गो येषां सा
म्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

परायणं तिर्येषां ते तत्परायणाः केवलात्मरताः ज्ञाननिर्द्धूतपातकाः ये तादृशाः ते न ज्ञानेन निर्द्धूतो नाशितो कल्मषं पापादि संसारकारणं दोषो ये
षां ते अपुनरावृत्तिं पुनर्देहसंबंधं न गच्छंति ॥ मुक्ता भवंति इत्यर्थः ॥१७॥ कथं ते तत्पश्यंतीत्यपेक्षायां तत्प्रकारमाह ॥ विद्याविनयेति ॥ पंडिताः वि
वेकिनः विद्यावति सुविनीते ब्राह्मणे सात्विके राजस्यां गवि तामसे हस्त्यादौ समदर्शिनः समं सर्वेष्वपि धिना गुणसंस्कारविक्रिया समा
हितानादृतेन परं ब्रह्मैव पश्यंति ॥१८॥ ननु असमेषु समदर्शिनस्ते दोषवंतः समासमाभ्यां विषमसमे पूजातः इति स्मृतेरित्याशंक्याह ॥ इहैवेति ॥ येषां पंडितानां यथाह गौतम
मनः सर्वेषु भूतेषु ब्राह्मणः समभावेन स्थितं तैरिहैव अस्मिन्नेव शरीरे सर्गो जन्म जितः वशीकृतः हि यस्मात् समं एकं निर्दोषं श्व ॥१७॥
पाकादिषु वर्तमानमपि तद्दोषरहितं ॥ तस्मात् समं ब्रह्म पश्यंतः ब्रह्मण्येव स्थिताः संसारदोषस्तान् न स्पृशतीत्यर्थः ॥१९॥ समासमा
ज्ञाननिर्द्धूतकल्मषाः गौतमसौक्तदोषस्तु ब्रह्मभावप्राप्तेः पूर्वमेव

ब्रह्मर्पणस्य नस्त्रएमात ॥ नप्रहृष्येदिति ॥ ब्रह्मवित्ब्रह्मणि स्थित : सर्वकर्मसंन्यासी स्थिरबुद्धि : सर्वभूतेषु आत्मबुद्धि : स्थिरायस्यस : असं
मूढ : मोहवर्जित : प्रियंप्राप्य नप्रहृष्येत चपुन : अप्रियंप्राप्य नउद्विजेत ॥ २० ॥ मोहनिवृत्या बुद्धिस्थैर्यं हेतुमाह ॥ बाह्यस्पर्शे ष्विति ॥ बाह्यस्पर्शे
ष्विति ॥ बाह्यस्पर्शेषु विषयेषु असक्तो अप्रीतमना : आत्मनि ब्रह्मणि यत्सुखं परमानंदं तद्गुणं विंदति लभते । सब्रह्मयोगयुक्तात्मा परब्रह्मणि समाधि
युक्त चित्त : आपित चित्त : अक्षयं सुखं अश्नुते ॥ २१ ॥ ननु प्रियविषयभोगानामपि निवृत्ते : कथं मोक्ष : पुरुषार्थ इत्याशंक्याह ॥ येहीति ॥ हियस्मात् येसं
स्पर्शजा विषयसंभोगजा भोगा : ते आद्यंतवंत : उत्पत्तिविनाशवंत : दु : खयोनय : एव दु : खहेतवः हे कौंतेय तेषु बुधः नरमते ॥ २२ ॥ जेयं चमो
क्षमार्गप्रतिबंधक : सर्वानर्थहेतु : दुर्निवारश्च कामक्रोधोद्भवोवेग : अतस्तन्निरोधे यत्नाधिक्यं कर्तव्यमित्याह ॥ शक्नोतीति ॥ य : पुमान् इहैवजी

वः

नप्रहृष्येत्प्रियंप्राप्य नोद्विजेत्प्राप्यचाप्रियं ॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थित : ॥ २० ॥ बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं ॥ सब्र
ह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥ येहि संस्पर्शजा भोगा दु : खयोनय एव ते ॥ आद्यंतवंत : कौंतेय नतेषु रमते बुधः ॥ २२ ॥ शक्नोतीहैव य : सो
ढुं प्राक्शरीरविमोक्षणात् ॥ कामक्रोधोद्भवं वेगं सयुक्त : ससुखी नर : ॥ २३ ॥ योंत : सुखोंतरारामस्तथांतर्ज्योतिरेव य : ॥ सयोगी ब्रह्मनिर्वाणं ब्र
ह्मभूतोऽधिगच्छति ॥ २४ ॥ लभंते ब्रह्मनिर्वाणमृषय : क्षीणकल्मषा : ॥ छिन्नद्वैधायतात्मान : सर्वभूतहितेरता : ॥ २५ ॥ रामराम राम रामरामराम

वन्नेव शरीरमोक्षणात प्राक् मरणात पूर्व कामक्रोधोद्भवं वेगं अनुभूते दृष्टे श्रुते स्मृते वा सुखहेतौ विषये या प्रीति : सकाम : वेग : तया दृष्टे श्रुते
स्मृते वा दु : खहेतौ विषये आत्मन : प्रतिकूलो यो द्वेष : स क्रोध : वेग : रोमांच हृष्ट नेत्रवदनलिंग : अंत : करणप्रक्षोभरूप : सकामो वेग : गात्रप्रकंप
स्वेदसंदष्टोष्ठपुटरक्तनेत्रादि लिंग : चित्त प्रक्षोभरूप : स क्रोधोद्भवो वेगस्तं कामक्रोधोद्भवो वेगं सोढुं शक्नोति सनर : युक्त : योगी सुखी च ॥ २३ ॥ कथं
भूत तर्ह्यब्रह्मणि स्थितो ब्रह्मप्राप्नोतीत्याह ॥ योंतरिति ॥ य : अंत : सुख : अंत : आत्मन्येवसुखं यस्य न विषयेषु अंत : तथारामः अंत : आत्मन्येवआराम : क्रीडा य
स्य न बहि : तथा य : अंत : ज्योति : अंत : आत्मन्येवज्योति : प्रकाशो यस्य न सर्पदीपादिः स योगी ब्रह्मस्वरूप : सन् ब्रह्मनिर्वाणं ब्रह्मनिर्वृतिं मोक्षं गच्छति
॥ २४ ॥ किं च लभंते इति ॥ ऋषय : सम्यक्दर्शिन : छिन्नद्वैधा : छिन्नसंशया : यतात्मान : संयतेंद्रिया : सर्वभूतहितेरता : कायवाङ्मनोभि : सर्वहित
कृत्येरता : ब्रह्मनिर्वाणं मोक्षं लभंते ॥ २५ ॥

दीलकं ... ॥

पु
स्तदैरूपमाप्न
त्या ह्यायस्पस
सर्वतीत्याद्वैत
प्राप्नोति
य
२

योगेषु विषये
फी
इवो

गीतासप्र॰
॥१८

किंच ॥ कामक्रोधेति ॥ कामक्रोधवियुक्तानां संन्यासिनां संयतांतःकरणानां अभितः उभयतः जीवतां मृतानां च ॥ ब्रह्मनिर्वाणं मोक्षो वर्त्तते विदिता
त्मनां आत्मविदां ॥२६॥ अथेदानीं ध्यानयोगं सम्यक्दर्शनस्यांतरंगं साधनं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानीयान् श्लोकान् उपदिशति ॥ स्प
र्शानिति ॥ बाह्यान् बहिर्भवान् स्पर्शान् विषयान् शब्दादीन् श्रोत्रादिद्वारेण बुद्धौ प्रवेशितान् अचिंतयन् बहिः कृत्वा च पुनः चक्षुः भ्रुवोरंतरे कृत्वा
इत्यनुषज्यते ॥ प्राणापानौ उच्छ्वासनिश्वासरूपौ नासाभ्यंतरचारिणौ समौ कृत्वा तद्व्यापारनिरोधेन कुंभयित्वा ॥२७॥ यो मुनिः यतेंद्रियमनोबुद्धिः संयता
नींद्रियाणि मनोबुद्धिश्च यस्य स मोक्षपरायणः मोक्ष एव परमा गतिर्यस्य सः विगतेच्छाभयक्रोधः इच्छाभयक्रोधरहितः यः एवं वर्त्तते संन्यासी स सदा
मुक्त एव ॥२८॥ एवं समाहितचित्तेन किं विज्ञेयमित्युच्यते भोक्तारमिति ॥ मां यज्ञानां तपसां कर्तृत्वेन देवतात्वेन च भोक्तारं सर्वलोकमहेश्वरं सर्व

कामक्रोधवियुक्तानां यतीनां यतचेतसां ॥ अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनां ॥२६॥ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः ॥
प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥२७॥ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥ भोक्तारं
यज्ञतपसां सर्वलोकमहेश्वरं ॥ सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ॥२९॥ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे संन्यासयोगो नाम पंचमोऽध्यायः ॥५॥ श्रीभगवानुवाच ॥ अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ॥ स संन्यासी च योगी च न निर
ग्निर्न चाक्रियः ॥१॥

लोकानां महेश्वरं तमीश्वरं ॥ सर्वभूतानां सुहृदं प्रत्युपकारनिरपेक्षतया उपकारिणं एवंविधं मां ज्ञात्वा शांतिं सर्वसंसारोपरतिं ऋच्छति प्राप्नोति ॥२९॥ ॥ विकल्पसंकल्पामोहे
इति पंचमोऽध्यायः ॥५॥ पंचमाध्यायांते ध्यानयोगस्य सम्यक्दर्शनं प्रति अंतरंगस्य साधनस्य सूत्रभूताः श्लोकाः स्पर्शान्कृत्वेत्यादयः उपदिष्टाः तेषां येनेवंसंरसयोगयो
वृत्तिस्थानीयोयं षष्ठोऽध्याय आरभ्यते ॥ तत्र सम्यक्दर्शनं प्रति संन्यासात् ध्यानयोगात् बहिरंगमपि कर्म ध्यानयोगारोहणसमर्थं न गृहस्थेन अ मधुद्रव्यं कर्मणोत
धिकृतेन तमारोढुं कर्त्तव्यमित्यतः तत् स्तौति ॥ अनाश्रित इति ॥ यः कर्मफलं अनाश्रितः कर्मफले निस्पृहः कार्यं नित्यनैमित्तिकं कर्म सर्वदेनामितंहारं
करोति ॥ च पुनः स संन्यासी च पुनः स योगी चित्तसमाधानयुक्तो ज्ञातव्यः ॥ च पुनः न निरग्निः न अग्निसाध्यक्रियारहितः च पुनः
न अक्रियः न स्मार्त्तक्रियारहितः ततः एवं स संन्यासी योगी च न भवति ॥१॥ तावत् ॥१८॥

दृष्टतापुरुषेल श्रौत

पृथक् कर्मफलसंकल्पसंन्यासात् संन्यासित्वं योगांगत्वेन कर्मानुष्ठानात् कर्मफलसंकल्पचित्तविक्षेपहेतोः परित्यागाद्वा योगित्वं चेति गौणमुभयं
न तु मुख्यं संन्यासित्वं योगित्वं चेति अभिप्रायं दर्शयितुमाह ॥ यं संन्यासमिति ॥ हे पांडव श्रुतिस्मृतिवादाः यं संन्यासं कर्मतत्फलत्यागलक्षणं परमा
र्थसंन्यासमिति प्राहुः ॥ तं योगं कर्मानुष्ठानलक्षणं परमार्थसंन्यासं विद्धि ॥ हि यस्मात् असंन्यस्तसंकल्पः अपरित्यक्तफलसंकल्पः कश्चन योगी
कर्म न भवति ॥२॥ ध्यानयोगस्य फलनिरपेक्षतया कर्मयोगः संन्यासपक्षतया विकिरंगसाधनमिति तं संन्यासत्वेन स्तुत्वा अधुना ध्यानयोगसाधनत्व
कर्मणो दर्शयति ॥ आरुरुक्षोरिति ॥ योगं आरोढुमिच्छतः मुनेः कर्मफलसंन्यासिनः कर्म तत्कारणं साधनमुच्यते ॥ पुनः तस्यैव योगारूढस्य शमः
कर्मोपरमः कारणमुच्यते ॥३॥ कदासौ योगारूढो भवति ॥ कीदृशः अपेक्षितस्तदुच्यते ॥ यदा हीति ॥ हि यस्मात् यदा नेन्द्रियार्थेषु शब्दादिविषये

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव । न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥२॥ आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगा
रूढस्य तस्यैव शमः कारणमुच्यते ॥३॥ यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥४॥ उद्धरेदा
त्मनात्मानं नात्मानमवसादयेत् । आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥५॥ बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥ अनात्म
नस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६॥

पुनः पुनः कर्मसु नित्यनैमित्तिककाम्यनिषिद्धेषु न अनुषज्जते ॥ कर्तव्यताबुद्धिं न करोति ॥ तदा सर्वसंकल्पसंन्यासी ॥ इहामुत्रार्थकामो त्यजन् (सर्वत्र)
य सर्वसंकल्पान् कुर्वाणः यस्य सः योगारूढः योगप्राप्त उच्यते ॥४॥ यदेवं योगारूढो भवति तदा आत्मनात्मानं संसारार्णवे समुद्धृतो भवतीत्या
ह उद्धरेदिति ॥ आत्मना आत्मानं संसारसागरे निमग्नं ततः उद्धरेत् योगारूढं तं प्रापयेत् ॥ आत्मानं न अवसादयेत् ॥ न अधो नयेत् ॥ हि यस्मात्
आत्मैव आत्मनो बंधुः हितकारी संसारमुक्तिहेतुर्भवति नान्यः ॥ आत्मैवात्मनः शत्रुः रिपुः योपि बाह्यः शत्रुः स आत्मापराधेनैव शत्रुत्वं भ
जते ॥ तत्र किंलक्षणः आत्मा आत्मनो बंधुः किंलक्षण वा आत्मा आत्मनो रिपुरिति तत् दर्शयति ॥ बंधुरिति ॥ तस्य आत्मनः आत्मा बंधुः
येन आत्मना आत्मैव देहेन्द्रियसंघातः जितः वशीकृतः अनात्मनः अजितदेहेन्द्रियसंघातस्य तस्य शत्रुवत् आत्मैव शत्रुत्वे वर्तेत ॥६॥

वर्तेत

गीतास॰ १२ जितात्मन: स्वस्मिन्नेव बंधुत्वं स्पष्टयति॥ जितात्मन इति॥ शीतोष्णसुखदु:खेषु तथा मानापमानयो:॥ मज्ञो नित्तबयो: समस्य जितात्मन:
जितदेहेंद्रियसंघातस्य प्रशांतस्य रागादिदोषरहितस्य॥ परमात्मा समाहित: स्वस्वरूपनिष्ठो भवति॥७॥ योगारूढस्य लक्षणं श्रेष्ठत्वं च प्रकटयन्नुप
संहरति॥ ज्ञानेति॥ ज्ञानविज्ञानतृप्तात्मा ज्ञानं आत्मविषयं॥ शास्त्रजनितविज्ञानं आत्मसाक्षात्काररूपं ताभ्यां तृप्त आत्मान्त:करणं य
स्य स: कूटस्थ: अप्रकंप्य: विजितेंद्रिय: समलोष्टाश्मकांचन: युक्त: युक्त समाहित सन् योगी कथ्यते॥८॥ सुहृन्मित्रादिषु समबुद्धि: ततोपि वि
हृष्यते॥ सुहृदिति॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्ता मित्रं स्नेहवत्॥ अरि: शत्रु: उदासी
नो न कस्यचित् पक्षं भजते॥ मध्यस्थो यो विरुद्धयोरुभयोरपि हितैषी॥ द्वेष्य आत्मनो ऽप्रिय: बंधु: संबंधी ख्यते॥ साधुषु च शास्त्रार्थानुवर्ति

जितात्मन: प्रशांतस्य परमात्मा समाहित:॥ शीतोष्णसुखदु:खेषु तथा मानापमानयो:॥७॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रिय:॥ यु
क्त इत्युच्यते योगी समलोष्टाश्मकांचन:॥८॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥ साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥९॥ यो
गी युंजीत सततमात्मानं रहसि स्थित: एकाकी यतचित्तात्मा निराशीरपरिग्रह:॥१०॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन:॥ ना
त्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं॥११॥

षु अपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धि: तेषां जातिचरित्रादिकं स्वरूपं अविचारयन्॥ समं ब्रह्मैव पश्यन् विशिष्यते श्रे
ष्ठो भवति॥९॥ एवं योगारूढस्य लक्षणं श्रेष्ठत्वं चोक्त्वा तस्य सर्वोत्तमफलप्राप्तये सांगं योगं विधत्ते योगी युंजीत सततं इत्यादि॥ योगी परमोपत:
ष्ठस्तेन कथं येन योगीति॥ एकाकी असहाय: संयतचित्तोऽन्त:करणं देहो यस्य स: जितात्मा निराशी: विगततृष्ण: योगी ध्यानवर्जं अपरिग्रह: रह
सि गिरिगुहादौ स्थित: आत्मानं अन्त:करणं युंजीत समाधियुक्तं कुर्यात्॥१०॥ अथेदानीं योगं युंजानस्य आसनआहारविहारादीनां योगसाध
नत्वेन नियमेन वक्तव्य:॥ आसननियमं तावत् प्रथममाह॥ शुचौ देशेति द्वाभ्यां॥ आत्मन: आसनं अत्युच्छ्रितं नातिनीचं चैलाजिनकुशो
त्तरं सर्वे कुशा तेषु मृदुपरि हस्ताजिनं तस्योपरि वस्त्रं एवंविधं स्थिरं आसनं शुचौ देशे प्रतिष्ठाप्य॥११॥ ॥ १९ ॥

तत्रासने उपविश्य यतचित्तेंद्रियक्रियः यता चित्तेंद्रियाणां क्रियाव्यापारा येन सः मनः एकाग्रं सर्वविषयेभ्यः उपसंहृत्य आत्मशुद्धये अंतःकरणशुद्ध्यर्थं
योगं कुर्यात् अभ्यसेत् ॥१२॥ चित्तैकाग्र्यम् योगिनो हि धारणां दर्शयति द्वाभ्यां समम् इति कायशिरोग्रीवं कायः शिरः ग्रीवा चाएत त्रयं समम् अव
क्रं अचलं क्रियारहितं धारयन् स्थिरो भूत्वा दिशश्च अनवलोकयन् नासिकाग्रं स्वमेव संप्रेक्ष्य ॥१३॥ प्रशांतात्मा प्रशांतं चित्तं विगतभीः निर्भयः ब्र
ह्मचारिव्रते ब्रह्मचर्यं गुरुशुश्रूषा ... जनादिकं स्थितः तदनुष्ठाता भवेत् किं च मनसो व्यापारं नियम्य मच्चित्तः मत्परायणः यु
क्तः समाधियुक्तः सन् तत्पर विरात् ॥१४॥ ... प्रापयते उच्यते युंजन्नेवम् इति योगी ध्यानवान् नियतमानसः संयतमनाः सदा आत्मान
एवं उक्तप्रकारेण युंजन् समाधिं कुर्वन् निर्वाणपरमां मोक्षरूपां शांतिं निर्वृतिं मत्संस्थां मदधीनां अधिगच्छति प्राप्नोति ॥१५॥ इदानीं योगिनः

॥तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः ॥ उपविश्यासने युंज्याद्योगमात्मविशुद्धये ॥१२॥ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ॥ संप्रे
क्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥१३॥ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ॥ मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥१४॥
युंजन्नेवं सदात्मानं योगी नियतमानसः ॥ शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥१५॥ नात्यश्नतस्तु योगोस्ति न चैकांतमनश्नतः ॥
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥ युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥ य
दा विनियतं चित्तमात्मन्येवावतिष्ठते ॥ निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥

आहारादिनियममुच्यते ॥ नात्यश्नत इति ॥ तु पुनः अत्यश्नतः आत्मीयआहारात् अधिकं भुंजानस्य योगो नास्ति च पुनः एकांतं अनश्नतः अभुं
श्री जानस्य वा योगो नास्ति तथा अतिस्वप्नशीलस्य अतिनिद्राशीलस्य अतिजाग्रतः नस्यैवार्जुन योगः समाधिर्नास्ति ॥१६॥ कथं तर्हि तस्य योगो भवति
इत्युच्यते ॥ युक्ताहारेति ॥ युक्ताहारविहारस्य आर्द्धयतः इत्याहारो ... नियतं ... चतुर्थं भागं पानीयस्य चतुर्थभागो वायुसंचरणस्य ए
वं चतुर्भागीकृत्य उदरं तस्य युक्त ॥ ... नियताहारः विहारः पादचंक्रमणं तदपि नियतं कर्मसु कार्येषु नियता चेष्टा यस्य युक्तः स्वप्नः निद्रा अवबोध
जागरणं तौ युक्तौ नियमितौ यस्य स तस्य संसारदुःखहा नाशकः योगो भवति ॥१७॥ अधुना कदा युक्तो भवतीत्युच्यते ॥ यदेति ॥
यदा नियतं विशेषेण संयतं वा ह्यचिंतादि त्यक्त्वा आत्मन्येव केवले अवतिष्ठते स्थिरं भवति किं च सर्वकामेभ्यः ऐहिकामुष्मिकभोगे
चिं भ्यः निःस्पृहः विगततृष्णो भवति तदा संयुक्तः समाहितचित्त इत्युच्यते ॥१८॥

गीतासटी० ॥२७॥

सचितस्य

योगिनस्तस्यैकाकारतया अवस्थितस्योपमानमाह ॥ यथा दीप इति ॥ यथा दीपः निवातस्थः नेङ्गते न चलति ॥ आत्मनो मनसः योगं यु
ञ्जतः समाधानं कुर्वतः ॥ यतचित्तस्य संयतमनसः योगिनो ध्यानवतः सा उपमा योगज्ञैः कथिता ॥१९॥ एवं योगाभ्यासवशात् एकाग्रीभू
तं निवातस्थदीपकल्पं चित्तं दिव्यरूपं निरूपयन् ॥ आत्मनोवस्थाविशेषं सुखं योगस्वरूपं निरूपयति ॥ यत्रोपरमतीति सार्धैस्त्रिभिः ॥ यत्र य
दा चित्तं योगसेवया योगानुष्ठानेन निरुद्धं सद् उपरमते निवारितव्यापारं उपरमते ॥ उपरतिं गच्छति ॥ च पुनः यत्र आत्मना समाधिपरिशुद्धेन अन्तः
करणेन आत्मानं परं चैतन्यज्योतिः स्वरूपं पश्यन् तस्मिन् आत्मनि तुष्टिं न जाते ॥२०॥ आत्मन्येव तोषहेतुमाह ॥ सुखमिति ॥ यत्र आत्यन्तिकं
निरवधि अतीन्द्रियं इन्द्रियव्यापारातीतं बुद्धिमात्रग्राह्यं केवलया इन्द्रियनिरपेक्षया बुद्ध्या ग्राह्यं ॥ तत्तदीदृशं सुखं यत्र यस्मिन्काले वेत्ति ॥ त

॥ यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ॥ योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥ यत्रोपरमते चित्तं निरुद्धं योगसे
वया ॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥२०॥ सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियं ॥ वेत्ति यत्र न चैवायं स्थितश्च
लति तत्त्वतः ॥२१॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ॥ यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥२२॥ तं विद्याद्दुःखसंयो
गवियोगं योगसंज्ञितं ॥ स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा ॥२३॥

स्मिन्नात्मस्वरूपे स्थितः ॥ अयं तत्त्वतः परमार्थस्वरूपात् न चलति ॥२१॥ किंच यं लब्ध्वेति ॥ च पुनः यं आत्मलाभं लब्ध्वा
परं लाभं ततोऽधिकं अस्तीति न मन्यते ॥ यस्मिन् आत्मतत्त्वे स्थितः गुरुणा महतापि दुःखेन शस्त्रपातादिजनितेन नापि न विचाल्यते ॥२२॥
एवं योगस्वरूपमुक्त्वा तस्य महाफलत्वं दर्शयन् तस्य यत्नेन कर्तव्यत्वमाह ॥ तं विद्यादिति ॥ तं योगसंज्ञितं दुःखसंयोगवियोगसंज्ञकं त
दुःखाभावरूपं विद्यात् ॥ अयमर्थः ॥ [illegible] योगः निश्चयेन निश्चितया बुद्ध्या अनिर्विण्णचेतसा [illegible] निरस्तेन चेतसा सोऽयं पुनः योक्तव्यः दुःख
शब्देन दुःखमिश्रं वैषयिकसुखमपि गृह्यते ॥ दुःखसंयोगेन स्पर्शमात्रेणापि वियोगो यस्मिन् तमवस्थाविशेषं योगसंज्ञितं यो
गशब्दवाच्यं जानीयात् परमात्मनि क्षेत्रज्ञयोजनं योगः ॥ यद्वा दुःखसंयोगेन वियोग एव शब्दः काका [illegible] लक्षणया योगश
ब्द्यते ॥ कर्मणि तु योगत्वात् तदुपायत्वात् औपचारिक इति भावः ॥२३॥ ॥२७॥

किंच। संकल्पेति। संकल्पप्रभवान् चेतसिकामानामवध्यानं संकल्पप्रभवो येषां हेतुस्तान् सर्वान् अशेषतः सवासनान् अभिलाषान् त्यक्त्वा विवेक
युक्तेन मनसैव इंद्रियग्रामं इंद्रियसमुदायं समंततः समंतात् विनियम्य उपरमेत॥२४॥ यदि तु प्राक्तनसंस्कारेण मनो विचलयेत् तर्हि धारणया
पुनः स्थिरीकुर्यादित्याह। शनैः शनैरिति। धृतिगृहीतया धैर्ययुक्तया बुद्ध्या शनैः शनैः उपरमेत उपरतिं गच्छेत्। उपरतिं कुर्यात्। मनः। मनः
आत्मसंस्थं आत्मनि निश्चलं स्थितं कृत्वा आत्मैव सर्वं ततोऽन्यत् किंचिदपि न चिंतयेत्॥२५॥ एवमपि रजोगुणवशात् यदि मनः प्रचलेत् तर्हि पुनः प्र
त्याहारेण वशी कुर्यादित्याह। यत इति। चंचलं अस्थिरं एतन्मनः यतः यतः यस्मात् शब्दादेर्निमित्तात् निश्चरति निर्गच्छति। ततः ततः निय
म्य नियम्य नष्टं कृत्वा आत्मन्येव वशं नयेत्॥२६॥ एवं प्रत्याहारादिभिः पुनः पुनः मनो वशी कुर्वतः रजोगुणक्षये योगसुखं प्राप्नोतीत्याह। प्रशांते

संकल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः। मनसैवेंद्रियग्रामं विनियम्य समंततः॥२४॥ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्म
संस्थं मनः कृत्वा न किंचिदपि चिंतयेत्॥२५॥ यतो यतो निश्चरति मनश्चंचलमस्थिरं। ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥२६॥ प्रशां
तमनसं ह्येनं योगिनं सुखमुत्तमं। उपैति शांतरजसं ब्रह्मभूतमकल्मषं॥२७॥ युंजन्नेवं सदात्मानं योगी विगतकल्मषः। सुखेन ब्रह्म
संस्पर्शमत्यंतं सुखमश्नुते॥२८॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥२९॥ प्रशांतम

ति। हि यस्मात् एनं योगिनं प्रशांतमनसं शांतरजसं प्रक्षीणमोहादिक्लेशरजसं। ब्रह्मभूतं जीवन्मुक्तं अकल्मषं पापपुण्यरहितं उत्तमं निरतिशय
सुखं उपैति प्राप्नोति॥२७॥ ततश्च कृतार्थो भवतीत्याह। युंजन्निति। एवं यथोक्तप्रकारेण सदा सर्वदा आत्मानं मनः करणं युंजन् समाधियुक्तं कु
र्वन् विगतपापः योगी योगांतरायवर्जितः सुखेन अनायासेन ब्रह्मसंस्पर्शं ब्रह्मस्वरूपस्थं अत्यंतं निरतिशयं सुखं अश्नुते। प्राप्नोति।
२८॥ इदानीं योगस्य फलभूतमैकात्म्यदर्शनं सर्वसंसारविच्छेदकारणं दर्शयति। योगयुक्तात्मा समाधियुक्तांतःकरणः सर्वभूतस्थं
सर्वेषु भूतेषु ब्रह्मादिस्थावरांतेषु विषयेषु समं निर्विशेषं ब्रह्मात्मैकत्वेनात्मानं पश्यति। च पुनः सर्वभूतानि आत्मनि पश्यति। सर्व
त्र समदर्शनः॥२९॥

एतस्य आत्मैकत्वदर्शनस्य फलं दर्शयति ॥ यो मामिति ॥ यः मां सर्वस्य आत्मानं सर्वेषु भूतेषु पश्यति ॥ सर्वं च ब्रह्मादि भूतजातं मयि विश्वात्म
नि पश्यति ॥ तस्याहं एवं आत्मैकत्वदर्शिनः अहमीश्वरो न प्रणश्यामि ॥ न परोक्षतां गमिष्यामि स च विद्वान् मम वासुदेवस्य न प्रणश्यति ॥ न परोक्षो
भवति तस्य च मम च एकात्मकत्वात् ॥३०॥ सर्वेषां कार्यं तत्सम्यग्दर्शनं अनूद्य तत्फलं मोक्षो विधीयते ॥ तत्र प्रतिबंधराहित्यं दर्शयति ॥ सर्वभूत
स्थितमिति ॥ यः सर्वभूतस्थितं मां एकत्वेन आस्थितः सर्वत्र अभेदबुद्ध्या भजते ॥ स योगी सम्यक्दर्शी सर्वथा सर्वप्रकारैः कर्मणा कर्मत्या
गेन वा मयि वैष्णवे परे पदे वर्तमानो न केनचित् प्रतिबध्यते इत्यर्थः ॥३१॥ तानिनापि सर्वभूतानुकंपां प्राह इत्याह ॥ आत्मौपम्येनेति ॥
हे अर्जुन यः सर्वत्र सर्वेषु भूतेषु सुखं वा यदि वा दुःखं आत्मौपम्येन आत्मा स्वयमेवोपमा उपमायाः भाव औपम्यं तेन समं पश्यति ॥ य

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥ सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥३१॥ आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ॥ सुखं वा यदि वा दुःखं स योगी परमो मतः ॥
३२॥ अर्जुन उवाच ॥ योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ॥ एतस्याहं न पश्यामि चंचलत्वात् स्थितिं स्थिरां ॥३३॥ चंचलं हि मनः कृष्ण
प्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरं ॥३४॥

तस्य आत्मनः सुखकारि तत् अन्यस्य करोति ॥ यत् आत्मनः असुखकारि तत् अन्यस्य न करोति स योगी परमो मतः ॥३२॥ सर्वयोगिनामपि एत
स्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसंपाद्यतां आलक्ष्य तत्प्राप्त्युपायं विविदिषुः अर्जुनः अर्जुन उवाच ॥ योऽयमिति ॥ हे मधुसूदन
त्वया योऽयं योगः साम्येन समत्वबुद्ध्या प्रोक्तः ॥ अहं एतस्य योगस्य मनसः चंचलत्वात् स्थिरां अचलां स्थितिं न पश्यामि ॥३३॥ एतदेव स्फु
टयति ॥ चंचलमिति ॥ हि यस्मात् मनः चंचलं प्रमाथि शरीरं इंद्रियाणि च प्रमथ्नाति परवशानि करोति बलवत् न केनचित् नियंतुं शक्यं
किंच दृढं तंतुनागवत् तंतुनागः तिलमद्रजीवविशेषः तद्वत् ॥ अहं तस्य एवंभूतस्य मनसः निग्रहं निरोधं वायोरिव सुदुष्करं मन्ये ॥ ॥२१॥
यथा वायोः दुःकरो निग्रहः ततोऽपि दुःकरं मन्ये इत्यभिप्रायः ॥३४॥

उक्ताधिकारदेहिनां श्रद्धा मुख्या तु सात्विकी इति सप्तदशेऽध्याये श्रद्धाभेदस्त्रिधोच्यते १

+तु स्मात् तु शास्त्रविधानोक्तं कर्म कर्तुमर्हसि + +पुनरुक्तिस्मृतिलक्षणं +

ज्ञानाधिकारे भूतानां सात्विकी श्रद्धा पुरुषो हेतुरिति निर्णेतुं त्रिधा श्रद्धा सप्तदशेन निरूप्यते ॥ तत्र षोडशाध्याये तेकामकारेण वर्तमानस्य ज्ञाने अधिकारो।
नास्ति यथाशास्त्रं प्रवर्तमानस्य अधिकारोऽस्तीत्युक्तं ॥ तत्र ये शास्त्रविधिमुत्सृज्य कामकारं विना श्रद्धया वर्तमानानां किं अधिकारोऽस्ति न वेति संदिहानो
ऽर्जुन उवाचेति ॥ ये तु शास्त्रविधिमुत्सृज्य यजंते इत्यनेन ये शास्त्रार्थमुक्तं बुधानम् द्वेष्य वर्तमानं निहंते ॥ नास्तिकबुद्धिर्हि श्रद्धानवशात् शास्त्रार्थानु
द्वेष्य वर्तमानस्य सा तेन वर्तीत्याह ॥ युक्तास्मिनिति ॥ तस्माच्छास्त्रं प्रमाणं इति भगवद्वाक्यात् पूर्वोऽजोऽर्जुन उवाच ॥ हे कृष्ण तु पुनः ये कृतिस्मृतिलक्षणं किं चि श्रद्धा॰
त् शास्त्रविधिमुत्सृज्य तः वृद्धव्यवहारदर्शनादेव श्रद्धया नत यास्त्यास्तिक्यबुद्ध्यासंयुक्ताः येदेवादीन् यजयंति ॥ तेषां एवं भूतानां का निष्ठा किं सत्वं अवस्था
नं तु तरजः तमः देवादीनां भजनं किं सात्विकी राजसी तामसी चेत्यर्थः ॥ १ ॥ श्रद्धात्रैविध्यं वदन् श्रीभगवानुत्तरमाह ॥ त्रिविधेति ॥ तस्याः श्रद्धायाः
त्रिधा अवस्थानं त्वेव ॥ सा श्रद्धा देहिनां त्रिधा भवति ॥ स्वभावजा ॥ जन्मांतरकृतधर्मादिसंस्कारो मरणकाले अभिव्यक्तः सोऽयं तः स्वभावस्तु

॥ अर्जुन उवाच ॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः ॥ तेषां निष्ठा तु का कृष्ण सत्वमाहो रजस्तमः ॥ १ ॥ श्रीभगवानुवाच ॥ त्रिविधा भवति
श्रद्धा देहिनां सा स्वभावजा ॥ सात्विकी राजसी चैव तामसी चेति तां शृणु ॥ २ ॥ सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत ॥ श्रद्धामयोऽयं पुरुषो
यो यच्छ्रद्धः स एव सः ॥ ३ ॥ यजंते सात्विका देवान् यक्षरक्षांसि राजसाः ॥ प्रेतान् भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥ राम राम राम राम राम रामरामराम

च्यते ॥ तस्मात् ज्ञाता स्वभावजा सात्विकी देवादिभजनविषया ॥ राजसी यक्षरक्षःभजनविषया तामसी प्रेतपिशाचादीनां भजनविषया ॥ एवंविधां श्रद्धां उच्यमा
नां शृणु ॥ २ ॥ श्रद्धायाः सत्वं तु तेषामपि अंतःकरणस्य रजस्तमोमिश्रत्वेन त्रैविध्यात् श्रद्धाया अपि त्रैविध्यमाह ॥ सत्वानुरूपेति ॥ हे भारत सर्वप्राणिजा
तस्य सत्वानुरूपं विशिष्टसंस्कारोपेतांतःकरणरूपा श्रद्धा आस्तिक्यबुद्धिर्भवति ॥ अयं संसारी पुरुषो जीवः श्रद्धामयः श्रद्धाबहुलः यो यादृश्या श्रद्धया
युक्तः स एव तत् श्रद्धानुरूपः एव भवति ॥ ३ ॥ देवपूजादिकार्यलिंगेन सत्वादिनिष्ठा अनुमेयेत्याह ॥ यजंत इति ॥ सात्विका देवान् यजंते ॥
ते प्रजयंति राजसा यक्षरक्षांसि प्रजयंति ॥ अन्ये तामसा जनाः प्रेतान् भूतगणान् सप्तमातृकादीन् यजंते ॥ ४ ॥ राम राम राम राम रामराम रामराम

गीताम०
॥५१॥

रजस्तमोनिष्ठानां बाहुल्यं वदन्स्तेषां विशेषमाह ॥ अशास्त्रेति ॥ येजनाः दंभाहंकारसंयुक्ताः कामरागबलान्विताः कामरागजनितबलेनान्वि
ताः अशास्त्रविहितं घोरं प्राणिनां आत्मनश्चापि उग्रं तपः तप्यंते ॥५॥ अचेतसः अविवेकिनः शरीरस्थं भूतग्रामं इंद्रियसमुदायं च अन्नमयं तं हृद्बुद्धि
साक्षिभूतं अंतःशरीरस्थं कर्शयंतः कृशी कुर्वंतः ये वर्तंते तान् आसुरनिश्चयान् जानीहि ॥६॥ आहारादिभेदादपि सात्विकादिभेदं दर्शयितुं ॥
सात्विकं च नयाः दानं आहारादि त्रैविध्यमाह ॥ आहारस्त्वपीत्यादि त्रयोदशभिः चपुनः सर्वस्य जंतोः आहारोपि प्रियः त्रिविधो भवति ॥ तथा
यज्ञस्तथा तपः तथा दानं एतत् त्रयमपि त्रिविधं भवति ॥ तेषां आहारादीनां भेदं इमं वक्ष्यमाणं शृणु ॥७॥ तत्र सात्विकाहारमाह ॥ आयुरिति ॥ ये
आहाराः तृप्तयुक्ताः आयुसत्वबलारोग्यसुखप्रीती नाम एषां विवर्द्धनाः रस्याः रसोपेताः स्निग्धाः स्नेहवंतः स्थिराः देहे चिरकालस्थायिनः हृद्याः

॥ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः ॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥५॥ कर्शयंतः शरीरस्थं भूतग्राममचेतसः ॥ मां चैवां
तःशरीरस्थं तान् विध्यासुरनिश्चयान् ॥६॥ आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ॥ यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥७॥ आयुः
सत्वबलारोग्यसुखप्रीतिविवर्द्धनाः ॥ रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ॥८॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥९॥ यातयामं गतरसं पूति पर्युषितं च यत् ॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं ॥१०॥ अफला
कांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते ॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः ॥११॥ रामराम रामरामराम रामरामराम रामराम रामरामराम रामराम

१ हृद्यप्रियाः सात्विकस्येते प्रियाः ॥८॥ कटु अम्ल लवण अत्युष्ण तीक्ष्ण रूक्ष विदाहिनः अतिकटु अम्ल अतिशब्दः प्रत्येकं संबध्यते ॥ इतिसप्त॥
विधाः आहाराः राजसस्येष्टाः प्रियाः एते प्रियाः ते च भुक्ताः संतः दुःखशोकामयान् प्रयच्छंति ॥९॥ तामसाहारमाह ॥ यातयाममिति ॥ यत् अन्नं
भोजनं यातयामं मंदपक्वं गतरसं रसायुक्तं पूति दुर्गंधि पर्युषितं पक्वं सत् रात्र्यंतरितं ॥ च अन्यत् यत् उच्छिष्टमपि भुक्तावशिष्टं अमेध्यं च अय
ज्ञार्हं यद्दृष्टं भोजनं तामसस्य प्रियं स्यात् ॥१०॥ अथ यज्ञस्य त्रैविध्यं सात्विकं यज्ञमाह ॥ अफलेति ॥ यो यज्ञः अफलाकांक्षिभिः फलकामना
रहितैः पुरुषैः मनः समाधाय ॥ यष्टव्यमेवेति ॥ बुद्ध्या निश्चित्य विधिदृष्टः वेदवाक्यविहितत्वात् इज्यते ॥ स सात्विको यज्ञ उच्यते ॥११॥

यज्ञः
॥५१॥

...फलमुद्दिश्य अपि च दंभार्थं यत् इज्यते ॥ तं यज्ञं राजसं विद्धि ॥१२॥ तामसं यज्ञमाह ॥ विधिहि
॥ राजसं यज्ञमाह ॥ अभिसंधायेति ॥ हे भरतश्रेष्ठ तु पुनः फलं अभिसंधाय फलमुद्दिश्य अपि च दंभार्थं यत् इज्यते ॥ असृष्टान्नं मंत्रहीनं मंत्रैः स्वरतो वर्णतश्च हीनम्
मिति ॥ विधिहीनं यथाशास्त्रविहितविपरीतं असृष्टान्नं ब्राह्मणेभ्यो न दत्तमन्नं चतुर्विधं यस्मिन् यज्ञे तत् असृष्टान्नं मंत्रहीनं मंत्रे स्वरतो वर्णतश्च हीनम्
दक्षिणारहितं दक्षिणारहितं श्रद्धाविरहितं श्रद्धया आस्तिक्यबुद्ध्या रहितं तं यज्ञं तामसं तमोगुणेन निष्पन्नं परिचक्षते ॥१३॥ तपसः सात्विकादिभेदं
दर्शयितुं प्रथमं शारीरादिभेदेन तस्य त्रैविध्यमाह ॥ देवद्विजेति ॥ देवद्विजगुरुप्राज्ञानां पूजनं शौचमार्जवं ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥ वाचिकं तप आह ॥ अनुद्वेगेति ॥ अपुनः पतनस्य तु
श्रौ ब्रह्मचर्यं प्राणिनामहिंसा ॥ एतत्सर्वं देहमुख्यैः इंद्रियात्मभिर्निर्वृत्तैः साध्यं शारीरं तपः उच्यते ॥१४॥ वाचिकं तप आह ॥ अनुद्वेगेति ॥ अपुनः
उद्वेगकरं प्राणिनामदुःखकरं सत्यं यथार्थं प्रियहितं प्रियं श्रोतुः सुखकरं हितं परिणामे सुखकारी ॥ दृष्टार्थे सुखकारी ॥ अदृष्टार्थे न कारी ॥ एवंविधं यत् अनुद्वेग
अवान्तरकृत्य मिते

॥ अभिसंधाय तु फलं दंभार्थमपि चैव यत् ॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥१२॥ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं ॥ श्रद्धाविरहितं
यज्ञं तामसं परिचक्षते ॥१३॥ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥१४॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं
च यत् ॥ स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥ मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ॥ भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ॥ अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते ॥१७॥

वाक्यं चैकं च पुनः स्वाध्यायाभ्यसनं वेदाध्ययनं यथोक्तं द्वितीयः वाङ्मयं तप उच्यते ॥१५॥ मानसं
करत्वात् चतुर्थं विहितं वाक्यं वाङ्मयं तप उच्यते ॥ नए कौकं ॥ च पुनः स्वाध्यायाभ्यसनं वेदाध्ययनं ... मनसंयम पूर्वकं सर्वतो निरोधः मनो
तप आह ॥ मनःप्रसाद इति ॥ मनःप्रसादः चित्तनैर्मल्यं सौम्यत्वं सौमनस्यता मौनं वाक्संयमः ॥ असत्याभाषणमित्यर्थः ॥ मनसंयम ... इति चेदः
आत्मविनिग्रहः ॥ वाग्विषयस्य मनसः नियतो मौनं अन्यत्र सर्वतः सामान्यरूपेण ... आत्मकः मनोनिग्रहः आत्मविनिग्रहः ॥ इति भेदः
...भावसंशुद्धिः एतत् एवंविधं तपो मानसमुच्यते ॥१६॥ तस्य शारीरादिभेदेन त्रिविधस्यापि तपसः सात्विकादिभेदं
... च भावसंशुद्धिः ... त्रिविधं तपः अफलाकांक्षिभिः फलाकांक्षारहितैः युक्तैः मनःसमाधानयुक्तैः नरैः अनुष्ठितं
त्रैविध्यमाह ॥ सात्विकं तप आह ॥ श्रद्धयेति ॥ तत् यथोक्तं कायिकं मानसं च त्रिविधं तपः ... अनुष्ठितं सात्विकं सत्त्वगुणेन निष्पन्नं परिचक्षते कथयंति ॥१७॥ रामराम राम राम राम रामराम रामराम
तप्तं ॥ परया उत्कृष्टया श्रद्धया आस्तिक्यबुद्ध्या अनुष्ठितं
वाचिकं

राजसंतपउदाहृतं ॥ सत्कारइति ॥ यत्तपः सत्कारः साधुवादः मानोमा ननंप्रत्युत्थानाभिवादनादिपूजालपर्याएत ‌अर्थार्थं चपुनदंभेनधर्मध्वजितयाक्रियते ॥
तत्इह लोकेराजसंचलंविनाशिफलंअध्रुवंक्षणिकफलंतंतपः प्रोक्तं ॥ १८ ॥ तामसंतपउदाहृतं ॥ मूढेति ॥ यत्तपः मूढग्राहेणअविवेकनिश्चयेनआत्म
नःपीडया स्वस्यशरीरस्य क्लेशेन अथ वापरस्यउत्सादनार्थंविनाशार्थंक्रियतेतत्तपःतामसंउदाहृतं ॥ १९ ॥ सर्वंप्रतिज्ञातंदानस्य त्रैविध्यंवक्तव्यं
सात्विकंदानमाह ॥ दातव्यमिति ॥ यद्दानंदेशेकुरुक्षेत्रादौकालेसंक्रात्यादौपात्रेवेदवेदार्थविदि अनुपकारिणेप्रत्युपकारासमर्थायनिरपेक्षतयादा
तव्यमेवेति ॥ बुद्ध्यादीयतेतद्दानंसात्विकंस्मृतं ॥ २० ॥ राजसंदानमाह ॥ यत्त्विति ॥ यत्पुनः यद्दानंप्रत्युपकारार्थंप्रत्युपकारबुद्ध्याचपुनःफलंकर्मफल
मुद्दिश्यपरिक्लिष्टंयदसंपुष्टदीयते ॥ तद्दानंराजसंउदाहृतं ॥ २१ ॥ तामसंदानमाह ॥ अदेशेति ॥ यद्दानंअदेशेअपुण्येम्लेच्छादिसंकीर्णेअकालेसंक्रा

॥ सत्कारमानपूजार्थंतपोदंभेनचैवयत् ॥ क्रियतेतदिहप्रोक्तंराजसंचलमध्रुवं ॥ १८ ॥ मूढग्राहेणात्मनोयत्पीडयाक्रियतेतपः ॥ परस्योत्सा
दनार्थंवातत्तामसमुदाहृतं ॥ १९ ॥ दातव्यमितियद्दानंदीयतेनुपकारिणे ॥ देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतं ॥ २० ॥ यत्तुप्रत्युपकारार्थं
फलमुद्दिश्यवापुनः ॥ दीयतेचपरिक्लिष्टंतद्दानंराजसंस्मृतं ॥ २१ ॥ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते ॥ असत्कृतमवज्ञातंतत्तामसमुदाहृ
तं ॥ २२ ॥ ॐतत्सदितिनिर्देशोब्रह्मणस्त्रिविधःस्मृतः ॥ ब्राह्मणास्तेनवेदाश्चयज्ञाश्चविहिताःपुरा ॥ २३ ॥ तस्मादोमित्युदाहृत्ययज्ञदान
तपःक्रियाः ॥ प्रवर्तंतेविधानोक्ताःसततंब्रह्मवादिनां ॥ २४ ॥

त्यादिपुण्यकालविशेषरहितेअपात्रेभ्यःसर्वतस्करउवचनानाचोरेभ्यः देशादिसंपत्तावपिअसत्कृतंप्रियवचनपादप्रक्षालनपूजादिरहितंअवज्ञातं
पात्रपरिभवयुक्तंदीयतेतत्तामसंउदाहृतं ॥ २२ ॥ यज्ञदानतपसांतीनांराजसतामसत्यागेनसात्विकत्वकारणंउपदेशमाह ॥ ॐतत्सदिति ॥ ॐतत्स
दितिब्रह्मणःत्रिविधःत्रिःप्रकारःनिर्देशःनिर्दिश्यतेयेननिर्देशः वेदांतेषुब्रह्मविद्भिःस्मृतः चिंतितस्तेनत्रिविधेननिर्देशेनब्रह्मणावेदाश्चयज्ञा
श्चपुरासर्गेनिर्मिताः ॥ २३ ॥ ब्राह्मणास्त्वेपुनेनब्रह्मणानिर्मितत्वात्सात्विकाएवनतुराजसइत्यर्थः ॥ इदानींप्रत्येकंओंकारादीनांप्राशस्त्यदर्शय
न्ओंकारस्यतावत्स्याह ॥ तस्मादिति ॥ तस्मात्ओंइत्युदाहृत्यब्रह्मवादिनांब्रह्मवदनशीलानांयज्ञदानतपोरूपाःक्रियाःविधानोक्ताःयथाशास्त्रंवि

रजस्तमोमयीं त्यक्त्वा श्रद्धां सत्वमयीं श्रितः तत्वज्ञानेऽधिकारी स्यादिति सप्तदशे स्थितं १

द्वितीयनामस्तौति॥ तदिति॥ मोक्षकांक्षिभिः मुमुक्षुभिः यज्ञतपःक्रियाः च अन्यत विविधाः दानक्रियाः फलं अनभिसंधाय तदिति ब्रह्मणोऽभिधानं उच्चार्य क्रियंते।
॥२५॥ सच्छब्दस्य विनियोगमाह॥ सद्भाव इति॥ हे पार्थ असतो अविद्यमानस्य पुत्रादेः सद्भावे साधो असच्चरित्रस्य सद्वृत्तत्वे सत् एतत् ब्रह्मणोऽभिधानं प्रयुज्य
ते॥ उच्यते। तथा प्रशस्ते कर्मणि विवाहादौ सच्छब्दः प्रयुज्यते॥२६॥ यज्ञे यज्ञकर्मणि या स्थितिः तपसि च दाने च या स्थितिः सा सत् इति विद्वद्भिः उच्यते।
च अन्यत तदर्थीयं यज्ञदानतपोर्थं कर्म तत् स्थितेव सत् अभिधीयते। अथवा त्रयाणां शब्दानां तत् सदिति तेषां शब्दानामयमर्थः ब्रह्मतत्त्वं तदर्थीयं ईश्वरार्थी
यं कर्म तदपि सत् इति उच्यते॥२७॥ इदानीं सर्वकर्मवैगुण्यं येन परिहरन्ति अर्थम् अश्रद्धाकृतं सर्वं निंदति॥ अश्रद्धयेति॥ यत् अश्रद्धया अग्नौ हुतं दत्तं ब्राह्मणेभ्यः

॥ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः॥ दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः॥२५॥ सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते॥ प्रशस्ते क
र्मणि तथा सच्छब्दः पार्थ युज्यते॥२६॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते॥२७॥ अश्रद्धया हुतं दत्तं
तपस्तप्तं कृतं च यत्॥ असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह॥२८॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
कर्मयोग विभागयोगो नाम सप्तदशोऽध्यायः॥१७॥ अर्जुन॥ संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं॥ त्यागस्य च हृषीकेश पृथक् केशिनिषूदन॥१॥ राम

स्तु चांद्रायणादि तपस्तप्तं कृतं च यत् अन्यदपि अश्रद्धया स्तुतिनमस्कारादि कृतं॥ तत् सर्वं असदिति असाधु उच्यते॥ तद्धि कृतमपि प्रेत्य परलोके फ
लाय न भवति॥ न च इह लोके यशसे भवति साधुभिर्निंदितत्वात्॥२८॥ इति सप्तदशोऽध्यायः॥ १७ ॥ सकलवेदार्थसकलगीतार्थः सप्तदशाभिः अध्या
यैर्निरूपितः स सर्वोऽपि संक्षिप्य अस्मिन् अष्टादशाध्याये निरूप्यते। न तु सर्वकर्मणामपि संन्यासं संन्यासयोगयुक्तेत्यादिषु कर्मसंन्यासमुपदिष्टं॥
तथा त्यक्त्वा कर्मफलासंगं सर्वकर्मफलत्यागं कुरु इत्यादिषु फलमात्रत्यागेन कर्मानुष्ठानमुपदिष्टं॥ तत्र संन्यासत्यागशब्दार्थयोः परस्परवि
रुद्धतया समानतया वा विरुद्धतया अत्र वा के तयोर्विशेषं बुभुत्सुः अर्जुन उवाच॥ संन्यासस्येति॥ हे महाबाहो हे हृषीकेश हे केशिनिषूदन॥ संन्यास
स्य। संन्यासशब्दार्थतत्त्वं यथा त्यक्त्वा चकारमत त्यागस्य तत्त्वं यथा तत्त्वं॥ पृथक् अन्योन्यविभागेन वेदितुं इच्छामि॥१॥ रामरामरामरामरामरामराम स

न्यासत्यागविभागेन सर्वगीतार्थसंग्रहं स्फुटं अष्टादशे प्राह परमार्थविनिर्णयं १

नकर्मलाभ

गीतालहरी० तन्निर्णयाय भगवान् ॥ श्रीभगवानुवाच ॥ काम्यानामिति ॥ केचित्कवयः पंडिताः काम्यानां अश्वमेधादीनां कर्मणां न्यासं कर्तृत्वेन प्राप्तानां प्रकरणेन संन्यास
॥५३॥ न्यासशब्दार्थं विदुः विचक्षणाः केचिदमेधाविनः सर्वकर्मफलत्यागं सर्वकर्मणां नित्यनैमित्तिकानां क्रियमाणानां आत्मसंबंधितया प्राप्तस्य फलस्य
त्यागशब्दार्थं प्राहुः ॥ २ ॥ अविदुष फलमात्रमेव त्यागशब्दः त्यागः इत्येतदेव मतांतरनिरासेन दृढीकर्तुं मतांतरेण दर्शयति ॥ सर्वात्मना सांख्यमतेन
तराहुर्मनीमासकमते ॥ त्याज्यमिति ॥ एके मनीषिणः सांख्याः सकलमपि कर्म दोषवत् दोषसंयुक्तं इति कारणात् त्याज्यं प्राहुः ॥ अथवा दोषवदि
तिदृष्टांतः यथा दोषस्त्याज्यः तथा सकलं कर्म त्याज्यं सांख्याः एव प्राहुः ॥ अपरे मीमांसकाः यज्ञदानतपः कर्म न त्याज्यमित्याहुः ॥ ३ ॥ एवं मतभेदेन त्रुप
न्यस्य स्वमतं कथयितुमाह ॥ निश्चयमिति ॥ हे नरसत्तम तत्र त्यागे त्यागसंन्यासविकल्पे मम निश्चयं शृणु ॥ त्यागो हि त्यागसंन्यासशब्दार्थो हि ह

॥ श्रीभगवानुवाच ॥ काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ २ ॥ त्याज्यं दोषवदित्येके कर्म प्राहुर्मनी
षिणः ॥ यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ ३ ॥ निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ॥ ४ ॥ यज्ञ
दानतपःकर्म न त्याज्यं कार्यमेव तत् ॥ यज्ञो दानं तपश्चैव पावनानि मनीषिणां ॥ ५ ॥ एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च ॥ कर्तव्यानी
ति मे पार्थ निश्चितं मतमुत्तमं ॥ ६ ॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते ॥ मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥ राम राम राम ॥

एक एव सन् सत्त्वादिभिस्त्रिभेदैः त्रिविधः संप्रकीर्तितः शास्त्रेषु कथितः ॥ ४ ॥ प्रथमं तावन्नियममाह ॥ यज्ञ इति ॥ यज्ञो दानं तपः कर्म त्याज्यं न त्का
र्यं करणीयमेव तत् यस्मात् यज्ञो दानं तपः एतानि त्रीणि मनीषिणां फलकामनारहितानां पावनानि चित्तविशुद्धिकराणि ॥ ५ ॥ तेषां पावनत्वप्रकारमा
ह ॥ एतानीति ॥ तु पुनः हे पार्थ एतानि यज्ञदानतपांसि कर्माणि तेषु कर्मसु संगं आसक्तिं प्रीतिं त्यक्त्वा फलानि च त्यक्त्वा कर्तव्यानि ॥ एवमिति
मे मम निश्चितं उत्तमं मतं ॥ ६ ॥ इति ज्ञानेन त्यागत्रैविध्यं अनधिकारिणे तस्य मतमुत्कृष्टं दर्शयति ॥ नियतस्येति त्रिभिः ॥ तु पुनः नियतस्य कर्मणः संन्या
सः त्यागः नोपपद्यते न घटते ॥ तस्य पावनत्वेन इष्टत्वात् ॥ तस्य मोहात्परित्यागस्तामसः परिकीर्तितः ॥ ७ ॥ रामराम राम राम राम राम राम राम ॥ ॥५३॥

॥राजसंत्यागमाह॥ दुःखमिति॥ यत्कर्म दुःखात्मकमित्येव बुद्ध्या कायक्लेशभयात्त्यजेत् त्यागं करोति। स राजसस्त्यागः पुमान्तं राजसं त्यागं
कृत्वा त्यागफलं मोक्षाख्यं न लभते॥८॥ सात्त्विकं त्यागमाह॥ कार्यमिति॥ हे अर्जुन यत्कर्म संगं प्रीतिं फलं च त्यक्त्वा कार्यं कर्तव्यमित्येव बुद्ध्या।
नियतं नित्यं कर्म क्रियते स त्यागः नित्यकर्मणि संगफलत्यागः सात्त्विको मतः॥९॥ एवं तस्यैव नित्यकर्मानुष्ठानेन विशुद्धान्तःकरणस्या
त्मज्ञानविरुद्धस्य सर्वकर्मत्यागे यथा ज्ञाननिष्ठा स्यात् तत्प्रकारमाह॥ न द्वेष्टीति॥ त्यागी कर्मसु संगफलत्यागवान्॥ सत्त्वसमाविष्टः सत्त्वेन आत्मा
नात्मविवेकज्ञानेन तु समाविष्टः संयुक्तः अतएव मेधावी मेधया आत्मतत्त्वलक्षणया प्रज्ञया युक्तः अतएव छिन्नः अविद्याकृतः संशयो यस्य सः॥ छिन्न
संशयः अतः सम्यक् अकुशलं अशुभं काम्यकर्म संसारकारणं न द्वेष्टि। कुशले शुभे नित्ये कर्मणि सत्त्वबुद्धिज्ञानोत्पत्तिद्वारेण मोक्षसाधनेन अनु

॥दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत्॥ स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्॥८॥ कार्यमित्येव यत्कर्म नियतं क्रियते
ऽर्जुन॥ संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः॥९॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते॥ त्यागी सत्त्वसमाविष्टो मेधावी छिन्न
संशयः॥१०॥ न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥११॥ अनिष्टमिष्टं मिश्रं च त्रिविधं क
र्मणः भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥१२॥
फलं

षज्जते प्रीतिं न करोति॥१०॥ यस्तु देहात्माभिमानवान् तस्य कर्मफलत्यागेन कर्मानुष्ठाने अधिकारो न कर्मत्याग इत्येतमर्थं दर्शयितुमाह॥ न ही
न शक्यं ति॥ हि यस्मात् देहभृता देहाभिमानवता कर्माण्यशेषतः निःशेषेण त्यक्तुं तस्मात् यः नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्माभिसंधिमा
त्रसंन्यासी स कर्मी अपि सन् त्यागी इत्यभिधीयते॥११॥ एवंभूतस्य कर्मफलत्यागस्य फलमाह॥ अनिष्टमिति॥ अनिष्टं नरकतिर्यगादिलक्षणं। इष्टं
देवादिलक्षणं मिश्रं इष्टानिष्टसंयुक्तं मानुष्यलक्षणं एवं त्रिविधं त्रिप्रकारं कर्मफलं अत्यागिनां असंन्यासिनां कर्मिणां अपरमार्थसंन्यासिनां प्रेत्य।
शरीरपाता[illegible]दूर्ध्वं एवंविधं [illegible] नैषां भवति॥ संन्यासिनां केवलज्ञाननिष्ठानां तु पुनः क्वचित् कदाचिन्न भवति॥१२॥ राम राम राम राम रामराम

उपाधिलक्षणकर्त्रादिहेतोस्तत्करणं च यद्वा इष्टफलं श्रेष्ठहेतुस्तत्रादिमध्यकृदिदं मानत्रकारं

गीतालघु· ॥कर्म्मफलत्यागिनः शुद्धांतःकरणस्य परमार्थदर्शिन अधिष्ठानादीनि आत्मत्वेन जानतः कर्म्मफलसंलेपो नास्तीत्याह ॥ पंचैतानीति ॥ हेमहा
॥५४॥ बाहो सर्वकर्म्मणां सिद्धये निष्पत्तये सांख्ये वेदांते कृतांते कर्म्मसमाप्तिर्यस्मिन् एतानि पंच कारणानि प्रोक्तानि ॥ मे मत्तो निबोध जानीहि ॥१३॥
तान्येवोपदिशति ॥ अधिष्ठानमिति ॥ इच्छादीनामभिव्यक्तेः अधिष्ठानमाश्रयः अपाधिः कारकं द्वादशसंख्याकं च अन्यत् विविधाः पृथक् चेष्टा वा
यव्याः प्राणापानाद्याः एते चतुर्षु दैवं पंचमं आधिदैविकं चक्षुरादीनामनुग्राहकमादित्यादि ॥१४॥ एतेषामेव सर्वकर्म्महेतुत्वमाह ॥ शरीरेति ॥
नरः यत्कर्म्म एते शरीरवाङ्मनोभिस्त्रिभिः यत्कर्म्म न्याय्यं वा धर्म्मवेदोक्तं च अन्यथा धर्म्मं अशास्त्रीयं उदासीनं वा निमित्तचेष्टादिजीवनहेतुः

॥पंचैतानि महाबाहो कारणानि निबोध मे ॥ सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्म्मणां ॥१३॥ अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं
विविधाश्च पृथक् चेष्टा दैवं चैवात्र पंचमं ॥१४॥ शरीरवाङ्मनोभिर्यत्कर्म्म प्रारभते नरः ॥ न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥१५॥ त
त्रैवं सति कर्त्तारमात्मानं केवलं तु यः ॥ पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्म्मतिः ॥१६॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वा
पि स इमांल्लोकान्न हंति न निबध्यते ॥१७॥

आरभते तत्र तेषु कर्म्मसु त्रिषु एतैः पूर्वोक्ताः पंच अधिष्ठानादयो हेतवः कारणानि ॥१५॥ ततः किं अत आह ॥ तत्रेति ॥ तु पुनः यः तत्र सर्वलोके ए
के अधिष्ठानादिभिः पंचभिः हेतुभिः निष्पाद्यमाने अस्मिन् कर्म्मणि सति आत्मानं केवलं विशुद्धं असंगं अहं कर्त्तेति कर्त्तारं पश्यति मन्यते ॥ स दुर्म्म
तिः अकृतबुद्धित्वात् शास्त्राचार्योपदेशाविदितन्यायैः असंस्कृतबुद्धित्वात् आत्मनस्तत्त्वं न पश्यति ॥१६॥ कः पुनः सुमतिर्यः सम्यक् पश्यति ॥ इत्यत आह ॥ सक
यस्येति ॥ यस्य शास्त्राचार्योपदेशन्यायसंस्कृतांतःकरणस्य अहंकृतः अहं कर्त्तेत्येवंलक्षणो भावो न भवति ॥ यस्य बुद्धिरंतःकरणं मया कर्म्म कृ
तमस्य कर्म्मणः फलं स्वर्गनरकादिकं अहं भोक्ष्ये इति मन्यते न लिप्यते स मुनिः इमान् लोकान् प्राणिनः हत्वापि लोकदृष्ट्या हननं कृत्वापि परमार्थ ॥५४॥
तो न निहंति न निबध्यते न तस्य फलेन संबध्यते ॥१७॥

ऽकर्त्तारं

अथेदानीं सर्वेषां कर्माधिष्ठानादिपंचनिरोधनमाणानां ज्ञानिनां प्रवर्त्तकमाह ॥ ज्ञानमिति ॥ ज्ञानं अविशेषेण सर्ववस्तुविषयं तथा ज्ञेयं अविशेषेण सर्ववस्तु प।
रिज्ञाता उपाधिलक्षणो अविद्याकल्पितो भोक्ता। एतत्त्रयं त्रिविधा कर्मचोदना त्रिप्रकारा कर्मप्रवर्त्तना करणं बाह्येंद्रियाणि दश अंतःकरणं म
नोबुद्ध्यादेः कर्म कारणं तत्त्वाद्यं प्राप्यं संस्कार्यं विकार्यं चेति चतुर्विधं कर्म। कर्ता करणानां इंद्रियाणां व्यापारयिता अयं त्रिविधः कर्मसंग्रहः सर्वक
र्मास्मिन् संगृह्यते ॥१८॥ अथेदानीं क्रियाकारणफलानां सर्वं त्रिगुणात्मकत्वात् सत्त्वादिगुणभेदेन त्रिविधभेदेनोच्यते। ज्ञानं कर्मेति। ज्ञानं च पुनः कर्म
क्रिया च पुनः कर्त्ता एतत् क्रियाकारकफलात्मकं गुणभेदतः सत्त्वादिगुणभेदेन सर्वं त्रिविधमित्युक्ते गुणसंख्याने कापिलशास्त्रे त्रिधैव त्रिप्रकारमेव प्रो
च्यते। तान्यपि यथावत् शृणु ॥१९॥ तत्र सात्त्विकं ज्ञानमाह ॥ सर्वभूतेष्विति ॥ येन ज्ञानेन सर्वभूतेषु अव्यक्तादिस्थावरान्तेषु भेदवत्सु आकाशवत् सर्व

॥ ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥ करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥१८॥ ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ॥ प्रोच्यते
गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥ सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं सात्त्विकं विद्धि ॥२०॥ पृथक्त्वेन तु
यज्ज्ञानं नानाभावान्पृथग्विधान् ॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं ॥२१॥ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहेतुकं ॥ अतत्त्वार्थवदल्पं च
तत्तामसमुदाहृतं ॥२२॥ नियतं संगरहितमरागद्वेषतः कृतं ॥ अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥२३॥ रामरामरामरामरामरामरामरा

गतं अव्ययं कूटस्थं एकं भेदरहितं भावं वस्तु ईक्षते अद्वैतं स्वदर्शनेन तत् ज्ञानं सात्त्विकं विद्धि ॥२०॥ राजसं ज्ञानमाह ॥ पृथक्त्वेनेति तु पुनः यत् ज्ञानं सर्वेषु भूतेषु पृथ
ग्विधान् भिन्नप्रकारान् नानाभावान् भिन्नान् मन्यमानः पृथक्त्वेन प्रतिशरीरं भेदेन वेत्ति। येन ज्ञानेन जानाति तत् ज्ञानं राजसं विद्धि ॥२१॥ तामसं ज्ञानमाह ॥ यत्त्विति ॥ तु
पुनः यत् ज्ञानं एकस्मिन् कार्ये देहे बहिः प्रतिमादौ वा कृत्स्नवत् समग्रवत् सर्वविषयमिव सक्तं एतावानेवात्मा ईश्वरो वा ॥ नातः परमस्तीति कृतनिश्चयं ॥ अहेतुकं ॥
अतत्त्वार्थवत् तत्त्वार्थयुक्तिवर्जितं ॥ अतत्त्वार्थवत् यथाभूतार्थविषयं न भवति। अल्पविषयत्वात् तुच्छं अल्पं एवंविधं यत् ज्ञानं तत् तामसं ॥२२॥ कर्मणस्त्रैविध्यमाह सात्त्वि
के कर्मणामाह ॥ नियतमिति ॥ यत्कर्म अफलप्रेप्सुना फलाकांक्षारहितेन संगरहितं आसक्तिवर्जितं नियतं नित्यं अवश्यकर्तव्यं अरागद्वेषतः रागद्वेषाभ्यां च विना
कृतं विहितं तत्सात्त्विकमुच्यते ॥२३॥

ऽल्पफलविषयत्वात्

गीता० ५५

॥राजसं कर्माह॥ यत्त्विति॥ तु पुनः यत्कर्म कामेप्सुना फलेप्सुना वा पुनः साहंकारेण साभिमानेन बहुलायासं महतायासेन क्रियते॥ तत्त्वेवंविधं कर्म
राजसमुदाहृतं॥२४॥ तामसं कर्माह॥ अनुबंधमिति॥ यत्कर्म अनुबंधं पश्चाद्भावि वित्तक्षयं यस्मिन्कर्मणि क्रियमाणे शक्तिक्षयः अर्थक्षयो वा न तदृ
सां प्राणिपीडां च॥ अनपेक्ष्य पौरुषं स्वकीयं सामर्थ्यं एतत्सर्वं अनपेक्ष्य केवलं मोहादविवेकादारभ्यते तत्तामसमुदाहृतं॥२५॥ कर्तुस्त्रैविध्ये सात्विक
कर्तारमाह॥ मुक्तसंग इति॥ मुक्तसंगस्त्यक्तफलासंगः॥ अनहंवादी अहं वदनशीलः धृत्युत्साहसमन्वितः धैर्योद्यमाभ्यां समन्वितः॥ सिद्ध्यसिद्ध्योर्नि
र्विकारः॥ फलसिद्धावसिद्धौ निर्विकारः प्रीतद्वेषरहितः एवंविधः कर्ता सात्विक उच्यते॥२६॥ राजसं कर्तारमाह॥ रागीति॥ रागी कर्म्मफलापेक्षी॥
युक्तः कर्म्मफलप्रेप्सुः कर्म्मफलेषु लुब्धः परद्रव्यादिषु संजाततृष्णः तीर्थादौ स्वद्रव्यापरित्यागी॥ हिंसात्मकः॥ परपीडाकरस्वभावः॥ अशुचिः बाह्याभ्यं

॥यत्तु कामेप्सुना कर्म्म साहंकारेण वा पुनः॥ क्रियते बहुलायासं तद्राजसमुदाहृतं॥२४॥ अनुबंधं क्षयं हिंसामनवेक्ष्य च पौरुषं॥ मोहादारभ्यते कर्म्म तत्
तामसमुदाहृतं॥२५॥ मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः॥ सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते॥२६॥ रागी कर्म्मफलप्रेप्सुर्लुब्धो
हिंसात्मकोऽशुचिः॥ हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥२७॥ अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः॥ विषादी दीर्घसूत्री च क
र्त्ता तामस उच्यते॥२८॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु॥ प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥२९॥ रान

तरशौचवर्जितः हर्षशोकान्वितः इष्टप्राप्तौ हर्षः अनिष्टप्राप्तौ विषादः॥ इष्टवियोगे शोकः ताभ्यां युक्तः॥ अथवा कर्म्मसंपत्तिविपत्त्योः हर्षशोकयुक्तः
एवंविधः कर्ता राजसः परिकीर्तितः॥२७॥ तामसं कर्तारमाह॥ अयुक्त इति॥ अयुक्तः असमाहितचित्तः॥ प्राकृतः अत्यंतासंस्कृतमतिः बालिशः स्त
६ ब्धः दंडवत्कस्मैचिदपि न नमति॥ शठः शक्तिगूहनकारी मायावी नैकृतिकः परच्छेदनकरः अलसः कर्त्तव्येष्वपि कार्येषु अप्रवृत्तिशीलः विषादी सर्व
दाखिन्नस्वभावः दीर्घसूत्री अल्पकालेन कर्त्तव्यं बहुकालेन करोति॥ यस्त्वेवंविधः कर्ता तामस उच्यते॥२८॥ इदानीं बुद्धेर्धृतेश्च त्रैविध्यं ॥५५॥
प्रतिजानीते॥ बुद्धेरिति॥ हे धनंजय बुद्धेर्भेदं धृतेः धैर्यस्य भेदं गुणतः सत्वादिगुणैः कृतं त्रिविधं अशेषेण साकल्येन पृथक्त्वेन विवेकेन उच्यमानं
शृणु॥२९॥

चेतनीकाशिसेन

ति कार्यं ... करणक

तन्त्र बुद्धेस्त्रिविधे सात्त्विकीं बुद्धिमाह ॥ प्रवृत्तिमिति ॥ हेपार्थ यया बुद्धिः प्रवृत्तिं वेदविहितविषयां निवृत्तिं च निषिद्धविषयां देशकालाद्यपेक्षया हा ते
ष्टादृष्टार्थिनां कर्मणां करणं कार्याकार्ये विभ्रत्पस्थादिनयेनत्नये। नेनयान्नये। दृष्टादृष्टयोः भयाभयोः कारणे इत्यर्थः ॥ बंधमात्मनो दुःखं यत्र बंध
सकारणं वेत्ति ॥ मोक्षं च हेतुं दयात्मुक्तिं सकारणं वेत्ति सा बुद्धिः सात्त्विकी ॥ ३० ॥ राजसीं बुद्धिमाह ॥ ययेति ॥ हेपार्थ यया बुद्ध्या धर्म्मं शास्त्रसंहितं च
पुनः अधर्म्मं शास्त्रनिषिद्धं कार्यं देशकालाद्यपेक्षया दृष्टादृष्टार्थिनां कर्मणां करणं अकार्यं तदकरणं ॥ अयथावत् निश्चयतः पापात्मेनन प्रजाना
ति ॥ सा बुद्धिः राजसी मता ॥ ३१ ॥ तामसीं बुद्धिमाह ॥ अधर्म्ममिति ॥ हेपार्थ यया बुद्धिः तमसा वृता तामसतोऽत्र धर्मं प्रतिषिद्धं विहितं धर्म्ममिति मन्यते जानाति ।
च पुनः सर्वार्थान् सर्वाणि ज्ञेयपदार्थान् विपरीतान्येव जानाति सा बुद्धिः तामसी ॥ ३२ ॥ धृत्यास्त्रैविध्ये सात्त्विकीं धृतिमाह ॥ धृत्येति ॥ हेपार्थ यया अ॥

॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ॥ बंधं मोक्षं च या वेत्ति ॥ बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥ यया धर्म्ममध॰ धर्म्मं च कार्यं वा कार्यमे
वच ॥ अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥ अधर्म्मं धर्म्ममिति या मन्यते तमसावृता ॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ ताम॥
सी ॥ ३२ ॥ धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥ यया तु धर्म्मकामार्थान् धृत्या
धारयतेऽर्जुन ॥ प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥ यया स्वप्नं भयं शोकं विषादं मदमेव च ॥ न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ॥
॥ ३५ ॥ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ॥ अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ॥ ३६ ॥ राम राम राम राम राम राम राम राम राम

अव्यभिचारिण्या नित्यसमाध्यनुगतया धृत्या मनः प्राणेन्द्रियाणां क्रियाः चेष्टानधास्वमार्गप्रवृत्ते: धृतिः ॥ ३३ ॥ राजसीं धृतिमाह ॥ ययेति ॥
हेपार्थ हे अर्जुन तु पुनः यया धृत्या धर्म्मकामार्थान् त्रीन् अवश्यकर्त्तव्यान् धारयति ॥ प्रसंगेन फलाकांक्षी यस्य धर्म्मादिः अवश्यकर्त्तव्येन धार॥
धृत्यान णप्रसंगः यदा तदा तेन प्रसंगेन तस्य फलाकांक्षी भवति ॥ यः पुरुषः सा धृतिः राजसी ॥ ३४ ॥ तामसीं धृतिमाह ॥ ययेति ॥ हेपार्थ दुर्मेधा यया धृत्या
स्वप्नं निद्रां भयं त्रासं शोकं संतापं विषादं विषण्णतां यथेष्टविषयसेवात्मात्मनो विषयसेवां बहुमन्यमानस्य योमदस्तं ॥ एतानि वस्तूनि मनसि नित्यकर्त्तव्यरू
पतया कुर्वन् न विमुंचति ॥ धारयत्येव ॥ सा धृतिः तामसी ॥ ३५ ॥ इदानीं फलस्य सुखस्य त्रैविध्यं प्रतिजानीते ॥ सुखमिति ॥ हे भरतर्षभ तु पुनः इदानीं सत्त्वा
दित्रैदेन त्रिविधं सुखं मत्तः शृणु ॥ यत्र यस्मिन् सुखानुभवे अभ्यासात् प्रतिपरिचयात् चित्तं रमते ॥ रतिं प्रतिपद्यते। कृतन्यत्र दुःखांतं दुःखानवं ॥
निगच्छति प्राप्नोति ॥ ३६ ॥
सकलात्तत्वार्थेमात्र योगेन चित्तसमाधानेन धारयति एवं विधा
सात्त्विकी धृतिः

गीताटी॰ तत्सात्त्विकं सुखमाह ॥ यत्तदिति ॥ यत् त्रिविधसुखमध्ये यत्सुखं अग्रे सर्वप्रथमसन्निपाते विषमिव दुःखसाध्यमपि परिणामे ज्ञानवैराग्यादिपरि ॥
॥५६॥ पाकजं सुखं अमृतोपमं तत्सुखं सात्त्विकं ॥ आत्मनो बुद्धिः आत्मबुद्धिः तस्याः प्रसादो नैर्मल्यं तस्माज्जातं ॥ अथवा आत्मविषया बुद्धिः आत्मबुद्धिः
तस्याः प्रकर्षः तस्माज्जातं ॥ ३७ ॥ राजसं सुखमाह ॥ विषयेति ॥ यत्सुखं विषयेंद्रियसंयोगात् जायमानं अग्रे प्रथमक्षणे ॥ अमृतोपमं ॥ अमृतसम
ानं परिणामे तदुपभोगांते बलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वात् ॥ अधर्मतत्कृतनरकादिहेतुत्वाच्च ॥ परिणामे विषमिव तत्
स्मृतं सुखं राजसं ॥ ३८ ॥ तामसं सुखमाह ॥ यदग्रेति ॥ यत्सुखं अग्रे च पश्चात् अनुबंधे अवसाने उत्तरकाले च ॥ आत्मनो मोहनं मोहकरं निद्रालस्यप्रमादो
त्थं निद्रालस्यप्रमादेभ्यः समुत्पन्नं तत्सुखं तामसं ॥ ३९ ॥ प्रकरणार्थमुपसंहरति ॥ नतदस्तीति ॥ यत्सत्त्वं पृथिव्यां मनुष्यादिभूतजातं अन्यद्वा दि ॥

॥ यत्तदग्रे विषमिव परिणामेऽमृतोपमं ॥ तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजं ॥ ३७ ॥ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतोपमं ॥ परिणामे विषमि
व तत्सुखं राजसं स्मृतं ॥ ३८ ॥ यदग्रे चानुबंधे च ॥ सुखं मोहनमात्मनः ॥ निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ॥ ३९ ॥ न तदस्ति पृथिव्यां वा ॥
दिवि देवेषु वा पुनः ॥ सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥ ४० ॥ ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप ॥ कर्माणि प्रविभक्तानि स्वभा
व प्रभवैर्गुणैः ॥ ४१ ॥

धु वि लोके देवेषु मध्ये यद्वस्तु प्राणिजातं सत्त्वं ॥ एभिस्त्रिभिर्गुणैर्मुक्तं ॥ गुणत्रयविरहितं स्यात् ॥ तन्नास्ति ॥ ४० ॥ तर्हि सर्वस्य क्रियाकारकफला
दिकस्य प्राणिजातस्य च ॥ त्रिगुणात्मकत्वात् ॥ कथं तस्य मोक्ष इत्येतां स्वस्वाधिकारविहितैः कर्मभिः परमेश्वरं समाराध्य तत्प्रसादजेन ज्ञानेन मोक्षो
भवतीति सर्वगीतार्थसारं संग्रहीतुं प्रकरणांतरमारभते ॥ ब्राह्मणेत्यादि यावत्समाप्तिः ॥ हे परंतप ब्राह्मणक्षत्रियविशां च पुनः शूद्राणां चतुर्णां
कर्माणि स्वभावप्रभवैर्गुणैः प्रविभक्तानि विभागेन व्यवस्थापितानि ॥ स्वभावप्रभवैः स्वभावः ईश्वरस्य त्रिगुणात्मिका माया सा प्रभवः कारणं येषां ॥
गुणैः सत्त्वादीनां गुणानां ते स्वभावप्रभवा वा स्ते ॥ अथवा स्वभावस्य प्रभवाः कारणानि गुणाः स्वभावप्रभवास्तैः ब्राह्मणस्वभावस्य सत्त्वगुणः प्रभवः कारणं क्ष ॥ ॥५६॥
त्रियस्य स्वभावस्य सत्त्वोपसर्जनं रजः प्रभवः वैश्यस्वभावस्य तमउपसर्जनं रजः प्रभवः शूद्रस्वभावस्य रजउपसर्जनं तमः प्रभवः ॥ अथवा जन्मांतरसं
स्काराः इहजन्मनि प्राकुद्भूतः स्वभावो येषां तैः ॥ ४१ ॥ ५२

प्रविभक्तानि विभा
गेन व्यवस्थापित
विभागो यस्यै
स्वभावस्य प्रभवा हि कारणानि गुणाः स्वभावः
तेषां ... स्वभावस्य ... कारणं

शमोंऽतःकरणसंयमः

क्षात्रंकर्मस्वभावजं स्वभावात्जातं

शमइति॥ बाह्येंद्रियनिग्रहः दमः अंतःकरणसंयमः शमः तपः शारीरंवाचिकंमानससर्वं शौचं बाह्यंआभ्यंतरं क्षांतिः क्षमा आर्जवं ऋजुत्वं ज्ञानं शास्त्रज
नितंतदेवज्ञानं अनुभवरूपं विज्ञानं आस्तिक्यं वेदार्थेषु श्रद्धानता॥ ब्राह्मणकर्म ब्राह्मणजातेः एतत्कर्म स्वभावप्रभवैः गुणैर्विभागेन संजातं॥४२॥ क्षत्रिय
स्यकर्मदर्शयति॥ शौर्यमिति॥ शौर्यं तेजः धृत्या धैर्यं दाक्ष्यं प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रतिपत्तिः दक्षभावः दाक्ष्यं चपुनः युद्धेअपलायनं दानं ई
श्वरभावश्च॥ इतिवित्तव्यान् स्वभावस्यात्प्रतिप्रभुशक्तिप्रकटीकरणं ईश्वरभावः॥४३॥ वैश्यशूद्रयोः दर्शयति॥ कृषिरिति॥ कृषिगौरक्ष्यवाणिज्यं स्व
भावजं वैश्यकर्म गौरक्ष्यं पशुपाल्यं शूद्रजातेरपि परिचर्यात्मकं द्विजशुश्रूषारूपं कर्म कर्मस्वभावजं॥४४॥ ब्राह्मणादिकर्मणांज्ञानहेतुमा
ह॥ स्वेस्वेइति॥ नरः अधिकारीपुरुषः स्वेस्वेयथोक्तेकर्मणि तत्परः सन् येनप्रकारेण सिद्धिं विंदति तच्छृणु संसिद्धिं स्वकर्मानुष्ठानात्तद्देहेंद्रियाणां

॥शमोदमस्तपः शौचं क्षांतिरार्जवमेवच॥ ज्ञानंविज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजं॥४२॥ शौर्यंतेजोधृतिर्दाक्ष्यं युद्धेचाप्यपलायनं॥ दानमीश्वर
भावश्च क्षात्रंकर्मस्वभावजं॥४३॥ कृषिगौरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजं॥ परिचर्यात्मकंकर्म शूद्रस्यापिस्वभावजं॥४४॥ स्वेस्वेकर्म
ण्यभिरतः संसिद्धिंलभतेनरः॥ स्वकर्मनिरतः सिद्धिंयथाविंदतितच्छृणु॥४५॥ यतःप्रवृत्तिर्भूतानां येनसर्वमिदंततं॥ स्वकर्मणातमभ्यर्च्य
सिद्धिंविंदतिमानवः॥४६॥ श्रेयान्स्वधर्मोविगुणः परधर्मात्स्वनुष्ठितात्॥ स्वभावनियतंकर्म कुर्वन्नाप्नोतिकिल्बिषं॥४७॥ ताम

शुद्धिरूपेसति ज्ञाननिष्ठायोग्यतालक्षणां लभते प्राप्नोति॥४५॥ कर्मणोज्ञानप्राप्तिप्रकारमाह॥ यतइति॥ यतः यस्मात् भूतानां प्रवृत्तिः उत्पत्तिः अथ
वा चेष्टा यस्मात् अंतर्यामिणः ईश्वरात् भवति॥ येन ईश्वरेण इदं जगत् ततं व्याप्तं अंतर्यामिणं ईश्वरं स्वकर्मणा प्रतिवर्णं प्रोक्तेन शमशौर्यादिना॥ अभ्य
र्च्य पूजयित्वा मानवः अधिकारी केवलज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विंदति प्राप्नोति॥४६॥ स्वकर्मणेति विशेषस्यफलमाह॥ श्रेयानिति॥
स्वधर्मः ब्राह्मणादीनां सर्वोक्तः स्वकीयो धर्मः विगुणोपि निंदितोपि॥ परधर्मात् वर्णांतरधर्मात् स्वनुष्ठितात् श्रेयान् प्रशस्यतरः॥ स्वभाव
नियतं स्वभावप्रभवैर्गुणैः प्रविभक्तं स्वकीयं पापरूपमपि कर्म कुर्वन् किल्बिषं नवाप्नोति यथा विषयजातस्य कीटस्य विषं दोषकरं नभव
ति॥ परंरूपमपि जीवनहेतुः॥४७॥

यदि स्वधर्मे हिंसालक्षणो दोषोऽस्ति तर्हि परधर्मेऽपि सदोषत्वं स्यात्॥ सहजमिति॥ हे कौंतेय सहजं कर्म सदोषं दोषयुक्तं अपि न त्यजे
त्। हि यस्मात् सर्वारंभाः सर्वाणि कर्माणि। वर्णानां नराणामपि कर्माणि त्रिगुणात्मकत्वात् दोषेण आवृतानि यथा अग्निः सहजेन धूमेन आवृतः॥४८॥
स्वकर्मणा तमभ्यर्च्येति यत् कर्मणा ज्ञाननिष्ठायोग्यतालक्षणा सिद्धिरुक्ता तस्याः फलं ज्ञाननिष्ठामाह॥ असक्तेति॥ सर्वत्र पुत्रदारादिषु आत्मव्यति
रिक्तेषु प्रीतिरहितांतःकरणो जितात्मा जितेंद्रिय विगतस्पृहः निस्पृहः एवंविधः आत्मज्ञः संन्यासकर्मजो सिद्धिं विलक्षणां जीवन्मुक्तिलक्षणां नैःक
र्म्यसिद्धिं नैःकर्म्यमिति क्रियात्मस्वरूपावस्थानलक्षणां परमसिद्धिं निष्पत्तिं। तां संन्यासेन प्राप्नोति॥४९॥ नैःकर्म्येति लक्षणां केवलज्ञाननिष्ठायेन क्रमे
ण भवति तं क्रममाह॥ सिद्धिमिति॥ हे कौंतेय सिद्धिं प्राप्तः स्वकर्मणा ईश्वरं अभ्यर्च्यते तत्प्रसादजां शरीरेंद्रियाणां ज्ञाननिष्ठालक्षणां सिद्धिं प्राप्तसन्
यथा येन प्रकारेण ज्ञाननिष्ठारूपेण ब्रह्म परमात्मानं प्राप्नोति। तं ज्ञाननिष्ठाप्राप्तिक्रमं मे मम वचनात् निबोध जानीहि॥ या ब्रह्मप्राप्ति ब्रह्मज्ञानस्य॥

॥सहजं कर्म कौंतेय सदोषमपि न त्यजेत्॥ सर्वारंभा हि दोषेण धूमेनाग्निरिवावृताः॥४८॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः॥ नैष्क
र्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥४९॥ सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे॥ समासेनैव कौंतेय निष्ठा ज्ञानस्य या परा॥५०॥ बुद्ध्या वि
शुद्धया युक्तो धृत्यात्मानं नियम्य च॥ शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥५१॥ विविक्तसेवी लघ्वाशी जितवाक्कायमानसः॥ ध्यानयोगप
रो नित्यं वैराग्यं समुपाश्रितः॥५२॥ अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं॥ विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते॥५३॥ राम राम राम राम राम राम

निष्ठा परिसमाप्तिः समासेन संक्षेपेण तां निबोध॥५०॥ तदेव दर्शयति॥ बुद्ध्येति॥ बुद्ध्या निश्चयात्मिकया विशुद्धया मायारहितया युक्तः संपन्नो धृत्या धैर्ये
ण आत्मानं देहेंद्रियसंघातं वशीकृत्य सामर्थ्यात् विषयांस्त्यक्त्वा शरीरस्थितिमात्रात् रागद्वेषौ परित्यज्य ब्रह्मभूयाय मोक्षाय कल्प्यते समर्थो भवति
॥५१॥ किंच॥ विविक्तेति॥ विविक्तसेवी एकांतसेवी लघ्वाशी मितभोजनः जितवाक्कायमानसः ध्यानयोगपरः॥ ध्यानं आत्मचिंतनं। योगः आत्मस्वरू
पविषये एकाग्रीकरणं तयोः कर्तव्यतापरः ध्यानयोगपरः नित्यं सन्यत मंत्रजपादिकं कुर्वन् परं वैराग्यं समुपाश्रितमुनिः ब्रह्मभूयाय कल्पते॥ परं किं
च॥ [illegible] अहंकारमिति॥ देहादिषु अहंकारं अहंकारः तं कामरागयुक्तं सामर्थ्यं बलं। हर्षानंतरजन्मावी धर्मातिक्रमहेतुः दर्पस्तं। कामं इच्छां।
क्रोधं द्वेषं वा ह्यबाह्यपरिग्रहं विमुच्य परित्यज्य परमहंसपरिव्राजिको भूत्वा देहे जीवन्मात्रेऽपि निर्गतममत्वो निर्ममः शांतः उपरतः हर्षायास

॥५३॥ [illegible] ब्रह्मभूयाय कल्पते॥ ॥५३॥

ब्रह्माभिन्नेन स्वरूपेणावस्थानस्य फलमाह॥ ब्रह्मभूत इति॥ अनेन क्रमेण ब्रह्मभूतः ब्रह्मत्वं प्राप्तः प्रसन्नात्मा लब्धात्मप्रसादस्वभावः न शोचति। किं
चिदर्थवैकल्ये आत्मनो वैगुण्ये च नष्टमस्य न शोचति। न संतप्यते। अप्राप्तं विषयं न कांक्षति। आत्मौपम्येन सर्वेषु भूतेषु सुखं दुःखं वा सममेव पश्य
ति। य एवंभूतो ज्ञाननिष्ठः समधिपरमेश्वरे च भक्तिं परां मल्लक्षणां ज्ञानलक्षणां चतुर्थीं लभते॥५४॥ ततश्च तत्त्वेति॥ ततो ज्ञानलक्षणया च तया अहं याव
न्नुपाधिकृतविस्तारभेदः यश्चास्मि विद्वांस्तत्त्वेन सर्वोपाधिभेदः उत्तमः पुरुषः। आकाशवत् व्याप्तस्तं मां अद्वैतं चैतन्यमात्रैकरसे॥ अजमजरममृतमभयम
निधनं तत्त्वतोऽभिजानाति तदनन्तरं मां तत्त्वतो ज्ञात्वा मामेव विशते॥५५॥ स्वकर्मभिः परमेश्वराराधनादुक्तं मोक्षप्रकारमुपसंहरति॥ सर्वकर्मा
णीति॥ सर्वकर्माण्यपि नित्यनिमित्तानि सदा कुर्वन् अनुतिष्ठन् मद्व्यपाश्रयः मय्यर्पितसर्वात्मस्वभावः सोऽपि मत्प्रसादात् शाश्वतं स्वयं पदं प्राप्नोति॥
५६॥ यस्मादेवं तस्मात्। चेतसेति॥ चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टादृष्टार्थानि मयि ईश्वरे संन्यस्य मत्परः मच्छरणः सन् बुद्धियोगमुपाश्रित्य बुद्धि

॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते परां॥५४॥ भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः॥ ततो मां तत्त्वतो ज्ञात्वा
विशते तदनन्तरं॥५५॥ सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं॥५६॥ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः॥ बु
द्धियोगमुपाश्रित्य मच्चित्तः सततं भव॥५७॥ मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि॥ अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि॥५८॥ यदहंकारमाश्रित्य
न योत्स्य इति मन्यसे॥ मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥५९॥ स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥६०॥

त्वेनाश्रयत्वमाश्रित्य मच्चित्तः॥ सततं सर्वदा भव॥५७॥ ततो यद्भविष्यति तच्छृणु॥ मच्चित्त इति॥ मच्चित्तः सर्वदुर्गाणि संसारहेतुभूतानि मत्प्रसादात्तरिष्यसि॥ अति
क्रमिष्यसि। अथ चेत् यदि त्वं मदुक्तं अहंकारात् पंडितमन्यसे॥ न श्रोष्यसि तर्हि त्वं विनंक्ष्यसि विनाशं गमिष्यसि॥५८॥ किंच॥ अहं युद्धं न करिष्यामि किं पराधीनोऽहं त्वदुक्तं
किमर्थं करोमि इति चेदित्य आह॥ यदहंकारमिति॥ यत् यदि त्वं अहंकारमाश्रित्य न योत्स्य इति युद्धं न करिष्यामीति॥ मन्यसे। तर्हि ते न व एष व्यवसायो निश्चयो मिथ्या
यतः प्रकृतेः क्षत्रस्वभावः त्वां नियोक्ष्यति प्रेरयिष्यति॥५९॥ ततश्चेत्याह॥ स्वभावजेनेति॥ हे कौन्तेय स्वभावजेन शौर्यादिना यथोक्तेन स्वेन आत्मीयेन कर्मणा॥
निबद्धो निश्चयेन बद्धः सन् मोहात् अविवेकेन यत्कर्म कर्तुं नेच्छसि॥ तत्कर्म अवशोऽपि परवशः एव सन् करिष्यसि॥६०॥ रामराम रामराम रामराम रामराम

तदेवं श्लोकद्वयेन सांख्याद्यभिमतेन प्रकृतिपारतंत्र्यं स्वभावपारतंत्र्यं चोक्तं ॥ इदानीं त्वीश्वरपारतंत्र्यमाह ॥ ईश्वर इति ॥ हे अर्जुन ईश्वर ईशनशीलः सर्वभूतानां सर्वप्रा
णिनां हृद्देशे हृदयदेशे विशुद्धांतःकरणे तिष्ठति किं कुर्वन् सर्वभूतानि मायया भ्रामयन् यंत्रारूढानीव यथा दारुयंत्रारूढानि दारुनिर्मितपुरुषादीनि
भ्रामयन् कश्चित् ॥ तथा सर्वभूतानि भ्रामयन् हृदि तिष्ठति ॥६१॥ यस्मात् सर्वे जीवाः परमेश्वरपरतंत्राः तस्मात् त्वमिति ॥ हे भारत तमेव ईश्वरं शरणं आश्र
यं संसारार्तिहरणार्थं गच्छ सर्वभावेन सर्वात्मना तत्प्रसादात् ईश्वरानुग्रहात् परां प्रकृष्टां शांतिं उपरतिं च अन्यत् स्थानं मम विष्णोः परमं पदं ॥ शाश्वत
नित्यं प्राप्स्यसि ॥६२॥ सर्वगीतार्थमुपसंहरति ॥ इतीति ॥ हे अर्जुन मया सर्वज्ञेन ते तुभ्यं इति एतत् गुह्यात् गुह्यतरं रहस्यं ज्ञानं आख्यातं उक्तं ॥ एतत् यथो
क्तं शास्त्रं अशेषेण समस्तं च अर्थजातं विमृश्य विमर्शनं आलोचनं कृत्वा यथा इच्छसि तथा कुरु ॥६३॥ अतिगंभीरं गीताशास्त्रं अशेषतः पर्यालोचयितु

॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया ॥६१॥ तमेव शरणं गच्छ सर्वभावेन भारत ॥ तत्प्रसादात्परां शांतिं
स्थानं प्राप्स्यसि शाश्वतं ॥६२॥ इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥६३॥ सर्वगुह्यतमं भूयः शृणु मे
परमं वचः ॥ इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितं ॥६४॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
॥६५॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥६६॥

मशक्नुवतः कृपया स्वयमेव तस्य सारं संक्षिप्य कथयति ॥ सर्वगुह्यतमं ॥ सर्वगुह्येभ्योऽत्यंतरहस्यं भूयः अतिसंक्षेपतः कथितमपि पुनः मे मम परं प्रकृष्टं वचः वाक्यं शृ
णु नैव भयात् नाप्यर्थकारणात् वक्ष्यामि किं तर्हि मम दृढं अव्यभिचारेण इष्टोऽसि प्रियोऽसि इत्यतः ततः तेन कारणेन ते तव हितं परं ज्ञानप्राप्तिसाधनं व
क्ष्यामि ॥६४॥ किं तदित्यत आह ॥ मन्मनेति ॥ हे अर्जुन त्वं मन्मनाः मच्चित्तः मद्भक्तः मद्याजी मद्यजनशीलो भव मां नमस्कुरु एवं प्रवर्तमानः मां एष्यसि प्राप्स्य
सि अर्थे ते तव सत्यं प्रतिजाने सत्यां प्रतिज्ञां करोमि यतः त्वमेव मम प्रियोऽसि ॥६५॥ इदानीं ततोऽपि गुह्यतमं कर्मयोगनिष्ठाफलं सम्यक्दर्शनं सर्ववेदांतवि
हितं सर्वकर्मत्यागसहितं उपदिशति ॥ सर्वधर्मानिति ॥ सर्वधर्मान् समस्तान् धर्मान् अधर्मांश्च सर्वाणि कर्माणि नित्यनैमित्तिककाम्यनिषिद्धानि परि
त्यज्य संन्यस्य मां एकं सर्वात्मानं समं सर्वभूतस्थं आत्मत्वेन शरणं व्रज ॥ न मत्तोऽन्यदस्तीति अवधारय अहं त्वां एवं निश्चितबुद्धिं सर्वपापेभ्यः सर्वधर्मा ॥५८॥
धर्मबंधरूपेभ्यः स्वात्मभावप्रकाशीकरणेन मोक्षयिष्यामि ॥ अतः मा शुचः शोकं माकार्षीः ॥६६॥ रामरामरामरामराम रामरामरामरामरामरामरामरामरा

२

सर्वगीताशास्त्रार्थमस्मिन्नध्याये उपसंहृत्य विशेषतश्चान्ते शास्त्रार्थदार्ढ्याय संक्षेपतः उपसंहारं कृत्वा ॥ अथेदानीं शास्त्रसंप्रदायविधिमाह ॥ इदं त इति ॥ इदं
शास्त्रं यत् मायासंसारविच्छिन्नरूपं ते तुभ्यमुक्तं तत् ॥ अतपस्काय तपोरहिताय न वाच्यं ॥ तपस्विनेऽपि ॥ अभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचिद
वस्थायां न वाच्यं ॥ तपस्विनेऽपि सन् यः शुश्रूषुर्न भवति ॥ तस्मै अपि न वाच्यं ॥ यः मां वासुदेवं मनुष्यं प्राकृतं मत्वा अभ्यसूयति ॥ आत्मप्रशंसादिदोषाध्यारोप
णेन मम ईश्वरत्वं अजानन् न सहते तस्मै अपि न वाच्यं ॥ तपस्वित्वभक्तिशुश्रूषानसूयाएतच्चतुष्टययुक्ताय वाच्यमित्यर्थः ॥६७॥ संप्रदायस्य कर्तुः फ
लमाह ॥ य इममिति ॥ यः मद्भक्तिमद्भक्तेषु सम्यक्तेभ्यः ॥ इमं परमं गुह्यं अभिधास्यति विवक्ष्यति ॥ मम मयि परां भक्तिं करोति ॥ ततो निःसंशयः सन् मामेव
प्राप्नोत्यर्थः ॥६८॥ किंच न चेति ॥ तस्मात् मद्भक्तेभ्यो गीताशास्त्रव्याख्यातुः सकाशात् अन्यो मनुष्येषु मध्ये कश्चिदपि मम प्रियकृत्तमः अत्यंतपरितो

॥ इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥६७॥ य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि प
रां कृत्वा मामेवैष्यत्यसंशयः ॥६८॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥६९॥ अध्येष्यते च य इ
मं धर्म्यं संवादमावयोः ॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥७०॥ राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम

तोषकर्ता नास्ति ॥ न च कालान्तरे भविता भविष्यति ॥ ममापि तस्मादन्यः प्रियतरो भुवि ॥ अधुना नास्ति न च कालान्तरे भविष्यतीत्यर्थः ॥६९॥
पठतः फलमाह ॥ अध्येष्यत इति ॥ च पुनः यः आवयोः कृष्णार्जुनयोः इमं धर्मं धर्म्यादनपेतं संवादं अध्येष्यते ॥ जपरूपेण पठिष्यति ॥
तेन पुंसा सर्वयज्ञेभ्यः श्रेष्ठेन ज्ञानयज्ञेन अहं इष्टः स्यां अर्चयेयं ॥ इति मे मतिः ॥ यद्यप्यसौ गीतामनवबुध्यमान एव केवलं जपति ॥ तथापि
मम तच्छृण्वतो मामेवासौ प्रकाशयतीति बुद्धिर्भवति ॥ यथा लोके कश्चित्कस्यचिन्नाम गृह्णाति तदासौ मामेवाह्वयतीति मत्वा
तत्पार्श्वं गच्छति ॥ तत्राहमपि तस्य सन्निहितो भवेयं ॥ अत एव च ॥ अजामिलपुत्रबंधुप्रमुखानां कथंचिन्नामोच्चारणमात्रेण
प्रसन्नोऽस्मि तथैव तस्यापि भवेयमिति भावः ॥७०॥

श्री

६

गीताटी० अथश्रोतुफलमाह॥ श्रद्धावानिति॥ योनरः श्रद्धावान् चपुनः अनसूयरहितोयः॥ श्रृणुयात्॥ सोपि मुक्तः सन् पुण्यकर्म्मणां शुभान् लोकान् प्राप्नुया
॥४९॥ त्॥ अपिशब्दात् अर्थज्ञानवान् शुभान् लोकान् प्राप्नोति॥ अत्र किं वक्तव्यं॥७१॥ शिष्यस्य शास्त्रार्थग्रहणं विवेकं बुभुत्सुः आचार्यधर्म्मपरिपाल
यन्नपृच्छति॥ कच्चित्तदिति॥ हे पार्थ धनंजय कच्चिदिति प्रश्नार्थे निपातः एतत् मयोक्तं एकाग्रेण चित्तेन त्वया श्रुतं श्रवणेन अवधारितं॥ किं वाप्र
मादित्ते केचित्॥ अज्ञाननिमित्तः अविवेकिता स्वाभाविकी प्रनष्टा यदर्थोयं तव श्रवणायासस्तव मम च उपदेशकृत्वायासः॥७२॥ कृतार्थः सन्
अर्जुन उवाच॥ नष्टइति॥ हे अच्युत मोहः अज्ञानजः समस्तसंसारानर्थहेतुः सागर एव दुस्तरः सत्व त्वत्प्रसादान्नष्टः॥ स्मृतिः आत्मतत्त्वविषयाल
ब्धायस्याः लाभात् सर्वग्रन्थीनां विमोक्षो अभूत॥ त्वत्प्रसादात् मया त्वोपि त्वेन दासेन मोहनाशः प्रश्नप्रतिवचनेन सर्वज्ञः शास्त्रार्थज्ञानफलं॥ ए

॥श्रद्धावाननसूयश्च श्रृणुयादपि यो नरः॥ सोपि मुक्तः शुभान् लोकान् प्राप्नुयात् पुण्यकर्म्मणां॥७१॥ कच्चिदेतत् श्रुतं पार्थ त्वयैकाग्रेण चे
तसा॥ कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय॥७२॥ अर्जुन उ०॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत॥ स्थितोस्मि गतसंदेहः करि
ष्ये वचनं तव॥७३॥ संजय उ०॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं॥७४॥ व्यासप्रसादात् श्रुतवा
नेतद्गुह्य महं परं॥ योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयं॥७५॥ राजन् संस्मृत्य संस्मृत्य संवादमिममद्भुतं॥ केशवार्जुनयोः पुण्यं हृष्यामि
च मुहुर्मुहुः॥७६॥

तावदेवेति निश्चितं भवति॥ अतः अज्ञानसंमोहनाशः आत्मस्मृतिप्रातिलाभः॥७३॥ शास्त्रार्थपरिसमाप्तेः कथासंबंधप्रदर्शनार्थं धृतराष्ट्रं प्रति संजय
उवाच॥ इत्यहमिति॥ अहं एवं वासुदेवस्य कृष्णस्य पार्थस्य महात्मनः॥ इमं यथोक्तसंवादं अद्भुतं अत्यंत विस्मयकरं रोमहर्षणं अश्रौषं श्रुतवानस्मि॥ श्रुत
॥७४॥ आत्मनः तद्धर्णेन संभावनमाह॥ व्यासेति॥ अहं एतत् परं गुह्यं योगं योगार्थत्वात् योगेश्वरात् कृष्णात् स्वयं साक्षात् कथयतः न परंपरातः
व्यासप्रसादात् ततो दिव्यचक्षुर्लाभात् श्रुतवान् अश्रौषं॥७५॥ किंच॥ राजन्निति॥ हे राजन् धृतराष्ट्र केशवार्जुनयोः इमं अद्भुतं विस्मयकारि पुण्यं ॥४९॥
श्रवणेनापि पापहरं संवादं संस्मृत्य संस्मृत्य मुहुर्मुहुः॥ वारंवारं हृष्यामि रोमांचितो भवामि हर्षं प्राप्नुयामि वा॥७६॥ रामरामरामरामरामरामरामरामरामराम

श्री

सटी० ॥ किंच ॥ तच्चेति ॥ चपुनः हेराजन् हरेर्नारायणस्य विश्वरूपमत्यद्भुतं देवानामपि विस्मयकरं संस्मृत्यसंस्मृत्यमेमम विस्मयोवर्त्तते ॥ चशब्दस्य
त्पुनः पुनः हृष्यामि हर्षविस्मयंवाप्नोति ॥ ७७ ॥ तत्पुत्राणांराज्यादि शंकांपरित्यजेत्याशयेनाह ॥ यत्रेति ॥ किंबहुनायत्रचयेषांपक्षे योगेश्वरः स
॥ र्वयोगानामीश्वरः सर्वयोगबीजभूतः कृष्णोविराजते ॥ यस्मिन्पक्षे धनुर्द्धरोगांडीवधन्वापार्थः अर्जुनोवर्त्तते तत्रपांडवानांपक्षे विजयः

॥ तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः ॥ विस्मयोमेमहाराजन् ॥ हृष्यामिचपुनःपुनः ॥ ७७ ॥ यत्रयोगेश्वरः कृष्णोयत्रपार्थोधनु
र्द्धरः ॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ॥ ७८ ॥ इतिश्रीमहाभारते शतसाहस्र्यांसंहितायांवैयासिक्यांभीष्मपर्वणिश्रीमद्भगवद्गीतासूप
निषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसंन्यासयोगोनामाष्टादशोऽध्यायः ॥ १८ ॥ संवत् १८४८ शाके १७१३ मासा ८ बुदि
११ चंद्रे शुभंभूयात् ॥ हस्तदोषात्मजेहरि नेत्र चिंतेयेन लिखितं मया मम मिजाक्षा मध्ये लभ्यते शुभं भूयात् ॥ जलरक्ष पापरक्षो शुभंभ भू
यात् राम
राम राम

तत्रश्रीः विभूतिः राज्यलक्ष्मीः तत्रैवविजयः भूतिः श्रियोविशेषः उत्तरोत्तरा वृद्धिः ध्रुवाअव्यभिचारिणीनीतिः न्यायः ॥ इतिमेमममतिः
॥ ७८ ॥ इतिश्रीपाचोलाचार्यकृतंगीतासटीकासमाप्ता ॥ १८ ॥ राम ॥ ६० ॥
च्योव्येजीश्रीकसनाजी तत्पुत्रचिरंजीव नागेश्वर लख्यते ॥ स्वार्थंच परार्थंच ॥ राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम

सहस्रनामविष्णोस्त्रिलोकानां श्राद्धकेशवः अर्जुनः सप्तकं व्यासात् सप्तषष्टिस्तु संजयः धृतराष्ट्रश्लोकमेकं गीतायामेव संग्रहः १ मलनिर्मोचनं पुंसां गंगास्नानं दिने दिने स
कृद्गीतांभसि स्नानं संसारमलनाशनं २ गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः यास्वयं पद्मनाभस्य मुखपद्माद्विनिसृता ३ भारतोदधिपंकस्य गीता
निर्मथनस्य च सारमुद्धृत्य कृष्णेन अर्जुनस्य मुखे हुतं ४ गीता गंगा च गायत्री गोविंदेति हृदि संस्थिते चतुर्गकारसंयुक्तानां पुनर्जन्म न विद्यते ५

સત્યનારાયણશર્મા
1091 B [illegible]
[illegible]
[illegible]

ततः किं वृत्तमित्यपेक्षायामाह संजयः ॥ तत्रेति। पांडवः तदा तत्र तस्मिन् देवदेवस्य शरीरे विश्वरूपे एकस्थं एकत्र स्थितं अनेकधा देवपितृमनु
ष्यादिभेदैः प्रविभक्तं भिन्नं कृत्स्नं समग्रं जगत् अपश्यत ॥१३॥ एवं दृष्ट्वा अर्जुनः किं कृतवानित्याह ॥ तत इति ॥ स धनंजयोऽर्जुनः ततस्तद्दर्शनानंतरं
विस्मयाविष्ट उत्पन्नविस्मयः हृष्टरोमा हृष्टा जाताः सन् देवं शिरसा प्रणम्य अभाषत ॥ इदं वक्ष्यमाणं अब्रवीत् ॥१४॥ अर्जुनस्य भाषणप्रकारमे
व संजय आह ॥ पश्यामीति ॥ हे देव अहं तव देहे सर्वान् देवान् इंद्रादीन् तथा भूतविशेषसंघान् भूतविशेषाणां स्थावरजंगमाणां विचित्राकारवि
शिष्टानां संघाः भूतविशेषसंघास्तान् भूतविशेषसंघान् ब्रह्माणं चतुर्वक्त्रं ईशं प्रजानामीशितारं ॥ कमलासनस्थं पृथ्वीपद्ममध्ये मेरुकर्णिकास
नस्थं ऋषीन् वसिष्ठादीन् सर्वान् वासुकिप्रभृतीन् उरगान् दिव्यान् पश्यामि ॥१५॥ हे विश्वेश्वर विश्वरूप त्वां अनेकबाहूदरवक्त्रनेत्रं अनेक॥

॥तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा॥ अपश्यद्देवदेवस्य शरीरे पांडवस्तदा॥१३॥ ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः॥ प्रणम्य शिरसा॥
देवं कृतांजलिरभाषत॥१४॥ अर्जुन उवाच॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्॥ ब्रह्माणमीशं कमलासनस्थ॥
मृषींश्च सर्वानुरगांश्च दिव्यान्॥१५॥ अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनंतरूपं॥ नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर
विश्वरूप॥१६॥ किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमंतं॥ पश्यामि त्वां दुर्निरीक्ष्यं समंतात् दीप्तानलार्कद्युतिमप्रमेयं॥१७॥
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं॥ त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे॥१८॥ रामराम रामराम राम

बाहवः उदराणि वक्त्राणि नेत्राणि च यस्य तं त्वां सर्वतोऽनंतरूपं सर्वतः अनंतानि रूपाणि यस्य तं त्वां पश्यामि॰ तव पुनः आदिं मध्यं अंतं न पश्यामि
॥१६॥ हे देव अहं त्वां एवंविधं पश्यामि॥ कथंभूतं त्वां किरीटिनं रत्नखचितमुकुटाभरणयुक्तं गदिनं गदायुधविशेषयुक्तं चक्रिणं चक्रायुधहस्तं
तेजोराशिं तेजसां पुंजयुक्तं सर्वतः सर्वासु दिक्षु दीप्तिमंतं स्वदीप्त्या सर्वप्रकाशकं समंतात् दुर्निरीक्ष्यं दुःखेन द्रष्टुं शक्यं दीप्तानलार्कद्युतिं दीप्तयोः
अनलार्कयोः अग्निसूर्ययोः द्युतिरिव द्युतिः तेजो यस्य तं दीप्तानलार्कद्युतिं अप्रमेयं सकलप्रमाणागोचरं ॥१७॥ यस्मादेवं तव अद्भुतं कर्तृत्वं तस्मा
देव वितर्कयामि॥ त्वमक्षरमिति॥ वेदितव्यं ज्ञेयं परमं अक्षरं अविनाशि ब्रह्म त्वमेवासि अस्य विश्वस्य जगतः परं निधानं परमं आश्रयः त्व
मेवासि अव्ययस्त्वं शाश्वतधर्मगोप्ता शाश्वतस्य नित्यस्य धर्मस्य गोप्ता पालकः सनातनः चिरंतनः पुरुषः मे मम त्वमेव मतः ॥१८॥ रामरामरामराम

गीतासटी० ॥ हे भगवन् त्वामेवंविधं पश्यामि कथंभूतं अनादिमध्यांतं न विद्यते आदिः मध्यं अंतो यस्य स तं उत्पत्तिस्थितिविनाशरहितं अनंतवीर्यं यस्य स ॥
॥३५॥ तं अनंतबाहुं अनंताः बाहवो यस्य स तं शशिसूर्यनेत्रं शशी च सूर्यश्च शशिसूर्यौ चंद्रादित्यौ नेत्रे यस्य स तं दीप्तहुताशवक्त्रं दीप्तो हुताशो वह्नि-
र्वक्त्रं यस्य स दीप्तहुताशवक्त्रः तं स्वतेजसा स्वकीयेन तेजसा इदं समस्तं विश्वं तपंतं संतापयंतं ॥१९॥ हे महात्मन् हि यस्मात् द्यावापृ-
थिव्योः इदं अंतरिक्षं मध्यभागं त्वया एकेन विश्वरूपेण व्याप्तं तथा सर्वा दिशश्च व्याप्ताः तव इदं उग्रं क्रूरं अद्भुतं विस्मायकं रूपं दृष्ट्वा लोकत्रयं प्र-
व्यथितं भीतं चलितं च ॥२०॥ इदानीं सर्वं यद्वा जयेम यदि वा नो जयेयुरिति अर्जुनस्य जयपराजयसंशयविषयं वचनं तत्र निर्णयाय पांडवपक्षे एकांति-
कं जयं दर्शयति ॥ भगवंतं प्रपन्ना अर्जुनादयः ॥ अमी हीति ॥ हि यस्मात् अमी युध्यमानाः योधाः सुरसंघाः वस्वादिदेवसमूहाः भूभारावतारायमनुष्यरूपेण

॥ अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं ॥ पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं ॥१९॥ द्यावापृथिव्योरिदमंतरं ॥
हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥ दृष्ट्वाद्भुतं रूपमिदमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन् ॥२०॥ अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांज-
लयो गृणंति ॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवंति त्वां स्तुतिभिः पुष्कलाभिः ॥२१॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्म- श्री
पाश्च ॥ गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥२२॥ रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादं ॥ बहूदरं बहुदंष्ट्रा-
करालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं ॥२३॥

अवतीर्णाः त्वां विशंति ॥ त्वयि प्रविशंतो दृश्यंते केचिद्भीताः प्रांजलयः गृणंति । महर्षिसिद्धसंघाः महर्षीणां भृग्वादीनां सिद्धानां कपिलादीनां संघाः
समूहाः उक्त्वा पुष्कलाभिः संपूर्णाभिः त्वद्गुणकीर्तनलक्षणाभिः त्वां स्तुवंति ॥२१॥ रुद्राः शंकरप्रभृतयः एकादश आदित्याः द्वादश वासवः अष्टौ
साध्याः द्वादश विश्वेदेवाः त्रयोदश अश्विनौ द्वौ मरुतः एकोनपंचाशत् ऊष्मा नानापीवंतीति ऊष्मपाः पितरः गंधर्वाः हाहाहूहूप्रभृतयः यक्षाः
कुबेरप्रभृतयः असुराः विरोचनप्रभृतयः सिद्धाः कपिलादयस्तेषां संघाः विस्मयापन्नाः सर्वे त्वां पश्यंति ॥२२॥ विस्मयहेतुमाह ॥ रूपमिति ॥
हे महाबाहो ते तव बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं दंष्ट्राभिः करालं विकटं महत् परमाणीतीते ॥ एवंविधं त्वदीयरूपं दृष्ट्वा ॥३५॥
अयनेन सर्वे लोकाः प्रव्यथिताः ॥ तथाहमपि प्रव्यथितः चलितोऽत्रीतः ॥२३॥ रामरामरामराम राम रामरामराम रामराम रामराम रामराम रामराम

वर्ण्याताहितिविनानितुपलब्धजगतः विश्वदर्शकाख्याण ... स्वनिशयस्कृति ।

लोकानां आत्मनश्च प्रव्यथनेकारणमाह ॥ नभःस्पृशमिति ॥ हि यस्मात् ॥ हे विष्णो अहं त्वां एवं दृष्ट्वा प्रव्यथितांतरात्मा प्रव्यथितः प्रणीतः अंतरात्मा मनो
यस्य स तथाभूतः धृतिं धैर्यं न विंदामि ॥ च पुनः शमं तुष्टिं न लभे ते कथंभूतं त्वां नभःस्पृशं घनस्पर्शं दीप्तं ज्वलितं अनेकवर्णं अनेके भयंकरा वर्णा आका
रा यस्मिन् तं व्यात्ताननं विवृतमुखं दीप्तविशालनेत्रं ज्वलितविस्तीर्णलोचनं ॥२४॥ धृतिशमयोरभावे कारणमाह ॥ दंष्ट्रेति ॥ च पुनः दंष्ट्राकराला
नि दंष्ट्राभिः करालानि विकृतानि कालानलसंनिभानि प्रलयाग्निसदृशानि ते मुखानि दृष्ट्वैव अहं दिशः सर्वपि दिग्विभागेन दिशः न जाने दिग्मूढो
स्मि च पुनः शर्म सुखं न लभे हे देवेश जगन्निवास प्रसीद प्रसादं कुरु ॥२५॥ येभ्यः मम पराजयाशंका ■ प्राणासीत् सा अपगता इत्याह ॥ अमी चेति ॥
प वत्तिः ॥ च पुनः अमी सर्वे धृतराष्ट्रस्य पुत्राः दुर्योधनप्रभृतयः तथा भीष्मो द्रोणः असौ सूतपुत्रः कर्णः अवनिपालसंघैः राज्ञां समूहैः सहैव

॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं ॥ दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि शमं च विष्णो ॥२४॥ दंष्ट्राकरालानि च ते
मुखानि दृष्ट्वैव कालानलसंनिभानि ॥ दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥२५॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपा
लसंघैः ॥ भीष्मः द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥२६॥ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि केचिद्वि
लग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः ॥२७॥ यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति ॥ तथा तवामी नरलोकवीरा विशंति
वक्त्राण्यभिविज्वलंति ॥२८॥ यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ॥ तथैव नाशाय विशंति लोकास्तवापि वक्त्राणि समृ
द्धवेगाः ॥२९॥

अस्मदीयैरपि धृष्टद्युम्नप्रभृतिभिः योधमुख्यैः सह त्वरमाणाः त्वां विशंति ॥२६॥ ते त्वरमाणाः दंष्ट्राकरालानि दंष्ट्राभिः विकृतानि भयानि का ॥
नि भयंकराणि वक्त्राणि विशंति ॥ तव मुखप्रविष्टा नामध्ये केचित् चूर्णितैः उत्तमांगैः शिरोभिः दशनांतरेषु दंतविवरेषु विलग्नाः प्रसक ॥
लाइवत्संदृश्यंते ॥२७॥ भगवन्मुखप्रवेशदृष्टांतेन योजयति ॥ यथा नदीनां बहव अनेके अंबुवेगाः समुद्रमेवाभिमुखाः द्रवंति विशंति ॥ तथा तव
अमी भीष्माद्यो नरलोकवीराः मनुष्यलोके शूराः तव वक्त्राणि विज्वलंति प्रकाशमानानि वक्त्राणि प्रविशंति ॥२८॥ अवशत्वेन प्रवेशेन नदीवेगदृष्टांत
उक्तो बुद्धिपूर्वकप्रवेशे सप्रयोजनदृष्टांतमाह ॥ यथा प्रदीप्तमिति ॥ यथा समृद्धवेगाः अतितरसा युक्ताः पतंगाः शलभाः प्रदीप्तं ज्वलनं नाशाय विशं ॥
ति ॥ तथैव लोकाः प्राणिनः नाशाय समृद्धवेगाः तव वक्त्राणि विशंति ॥ भगवान्वेष्टितेत्याह ॥२९॥ रामरामरामरामरामरामरामरामरामरामराम

श्री

गीतासटी०
॥३६

लेलीह्यसेति। हे विष्णो त्वं ज्वलद्भिर्दीप्यमानैर्वदनैः समग्रान् लोकान् समंतान् ग्रसमानः अंतः प्रवेशयन् लेलिह्यसे आस्वादयसि। तवोग्राः क्रूरा भासो दीप्तयः स्वते
जोभिः समग्रं जगत् आपूर्य प्रतपंति संतापयंति॥३०॥ यत एवं उक्तस्त्वमाव स्वांगेन तः तत्त्वरूपं कथयेत्याह॥ आख्याहीति॥ हे देववर मे प्रसीद आख्याहि॥ न
उग्ररूपं क्रूराकारो भवान् कः त्वं तस्मै नमोस्तु प्रसीद भवंतं त्वां आद्यं विज्ञातुं इच्छामि हि यस्मात् तव प्रवृत्तिं चेष्टां न प्रजानामि॥३१॥ एवं प्रार्थितः सन् श्री
भगवानुवाच॥ कालोस्मीति॥ लोकक्षयकृत् लोकक्षयकारी कालः अहं अस्मि प्रवृद्धः वृद्धिं प्राप्तः लोकान् समाहर्तुं संहर्तुं इह अस्मिन् काले प्रवृत्तः ये॥
प्रत्यनीकेषु अनीके प्रतियोद्धारः योद्धारः अवस्थिताः ते सर्वे भीष्मद्रोणप्रभृतयः ये त्वं अस्त्रकर्मासंकालेन सर्वेपि त्वां ऋते विना न भविष्यंति॥३२॥ यस्मादेवं
तस्मात् त्वं उत्तिष्ठ भीष्मद्रोणप्रभृतयो अतिरथा देवैरप्यजेयाः तेऽर्जुनेन जिताः इति यशो लभस्व केवलं पुण्येन हि ते साध्यते शत्रून् दुर्योधनप्रभृतीन्॥

॥लेलिह्यसे ग्रसमानः समंतात् लोकान्समग्रान् वदनैर्ज्वलद्भिः॥ तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो॥३०॥ आख्याहि मे को भवा॥
नुग्ररूपो नमोस्तु ते देववर प्रसीद। विज्ञातुमिच्छामि भवंतमाद्यं नहि प्रजानामि तव प्रवृत्तिं॥ श्रीभगवानुवाच॥ कालोस्मि लोकक्षयकृत् प्रवृद्धो लो
कान्समाहर्तुमिह प्रवृत्तः। ऋतेपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः॥३२॥ तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व
राज्यं समृद्धं। मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥३३॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्॥ मया हतांस्त्वं॥
जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्॥३४॥ संजय उवाच॥ एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी नमस्कृत्वा भूय एवाह कृष्णं
सगद्गदं भीतभीतः प्रणम्य॥३५॥

जित्वा समृद्धं राज्यं भुंक्ष्व एते मयैव पूर्वमेव अस्मो चीष्मकसो कारणं इति दर्शयता निहताः प्राणैर्वियोजिताः हे सव्यसाचिन् त्वं निमित्तमात्रं भव वामेनापि हस्तेन॥ व
शराणां क्षेपात् सव्यसाची उच्यते ऽर्जुन॥३३॥ न चैतद्धि मम तिपाभारो काभ्यासीत् तस्मापि न कार्यं स्यात्॥ द्रोणमिति॥ येषु येषु अर्जुनस्य आशंका तान्मयाह
तानिति भगवान् व्यपदिशति॥ द्रोणेति धनुर्वेदाचार्यो दिव्यास्त्रसंपन्नश्च मनन्ना विशेषतो गुरुः भीष्मः स्वच्छंदमृत्युः दिव्यास्त्रसंपन्नश्च परशुरामे
णद्वंद्वयुद्धं आपन्नश्च पराजितः तथा जयद्रथः यस्य पिता तपश्चरति यो मम पुत्रस्य शिरो भूमौ पातयिष्यति तस्यापि शिरः पतिष्यतीति॥ कर्णोपि वासव॥
दत्तायाः शक्त्या संपन्नः सूर्यपुत्रः कानीनो ऽर्यते। ता नामेव निर्दिष्टाः एतान् अन्यान् अपि योधवीरान् मया हतान् त्वं जहि मा व्यथिष्ठाः त्वं जेष्यसि का ॥३४॥
षी॥३४॥ ततो यद्वृत्तं तत् धृतराष्ट्रं प्रति संजय आह॥ एतदिति॥ किरीटी अर्जुनः केशवस्य एतत् पूर्वोक्तं वचनं श्रुत्वा कृतांजलिर्वेपमानः सन् नमस्कृत्वा॥
भूयः पुनरपि सगद्गदमेव भीतभीतः प्रणम्य सगद्गदमाह॥३५॥

स्

व स्म न्ति

यस्मात् अर्जुनस्तद्दर्शयति ॥ हे हृषीकेश तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन श्रुतेन जगत् प्रहृष्यति हर्षमुपैति । च पुनः अनुरज्यते अनुरागमुपैति । च पुनः ॥
रक्षांसि भीतानि दिशो द्रवन्ति ॥ सर्वे सिद्धसंघाः कपिलादीनां समूहः नमस्यन्ति तत् स्थाने युक्तं ॥ ३६ ॥ भगवतो हर्षादिविषयत्वे हेतुं दर्शयति ॥ कस्माच्च ते
न नमेरन् महात्मन् च पुनः ते तुभ्यं गरीयसे गुरुतराय कस्मात् हेतोः ते न नमेरन् नमस्कुर्युः यतो ब्रह्मणो हिरण्यगर्भस्यापि आदिकर्त्ता कारणं त्वं अतः
तस्मात् आदिकर्त्रे कथं न वं न नमस्कुर्युः ॥ अतः हर्षादीनां नमस्कारस्य च स्थाने त्वं नृत्तो विषय इत्यर्थः ॥ हे अनंत देवेश जगन्निवास यत् वेदांते षु परं अक्षरं श्रू
यते तत् त्वमसत् विद्यमानं च असत् अविद्यमानं कार्यं कारणं च तत् त्वं पुनरपि त्वमेवेति ॥ ३७ ॥ हे अनंतरूप त्वं आदिदेवः जगतः स्रष्टा त्वात् पुरि श
यनात् पुरुषः पुराणः चिरंतनः अस्य जगतः परं प्रकृष्टं निधानं निधीयते यस्मिन् तत्र अत्याहो जगत् सर्वं यस्मिन्निति परं निधानं वेत्ता असि सर्वस्य ज्ञाता असि

॥ अर्जुन उवाच ॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च ॥ रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः ॥ ३६ ॥ कस्माच्च ते न
मेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ॥ अनंत देवेश जगन्निवास त्वमक्षरं सदसत् तत्परं यत् ॥ ३७ ॥ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य
परं निधानं ॥ वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणः शशांकः प्रजापतिस्त्वं प्रपितामहश्च ॥ नमो नमः
स्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥ नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ॥ अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततो
वेद्यं ज्ञेयमपि त्वमसि परं प्रकृष्टं वैष्णवं पदं त्वमसि त्वया इदं विश्वं ततं व्याप्तं ॥ ३८ ॥ सर्वदेवात्मकत्वात् सर्वैः त्वमेव नमस्कार्य इति नमस्कुर्वन् स्त्व ऽसि सर्वः ॥ ४० ॥
यमपि नमस्कुर्वन् आह ॥ वायुरिति ॥ हे भगवान् वायुः यमः अग्निर्वरुणः शशांकः प्रजापतिः च पुनः प्रपितामहः त्वं । ते तुभ्यं नमः नमः अस्तु पुनश्च भूयो
पि ते तुभ्यं नमो नमः अस्तु सहस्रकृत्वः सहस्रवारान् पुनः पुनः नमस्कारः तेन आत्मनो भक्तिं श्रद्धातिशयं दर्शयति ॥ ३९ ॥ किंच ॥ नम इति ॥ हे भगवन् ते तु
भ्यं पुरस्तात् पूर्वस्यां दिशि नमः अथ पृष्ठतः पश्चिमायां दिशि ते तुभ्यं नमोऽस्तु हे सर्व सर्वत एव सर्वासु दिक्षु ते तुभ्यं नमः हे अनंतवीर्य अनंतवीर्यं सामर्थ्यं यस्य स अनंतवीर्यः त्वं अमितविक्रम अमितः विक्रमः पराक्रमो यस्य स त्वं सर्वं समस्तं जगत् समाप्नोषि सम्यक् एकेनात्मना व्याप्नोषि ततः तस्मा
त्त्वं सर्वोऽसि त्वद्विना भूतं न किंचिदस्तीत्यर्थः ॥ ४० ॥ ७

गीताम०
३३

वि
॥ इदानीं भगवन्महात्म्यापरिज्ञानात् ॥ कृतं अपराधं क्षमयमानः आह ॥ सखेति ॥ हे कृष्ण मया तव इदं विश्वरूपं महिमानं महात्म्यं तव अजानता प्रमादात् प्रणया
द्वा अनेन चित्ततया प्रणयेन स्नेहेन तु सखा समानवयाः इति मत्वा यदुक्तं हे कृष्ण हे यादव हे सखेति प्रसभं हठात् तदुक्तं ॥४१॥ हे अच्युत च पुन
रवहासार्थं परिहासप्रयोजनाय एकः परोक्षः अथवा तत्समक्षं अन्यत् विहारशय्यासनभोजनेषु विहार क्रीडा शय्या शयनं आसनं ...
वेशनं भोजनं एतेषु असत्कृतः परिभूतोसि तत्सर्वं अपराधजातं अहं क्षामये अप्रमेयं अचिन्त्यप्रभावं त्वां क्षामये
... ॥४२॥ अचिन्त्यप्रभाव त्वमेवास्य पितासीति ॥ अस्य चराचरस्य स्थावरजंगमस्य सकलस्य जगतः त्वं पिता ज
जगतः त्वं पिता जनकः अतो बहु जनकः ... यतः त्वं गुरुः गरीयान् गुरुतरः यतः लोकत्रये त्वत्समः कोपि नास्ति अन्यः अधिकः कुतः अत इति अ
॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ॥ अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ॥४१॥ यच्चावहासार्थमसत्कृतोसि
विहारशय्यासनभोजनेषु ॥ एकोथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ॥४२॥ पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्ग
रीयान् ॥ न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्रभाव ॥४३॥ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं ॥ पितेव पुत्र
स्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ॥४४॥ अदृष्टपूर्वं हृषितोस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ॥ तदेव मे दर्शय देवरूपं प्रसीद देवेश जग
न्निवास ॥४५॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥ तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ॥४६॥ राम राम राम राम

रूपम अप्रमेयप्रभाव ॥४३॥ यस्मादेवं तस्मादिति ॥ तस्मात्कायं देहं प्रणिधाय भूमौ पातयित्वा प्रणम्य नमस्कृत्य अहं त्वां ईड्यं ईशं प्रसादये प्रसादं कारये हे
देव मम अपराधं सोढुं अर्हसि ॥ यथा पुत्रस्य अपराधं पिता सहते सखा सख्युः अपराधं सहते प्रियायाः अपराधं प्रियः सहते ॥४४॥ एवं क्षमाप्य प्रार्थयते ॥ अदृष्टपूर्व
मिति ॥ हे देव जगन्निवास अदृष्टपूर्वं तवेदं विश्वरूपं दृष्ट्वा हृषितोस्मि हृष्टोस्मि च अस्मात् भयेन मे मनः प्रव्यथितं प्रचलितं मे मम तदेव रूपं ॥३३॥
यत्पूर्वं तदेव दर्शय हे देवेश जगन्निवास प्रसीद ॥४५॥ तदेव रूपं विशेषतो दर्शयन्नाह ॥ किरीटिनमिति ॥ हे सहस्रबाहो अहं त्वां तथैव किरीटिनं गदिनं
चक्रहस्तं द्रष्टुमिच्छामि हे विश्वमूर्ते तेनैव चतुर्भुजरूपेण भव ॥४६॥

अर्जुनस्य भीतमुपलक्ष्य विश्वरूपमुपसंहृत्य प्रियवचनेनाश्वासयत् ॥ श्रीभगवानुवाच ॥ मयेति ॥ हे अर्जुन मया तव प्रसन्नेन इदं परं रूपं तेजोमयं तेजःस्वयं
विश्वं समस्तं अनंतं अंतररहितं आद्यं सर्वाद्यं आत्मयोगात् आत्मनः ऐश्वर्यसामर्थ्यात् दर्शितं यत् रूपं मे मम त्वदन्येन दृष्टपूर्वं ॥४७॥ एतद्दर्शनं प्रति दुर्ल्ल
भत्वं अलंकृतातिदुर्लभत्वमाह ॥ न वेदेति ॥ हे कुरुप्रवीर अहं नृलोके मनुष्यलोके एवं सर्वदर्शितरूपः त्वदन्यो अर्जुन शक्यः न वेदयज्ञाध्ययनैः
चतुर्णामपि वेदयज्ञाध्ययनेन यद्वा वेदानां यज्ञविद्यानां कल्पसूत्रादीनां चाध्ययनेन च क्रियाभिः अग्निहोत्रादिः श्रौतस्मार्तादिभिः न दानैः न उग्रैः
घोरैः तपोभिः चांद्रायणादिभिः द्रष्टुं शक्यः ॥४८॥ मा यदि एवं रूपं घोररूपं दृष्टुं तव व्यथा जायते ॥ तर्हि तव प्राक्तनं भूतं रूपं दर्शयामीत्याह ॥ मातेति ॥
हे अर्जुन मे मम ईदृक् घोररूपं दृष्टुं ते तव व्यथा भयं मा भूत् मा च विमूढभावो विमूढचित्तता मा भूत् व्यपेतभीः विगतभयः प्रीतिमनाः पुनः त्वं

॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ॥ तेजोमयं विश्वमनंतमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥४७॥ न वेदयज्ञा॥
ध्ययनैर्न दानैः न च क्रियाभिर्न तपोभिरुग्रैः ॥ एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥४८॥ मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृ
ङ्ममेदम् ॥ व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य ॥४९॥ संजय उवाच ॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः ॥ आ
श्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥५०॥ अर्जुन उवाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ॥ इदानीमस्मि संवृत्तः ॥
सचेताः प्रकृतिं गतः ॥५१॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ॥ देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः ॥५२॥ नाहं
वेदैर्न तपसा न दानेन न चेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥५३॥ राम राम राम राम राम रामराम राम राम राम राम राम रामराम राम राम

वचनं भुजे रोऽस्य च भगवदाधारे तव इदं मे मम इदं रूपं प्रपश्य ॥४९॥ एवं भक्तोऽप्राकृतं नयेवरूपं दर्शितवान् ॥ इति संजयः ॥ इत्यर्जुनमिति ॥ वासुदेवः अर्जुनं तथे
ति ॥ तथाभूतवचनेनोक्त्वा भूयः पुनरपि स्वकं रूपं वसुदेवगृहे जातं दर्शयामास च पुनः महात्मा पुनः सौम्यवपुर्भूत्वा एनं भीतं आश्वासयामास ॥५०॥ त
तो निवर्तमानभयः अर्जुन उवाच ॥ दृष्ट्वेदमिति ॥ हे जनार्दन तव इदं सौम्यं मानुषं रूपं दृष्ट्वा इदानीं अधुना सचेता प्रसन्नचित्तः संवृत्तः संजातः प्रकृतिं स्वा॥
भाविकं गतश्चास्मि ॥५१॥ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वं दर्शयन् ॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिति ॥ हे अर्जुन मम इदं रूपं सुदुर्दर्शं अपि त्वं दृष्टवान् असि यत् देवा
अपि देवा अपि अस्य रूपस्य नित्यं दर्शनकांक्षिणो भवंति ॥५२॥ वेदैः ऋग्यजुःसामाथर्वादिभिः तपसा कृच्छ्रेण चांद्रायणादिना न दानेन गोभूहिरण्यादिना न च
इज्यया यज्ञेन अश्वमेधादिना एवंविधः अहं द्रष्टुं न शक्यः यथा त्वं मां दृष्टवानसि ॥५३॥

गीता०
३८

देवैरपि मत्कर्दर्शं तपोयज्ञादिकोटिभिः न शक्यं जनानामेवं विश्वरूपमदर्शयत् निर्गुणोपासनस्यैव सगुणोपासनस्य च श्रेयः कतरदिति संविनि
श्रेयस्काम लेतुं द्वादशोऽध्यायः १

॥ केनोपायेन तर्हि द्रष्टुं शक्योसीत्यत आह ॥ भक्त्येति ॥ हे अर्जुन तु पुनः अहं एवंविधः अनन्यया न अन्या न विद्यते यस्यां सा अनन्या भक्त्या न तया सर्वैरपि क॥ रणैः वासुदेवादन्यत् नोपलभ्यते ॥ तत्त्वेन तत्त्वतः यथास्थितं द्रष्टुं च शक्यः तत्त्वतो ज्ञातुं प्रवेष्टुं परमे स्वरूपे एकीभावं गंतुं च परंतप ॥५४॥ इदानीं सर्वस्य गीता शास्त्रस्य सारभूतोऽर्थः निःश्रेयसार्थं अनुष्ठेयत्वेन समुच्चित्याह ॥ मत्कर्मकृदिति ॥ हे पांडव यः मत्कृते मदर्थं कर्म तत्करोतीति मत्कर्मकृत् मत्परमः अहं परमा गतिर्यस्य सः मत्परमः मामेवं प्रकारेण जनतप्रति ॥ मद्भक्तः धनपुत्रक्षेत्रेषु संगवर्जितः प्रीतिस्नेहवर्जितः सकलभूतेषु निर्वैरः शत्रुभाव रहितः आत्मनः अत्यंतापकारेष्वपि तेष्वपि निर्गतवैरः यः स एवंभूतो मद्भक्तः मामेति प्राप्नोति नान्य मामेव तस्य परमा गतिः ॥५५॥ ॥इति एकादशोऽध्यायः॥ ११ ॥
द्वितीयादिषु विभूत्यंतेषु विधास्तस्मद्वेपाधे ब्रह्मण अक्षरस्य उपासनमुक्तं तेषां ज्ञानी नित्ययुक्तः सर्वं ज्ञानमेवेति तत्त्वे निर्गुणोपासनस्य श्रेष्ठ

॥ न तथा त्वनन्यया शक्य अहमेवंविधोऽर्जुन ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥५४॥ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥५५॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपयोगो नाम एकादशोऽध्यायः ॥ ११ ॥ अर्जुन उवाच ॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ॥ ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥ श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ॥ श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥ रामराम रामराम रामराम रामराम

त्वयुक्ते एकादशे वा एतत् अक्षरं आद्यं समस्तजगदात्मरूपं त्वदीयं विश्वरूपं मत्कर्मकृदित्यनेन तत्सगुणदर्शनस्य श्रेष्ठत्वमुक्तवान् अंतः अनयोः उभयोः पक्षयोः श्रेष्ठतरं बुभुत्सया अर्जुन उवाच एवमिति ॥ एवं सततेति ॥ ये भक्ता अनन्यशरणाः एवं पूर्वोक्तप्रकारेण मत्कर्मकृदिति श्लोकोक्तमार्गेण त्व॥ त्कर्मकरणादिपरायणा नैरंतर्येण सततयुक्ताः त्वां पूर्वोक्तविश्वरूपं पर्युपासते ॥ येऽपि त्यक्तसर्वैषणाः सन्न्यस्तसर्वकर्माणः सर्वोपाधिरहितमक्षय मक्षरं योगोक्तमक्षरं ब्रह्म पर्युपासते पर्युपासनं कुर्वन्ति मनस्तद्विषयं कृत्वा दीर्घकालं नैरंतर्येण तैलधारावत् अविच्छिन्नतया ज्ञानकरणं पर्युपासनं तेषां उभयेषां मध्ये के योगवित्तमाः अतिशयेन योगविदः इत्यर्थः ॥१॥ द्वयोर्मध्ये सगुणोपासनस्य सुकरत्वात् तेषां श्रेष्ठत्वं वक्तुं आह ॥ मय्यीति परमेश्वरे विश्वरूपे मनः आवेश्य समाधाय मां सर्वयोगेश्वराणामीश्वरं सर्वज्ञं विमुक्तरागादिक्लेशं राजादिति मिरदृष्टिं ये नित्ययुक्ताः मत्कर्मकृदित्यादि श्लोकोक्त मार्गेण नित्यं वर्तमानाः परया श्रद्धया आस्तिक्यबुद्ध्या उपेताः युक्ताः उपासते ते मे मम युक्ततमाः सर्वदा मच्चित्तत्वात् मम मताः अभिप्रेताः ॥२॥ रामरामराम ॥३८

अत

तर्हि निर्गुणोपासकाः किं न श्रेष्ठा इत्याशंक्याह ॥ ये त्विति ॥ द्वाभ्यां ॥ तु पुनः ये इंद्रियग्रामं इंद्रियसमुदायं उपसंहृत्य सर्वत्र सर्वान् सर्वस्मिन् काले इष्टानि
ष्टप्राप्तौ समबुद्धयः संतः अनिर्देश्यं शब्दागोचरं अव्यक्तं प्रमाणागोचरं सर्वत्रगं व्योमवद्व्यापितं अचिंत्यं अव्यक्तत्वादेव कूटस्थं कूटायां अतः
असारत्वाद्दोषवत्त्वाद्बहिर्गुणवदाभासमानायां अविद्यायां मायायां स्थितं अथ कूटमिव राशिरिव स्थितं एव अचलं चलनवर्जितं ध्रुवं नित्यं
अक्षरं ब्रह्म उपासते पर्युपासनं कुर्वंते ॥३॥ ये इंद्रियग्रामं इंद्रियसमुदायं संनियम्य उपसंहृत्य सर्वत्र समबुद्धयः सर्वस्मिन् काले इष्टानिष्टप्राप्तौ
समबुद्धयः सर्वभूतेषु संतमांत्रुपेति ॥ ते पि ते सर्वभूतहिते रताः मामेव प्राप्नुवंति ॥४॥ तर्हि द्वयोर्मध्ये को विशेष इति जिज्ञासायां क्लेश इति विशे
षमाह ॥ क्लेश इति ॥ त्रिभिः ॥ तेषां अव्यक्तासक्तचेतसां अक्षरोपासकानां क्लेशः प्रयासः अधिकतरः देहाभिमानपरित्यागनिमित्तः क्रियमाणात् अव्य

॥ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ॥ सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं ॥३॥ संनियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव
सर्वभूतहिते रताः ॥४॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां ॥ अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥ ये तु सर्वाणि कर्माणि म
यि संन्यस्य मत्पराः ॥ अनन्येनैव योगेन मां ध्यायंत उपासते ॥६॥ तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ भवामि न चिरात्पार्थ मय्यावेशितचे
तसां ॥७॥ मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ॥ निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥ राम रामराम राम रामरामरामरामराम।

काक्षरात्मिका गतिः देहवद्भिः देहाभिमानवद्भिः दुःखेन प्राप्यते अतएव अधिकतर क्लेशः ॥५॥ सगुणोपासकानां मद्भक्तानां मत्प्रसादादनाया
सेनैव सिद्धिर्भवतीत्याह ॥ ये तु सर्वाणीति ॥ तु पुनः सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येनैव योगेन न विद्यते अन्यत् विश्वरूपं देवं आ
त्मानं प्रका आलंबनं यस्य स अनन्यस्तेन अनन्येनैव योगेन समाधिना ध्यायंत उपासते ॥६॥ तेषां फलमाह ॥ तेषामिति ॥ हे पार्थ अहं तेषां मयि
आवेशितचेतसां मृत्युसंसारसागरात् मृत्युयुक्तः संसारः स एव दुस्तरत्वात् सागरस्तस्मात् मृत्युसंसारसागरात् न चिरात् क्षिप्रमेव समुद्धर्ता भवा
मि ॥७॥ यस्मादेवं तस्मात् ॥ मय्येवेति ॥ मनः संकल्पात्मकं मय्येव विश्वरूपे ईश्वरे आधत्स्व स्थापय बुद्धिं निश्चयात्मिकां मयि ईश्वरे निवेशय
अतः परं अत ऊर्ध्वं देहपातोत्तरकालं मय्येव निवसिष्यसि निवासं करिष्यसि ॥८॥ रामरामरामराम

॥अत्राशक्तस्यातिसुगमोपायमाह॥ अथेति॥ हे धनंजय अथवा एवं मदुक्तप्रकारेण चित्तं मयि विश्वरूपे समाधातुं स्थापयितुं स्थिरं अचलं कर्तुं न शक्नोषि चे
त् ततः पश्चात् अभ्यासयोगेन चित्तस्यैकस्मिन्नालंबने सर्वतः समाहृत्य पुनः स्थापनमभ्यासः तद्युक्तेन योगेन मनःसमाधानलक्षणेन मां विश्वरू
पं आप्तुं इच्छ प्रार्थयस्व॥९॥ अभ्यासासामर्थ्ये पक्षांतरमाह॥ हे अर्जुन यदि त्वं अभ्यासेऽपि असमर्थोऽसि तर्हि मत्कर्मपरमो भव मदर्थं कर्म मत्कर्म प्रीत
्यर्थं हरिकं पदेवयजनार्चनादिकं यमनियमादिरूपं मदर्थं क्रियमाणं कर्म मत्कर्म तत्परमः प्रधानो भव मदर्थमपि कर्माणि कुर्वन्॥
सिद्धिं सत्त्वशुद्धिं योगज्ञानप्राप्तिद्वारेण अवाप्स्यसि॥१०॥ कर्मानुष्ठानेऽपि निराशायां मयि योगं संकेत्य पक्षांतरमाह॥ अथैतदपीति॥ अथ पुनरेतदपि
यदुक्तं मत्कर्मपरमत्वं तत्कर्तुं अशक्तोऽसि मद्योगमाश्रितः क्रियमाणानि कर्माणि मयि संन्यस्य मत्कर्म तेषां अनुष्ठानं नाम योगः तं आश्रितः सन्

॥अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं॥ अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय॥९॥ अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव॥ मदर्थमपि क
र्माणि कुर्वन्सिद्धिमवाप्स्यसि॥१०॥ अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः॥ सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥११॥ श्रेयो हि ज्ञान दि
मभ्यासात् ज्ञानाद्ध्यानं विशिष्यते॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं॥१२॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च॥ निर्ममो निरहंका
रः समदुःखसुखः क्षमी॥१३॥ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥१४॥ राम राम राम राम राम राम

ततः सर्वकर्मफलत्यागं सर्वेषां कर्मणां फलसंन्यासं यतात्मवान् संजितचित्तः सन् कुरु॥११॥ इदानीं सर्वकर्मफलत्यागं स्तौति॥ श्रेयेति॥ हि यस्मात् अवि
वेकपूर्वकात् अभ्यासात् ज्ञानं श्रेयः तस्मात् ज्ञानात् ज्ञानपूर्वकं ध्यानं श्रेयः ज्ञानयुक्तात् ध्यानात् अपि कर्मफलत्यागो विशिष्यते। यथोक्तात् कर्मफल
त्यागात् अंतःकरणशुद्धिद्वारेण ततः परां शांतिं॥ मोक्षं तु कस्य संसारस्य उपरमो भवति॥१२॥ एवंभूतस्य भक्तस्य हितमेव परमेश्वरप्रसादहेतून् धर्मा॥
आह॥ अद्वेष्टेति॥ सर्वभूतानां अद्वेष्टा सर्वेषां आत्मत्वेन पश्यन् आत्मनो दुःखहेतुष्वपि न द्वेष्टि मैत्रः मित्रतया युक्तः करुणः दयालुः ममत्वबु
द्धिरहितः निर्ममः अहंबुद्धिरहितः निरहंकारः सुखदुःखं च यस्य समे द्वेषरहितः समदुःखसुखः आक्रुष्टोऽहतो वा विक्रियारहितः क्षमी॥१३॥ सर्वदा सं ॥३९॥
जातो न यो लाभः सदा संतुष्टः समाहितचित्तः योगी संयतस्वभावः यतात्मा आत्मतत्वविषये दृढनिश्चयः यस्य विषयेऽर्पिते मनोबुद्धी संकल्पविकल्पा॥
त्मिकं मनः व्यवसायात्मिका बुद्धिः ते मनोबुद्धी मयि अर्पिते येन स मयि अर्पितमनोबुद्धिः एवंविधो यो मद्भक्तः स मे प्रियः॥१४॥ राम राम

ईयद्यपिआत्मानित्यइतिजानतःआत्मनाशनिमित्तोशोकमोहौनसंभवतःशोकअंतःकरणपरितापःमोहअविवेकःतथापितद्देहवियोगजःसुख
वियोगजःदुःखसंयोगनिमित्तोशोकमोहौसंभवतइतिअर्जुनस्यवचनमाशंक्याह।।मात्रेतिमीयंतेशब्दादयोविषयायाभिःतामात्राश्रोत्रादीनिइंद्रिया
णितस्यस्पर्शइतिस्पर्शःशब्दादयोविषयाःमात्राश्चस्पर्शाश्चमात्रास्पर्शाअथवामात्राणांइंद्रियाणांस्पर्शाःशब्दादिभिःसंयोगाःतेमात्रास्पर्शाःशी
तोष्णसुखदुःखदाःशीतंउष्णंसुखंदुःखंप्रयच्छंतीतिआगमापायिनःउत्पत्तिविनाशशीलाःअतएवअनित्याःतस्मात्तानतितिक्षस्वहे

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाःआगमापायिनोनित्यास्तांस्तितिक्षस्वभारत १४ यंहिनव्यथयंत्येतेपुरुषंपुरु
षर्षभसमदुःखसुखंधीरंसोमृतत्वायकल्पते १५

सहस्वहेभारततेषुहर्षविषादंमाकार्षीःहेकौंतेयत्वंपुनःमात्रास्पर्शाःशीतोष्णसुखदुःखदाःआगमापायिनःअनित्याःयथा
जलातपादिसंसर्गास्तत्कालत्वतःस्वभावतःशीतादिप्रयच्छंतिअतएवभारततान्तितिक्षस्व १४ ननुतत्प्रतीकारप्रय
त्नादपितत्सहनमेवउचितंयतःतत्सहनेनिरतिशयफलत्वात् यंहीतिहेपुरुषर्षभयस्मात्एतेशीतोष्णादयःविष
याःइंद्रियाणिचयंआत्मदर्शिनंसमदुःखसुखंसमेसुखदुःखेयस्यसःतंसुखदुःखप्राप्तौहर्षविषादरहितंधीरंधीम
तंपुरुषंनव्यथयंतिनचालयंतिसःज्ञानीदृढसमाधिमुमुक्षुःअमृतत्वायमोक्षायकल्पतेसमर्थोभवति १५ श्रीकृष्णायनमः॥ राम

कालत्रयसत्तानिरूपणेन आत्मनो नित्यत्वं साधयति न त्वेवाहमिति यथाहं परमेश्वरो जातु कदाचिल्लीलाविग्रहस्याविर्भावतिरोभावेपि तो
तु पुनः जातु कदाचित् अहं न आसं किंतु आसमेव अतीतेषु देहोत्पत्तिविनाशेषु नित्य एव अजत्वमित्यर्थः तथा न त्वं आसीः किंतु आसी
रेव तथा न इमे जनाधिपाः नृपाः आसन् किंतु आसन्नेव तथा च वयं सर्वे अतः अस्मात देहपातात् परं उत्तरकालेपि न भविष्यामः किंतु भ मः
विष्याम एव आत्मस्वरूपेण त्रिष्वपि कालेषु वयं सर्वे नित्या एव अत्र वयं सर्वे इत्यत्र देहभेदानुवृत्त्या बहुवचनम् नात्मभेदाभिप्रायेण तत्र कथं ए
व नित्य आत्मेति दृष्टांतं वक्ष्यामि १२ परमात्मनो नित्यत्वेपि जीवानां जन्ममरणयोः प्रसिद्धत्वात् कथं नित्यत्वमित्याशंक्याह दृष्टांतेन आत्मनो

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः न चैव न भविष्यामः सर्वे वयमतः परं १२ देहिनोस्मिन्यथा देहे कौमारं यौवनं जरा तथा
देहांतरप्राप्तिर्धीरस्तत्र न मुह्यति १३

ज्ञानी तत्र तयोर्देहनाशोत्पत्त्योर्न मुह्यति १३॥ आत्मैव जातो मृतश्चेति न मन्यते

नित्यत्वं साधयति देहिनोस्मिन्निति देहिनो देहवतः आत्मनः अस्मिन्वर्त्तमाने देहे यथा येन प्रकारेण कौमारं बाल्यावस्था यौवनं मध्यमावस्था।
जरा जीर्णावस्था देहनिबंधना एव न तु स्वतः इति एतास्तिस्रो अवस्थाः अन्योन्यविरुद्धरूपेण अविकृतस्यैव आत्मनो भवंति पूर्वावस्थानाशे यथा
त्मनो न नाशः उत्तरावस्थोपजने आत्मनः तदुपजननं तद्वदेव वर्त्तमानदेहात् देहांतरप्राप्तिः अविक्रियस्य आत्मनः भवति स एवाहं इति प्रत्यभिज्ञानात् त
त्रैवं सति धीरो ज्ञानी मोहं नोपपद्यते जातमात्रस्य पूर्वसंस्कारेण स्तन्यपानादौ प्रवृत्तिदर्शनात् लिंगदेहनिबंधनानन्तुतादैवतात्मनो नाशः तत्रैवं सति धीरो

ततः किं वृत्तमित्यपेक्षायामाह तमुवाचेति हे भारत हृषीकेशः श्रीनारायणः प्रहसन्निव प्रसन्नवदनः सन् उभयोः सेनयोर्मध्ये वि
षीदंतं विषादं कुर्वंतं तं अर्जुनं प्रति इदं वक्ष्यमाणं वचः वाक्यमुवाच १० देहात्मनोरविवेकात् अहंकारपूर्वकौ शोकमोहौ संजा
तौ अर्जुनस्य दृष्ट्वा आत्मज्ञानमंतरेण तयोर्निवृत्तिर्न भवतीति देहादिभ्यो भेदेन आत्मानं दर्शयितुं आह अशोच्यानिति हे श्री
अर्जुन त्वं अशोच्यान् सद्वृत्तान् परमार्थस्वरूपेण नित्यान् भीष्मद्रोणादीन् अत एव अशोच्यान् तान् अन्वशोचः अनुशोचितवा
नसि ते भीष्मद्रोणादयः मन्निमित्तं म्रियंते तैर्विना मे राज्यसुखादिना किं करिष्यामीति कुतस्त्वा कश्मलमिदं विषमे समुप॥ ल
स्थितं इत्यादिना मया बोधितोपि च पुनः प्रज्ञावादान् बुद्धिमतां वचनानि भाषसे वादान् शब्दान् कथं भीष्ममहं संख्ये इत्यादीन् के ८ न

तमुवाच हृषीकेशः प्रहसन्निव भारत सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः १० अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च अ०च्यानुवाच
भाषसे गतासूनगतासूंश्च नानुशोचंति पंडिताः ११

च त्वं भाषसे न तु पंडितोसि न तदेतन्मौढ्यं पांडित्यं च विरुद्धमात्मनि दर्शयसि अतस्त्वं उन्मत्त एवेति अभिप्रायः यस्मात् पंडिताः आ
त्मज्ञाः गतासून् गतप्राणान् अगतासून् अगतप्राणान् च अनुशोचंति यतस्ते पंडिताः गताः कस्त्वं अगताः कस्त्वं वा आत्मनो अन्यथा भावं न पश्यं
तीत्यर्थः परमार्थतस्तु ते नित्याः अशोच्याः तान् त्वं अनुशोचसि अतो मूढोसि कुतस्ते अशोच्याः यतो नित्याः कथं इत्याह ११ शिवाय नमः हल

त्वमेव विचार्य युक्तं तत् कुर्विति चेत् तत्राह ॥ नहीति क्षत्रियाणां युद्धं स्वधर्म इति तदेव निश्चयेन कर्त्तव्यमिति जग।
दुपदेशं स्वयं त्वया कृतं इत्याह ॥ युद्धे क्रियमाणे जयस्तावत् पाक्षिकः निश्चियपक्षेपि युद्धफलं भूमौ राज्यं तच्च असपत्नं निःकंटकं
ऋद्धं च तत् अवाप्यापि न यत् मम शोकं मदीयं यत्कर्म अपनुद्यात् अपनयेत् तदहं न प्रपश्यामि यत् मम शोकं अपनुद्यात् किं।

न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणां अपि चाधिपत्यं ८।
संजय उवाच एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ९

विशिष्टं शोकं इंद्रियाणां उच्छोषणं अतिशोककरं न केवलं भूमौ राज्यं शोकविच्छेदकं न भवति सुराणामपि आधिपत्यं युद्धे मरणे स्वर्गे प्राप्तं ए
इति जन्मांतरेपि स्वजनवधनिमित्तं शोकं शांतिं न प्रपश्यामि इत्यर्थः भूमौ असपत्नं ऋद्धं राज्यं च अपरं सुराणामपि आधिपत्यं अवाप्य य
त्कर्मकृतं सन्मम इंद्रियाणामुच्छोषणं शोकं अपनुद्यात् अपनयेत् तत् न हि प्रपश्यामीत्यन्वयः ८ एवमुक्त्वा अर्जुनः किं कृतवानित्या मु
गुडाकेशो पेक्षायामाह एवमिति गुडाका निद्रा तस्या ईशः अर्जुनः हृषीकेशं कृष्णं प्रति एवं पूर्वोक्तप्रकारेण कथं भीष्ममहं संख्ये योत्स्यामी
त्यादि उक्त्वा हे परंतप हे धृतराष्ट्र अहं न योत्स्यामि इति युद्धं न करिष्यामीति गोविंदं प्रति उक्त्वा तूष्णीं मौनमाश्रितवान् बभूव ९ ततः किं।

कृष्ण
गी०
८

[illegible] किंच यदि अधर्ममपि अंगीकरिष्यामः तथापि अस्माकं जयः पराजयो वा भवेदिति न ज्ञायते अनुचतयोः कतरत् श्रेय इत्य
पि न ज्ञायत इत्याह न चैतदिति च पुनः एतत् वयं न विद्मः न जानीमः नो अस्माकं कतरत् किं नाम युद्धं हननं अहननं वा ग
रीयः अधिकतरं भविष्यतीति न विद्मः यद्वा एतान् वयं जयेम जेष्यामः यदि वा नोऽस्मान् एते जयेयुः जेष्यन्तीति न
विद्मः किंच अस्माकं जयोपि फलतः पराजय एवेत्याह यानेवेति किंच जयपक्षेपि जयप्रवृत्तिरस्माकं न युक्ता या
स्मात् यानेव धार्तराष्ट्रान् हत्वा वयं न जिजीविषामः एव न जीवितुमिच्छामः राज्यादिभोगस्य का कथा एव धार्तराष्ट्राः प्रमु
खे अग्रे युद्धार्थमवस्थितास्तावर्तन्ते ६ तस्मात् संशयनिर्णयं पृच्छतीति कार्पण्येति एतान् हत्वा कथं जीविष्याम इति कार्पण्यं
कार्पण्यमेव दोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं शाधि मां त्वां प्रप
न्नं ७ न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमिन्द्रियाणां अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि
चाधिपत्यं ८

एषं दोषश्च स्वकुलक्षयकृतः तास्तां उपहतः अभिभूतः स्वभावः शौर्यलक्षणो यस्य सोहं कार्पण्यमेव दोषोपह
तः स्वभावः अथवा कृपणस्य भावः कार्पण्यं दैन्यं अज्ञाननिमित्तो ज्योच्यतात देव दोषस्तेनोपहतः स्वभावः तत्त्वां पृच्छा
मिकथं न तः धर्मसंमूढचेताः धर्मे संमूढं चेतो यस्य विवेकविज्ञानानुदयात् अथवा धर्मसंमूढं युद्धं तत्त्वाभिक्षाटनम
पि क्षत्रियस्य धर्मो अधर्मो वेति संदिग्धं चेतः चित्तं यस्य सोहं धर्मसंमूढचेताः अतो यत् मे श्रेयः हितं स्यात् तत् निश्चितं ब्रू

हि किंच तेतव शिष्यः शासनार्हः अतः त्वां प्रपन्नं शरणमागतं मां शाधि शिक्षय ७॥
८

अहंनकातरत्वेनयुद्धंकुपरतोस्मिकिंतुयुद्धस्यअन्यायार्थत्वादितिकथमितिहेमधुसूदनअहंसंख्येसंग्रामेभीष्मंचपुनःद्रोणंइषुभिःकथं
प्रतियोत्स्यामीतिवक्तुंअनुचितंतौइषुभिःकथंप्रतियोत्स्यामीत्यर्थःअतस्तौपूजार्हौभीष्मद्रोणौप्रतिवाचापिनयोत्स्यामीति
।४ तर्हितवदेहस्थितिरपिनस्यातइतिचेन्नत्राह गुरूनितिहियस्मात्गुरूनअहत्वागुरवःशास्त्रार्थोपदेष्टारःमुख्यपाहत्या
पाहृतैःसंस्कृतैःश्रेवगाद्यपद्यापाहरैस्तथादेशान्मायादितिशिष्यंबोधयेत्सगुरुःस्मृतःइत्युक्तत्वात्४अन्येपितत्तुल्याजनकादयस्तेपि

अर्जुनउवाच कथंभीष्ममहंसंख्येद्रोणंचमधुसूदनइषुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन ४ गुरूनहत्वाहिमहा
नुभावान्श्रेयोभोक्तुंभैक्ष्यमपीहलोकेहत्वार्थकामांस्तुगुरूनिहैवभुंजीयभोगान्रुधिरप्रदिग्धान् ५ नचैतद्विद्मः
कतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुःयानेवहत्वानजिजीविषामस्तेवस्थिताःप्रमुखेधार्त्तराष्ट्राः ६

गुरवःतान्महानुभावान्द्रोणादीनगुरूनअहत्वापरलोकेविरुद्धंगुरुवधंअकृत्वाइहलोकेभैक्ष्यंभिक्षान्नमपिभोक्तुंश्रे
यःउचितंनकेवलंपरत्रदुःखंइहापिनरकदुःखंअनुभवितव्यंइत्याह्।।हत्वेतितुपुनःतानअर्थकामान्अर्थाभिलाषान्गु
रूनहत्वाइहअस्मिन्नेवशरीरेगुरूणांरुधिरेणप्रदिग्धान्प्रकर्षेणलिप्तान्अर्थकामात्मकान्मरणानंतरंनरकेजीवन्नेवभो ×

× भोगान्
भोक्ष्यान्नेजानेहाकष्टंभुंजीयभोक्ष्यामीत्यर्थः ५ तथाचयुधिष्ठिर
प्रतिभीष्मेणउक्तंअर्थस्यपुरुषोदासोदासस्त्वर्थोनकस्यचित
इतिसत्यंमहाराजबद्धोस्म्यर्थेनकौरवैरिति ५

गी॰ स॰ एवं सति मम सन्नमस्तु मेव आमाशत्रुत्वादर्जुनः यदि मामिति यदि शास्त्रपाणयः धार्त्तराष्ट्राः अप्रतीकारं प्रतिरुद्धं अकुर्वाणं मां

अशस्त्रं रणे संग्रामे हन्युः मां हनिष्यंतीति तर्हि तद्धननं मे मम क्षेमतरं पापस्य अनुत्पत्तेर्हेतोरत्यंतहितं तत् भवेत ४६ ततः किं वृत्तमित्यपे

७ क्षायामाह एवमिति अर्जुनः एवं उक्त्वा संख्ये संग्रामे रथोपस्थे रथस्योपरि स्थित्वा आगते उपविष्टः पाशात् उपविवेश किं कृत्वा शरेण बाणे

न वर्त्तमानं चापं धनुर्विसृज्य सशरं चापं विसृज्य तत्पाविश्यात् उपाविष्टः शोकसंविग्नमानसः शोकेन संविग्नं संतप्तं मानसं मनो यस्य स

सः एवंविधः सन् उपाविष्टः इत्यर्थः ४७ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अ॰ टि॰ प्रथम। वि

संजयोवाच

रणे यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः धार्त्तराष्ट्रा हन्युः स्तन्मे क्षेमतरं भवेत ४६ एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् विसृज्य स

शा शरं चापं शोकसंविग्नमानसः ४७ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादो

नु

श्रीभगवोवाच नाम प्रथमोध्यायः संजय उवाच तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं विषीदंतमिदं वाक्यमुवाच मधुसूदनः १ कुतस्त्वा

कश्मलमिदं विषमे समुपस्थितं अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन २ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते क्षु

ततः किं वृत्तमित्यपेक्षायां आह तं तथेति मधुसूदनः तं अर्जुनं तथा तेन प्रकारेण कृपयाविष्टं अश्रुपूर्णाकुलेक्षणं विषीदं

तं पूर्वोक्तप्रकारेण विषादं प्राप्नुवंतं प्रति इदं वक्ष्यमाणं वाक्यं वचनं उवाच १ तदेव तदा तस्मिन्काले एव इति आह कुतस्त्वेति वाक्यं दर्शयति क

श्मलं हे अर्जुन इदं कश्मलं मोहः कात् विषमे संकटे त्वां कुतो हेतोः समुपस्थितं प्राप्तं अनार्यजुष्टं अस्वर्ग्यं आर्यैः सेवितं अस्व

तस्मात्वया कर्त्तव्यं तदाह क्लैब्यमिति र्ग्यं स्वर्गस्य असाधनं अकीर्त्तिकरं अयशस्करं २ हे पार्थ क्लैब्यं मा स्म गमः कातर्यं मा प्राप्नुहि त्वयि विषये एतत् न उपपद्यते युक्तं न भवति हे परंतप क्षुद्रं तुच्छं

पिंडादिद्रव्यणां लिश्रुद्धापमानां अभावात् लुप्तापिंडाः लुप्तोदकक्रियाश्च सतः नरकाय पतंति

हे कृष्ण गोपिकामनःकर्षणशील अधर्माभिभवात् कुलस्त्रियो विशुद्धवंशोद्भवा प्रदुष्यंति स्वैरिण्यो भवंतीत्यर्थः स्त्रीषु दु॥
ष्टासु हे वार्ष्णेय वृष्णिवंशोद्भव वर्णसंकरो जायते वर्णस्य वर्णांतरेण मिश्रीकरणं वर्णसंकर ४१ संकर इति संकरः जातिसं
करः एषां कुलघ्नानां कुलहंतॄणां चैव परं कुलघ्न कुलस्य नरकाय भवति हि यस्मात् एषां कुलघ्नानां कुलहंतॄणां नरके वासं
तेषां एव कुलस्य च नरकाय भवति किं च एषां कुलघ्नानां स्वर्गारूढाः पितरः लुप्तपिंडोदकक्रियाः संतः नरके पतंतीत्यर्थः ४२॥
तैः दोषैः उपहरति हि वाक्याद्दोषैरेतैरिति एते धर्मनाशाच्च धर्माभिभवादिलक्षणैः वर्णसंकरकारकैः दोषैः कुलघ्नानां जातिधर्माः कु

अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ४१ संकरो नरकायैव कुलघ्नानां कुल
स्य च पतंति पितरो ह्येषां लुप्तपिंडोदकक्रिया ४२ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः उत्साद्यंते जातिधर्माः कुलधर्माश्च
शाश्वताः ४३ उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन नरके नियतं वासो भवतीत्यनुशुश्रुम ४४ अहो बत महत्पापं कर्तुं
व्यवसिता वयं यद्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ४५

त्रियत्वजातिप्रयुक्ताधर्माः तथा शाश्वताः कुलधर्माः पारंपर्यागताश्च धर्माश्च उत्साद्यंते लुप्यंते तेषां च अभावेन नरके भवतीत्यर्थः
चकारात् आश्रमधर्मादयोपि ग्रस्यंते ४३ हे जनार्दन उत्सन्नकुलधर्माणां विनष्टकुलवर्णाश्रमादिधर्माणां मनुष्याणां नर
के नियतं वासो भवतीति इति वयं अनुशुश्रुम अनु वारंवारं आसादितमः श्रुतवंतो वयं इ ४४ अहो बत इति वं धुवधव्यवसायेन
संतप्यमान आह अहो बत कष्टं यत् परमेश्वरस्य तव संनिधानेपि वयं महत्पापं कर्तुं व्यवसिताः व्यवसायं निश्चयं गताः किं तत् महत्पापं यत् राज्यसुखलोभे
नियमेन

ननु चैतेषां च अपि बंधुवधदोषे समाने सति यथैवैते बंधुवधमंगीकृत्यापि युद्धे प्रवर्त्तंते तथैव भवानपि प्रवर्त्ततां किमने
न विषादेनेत्याशंक्याह अविवेकिविवेकिनोर्भेदेन परिहरति यद्यपीति यद्यप्येते धार्तराष्ट्रा लोभोपहतचेतसः लोभः परद्र
व्याद्यभिलाषः लुंपति छिनत्ति उभयं लोकद्वयं प्राणिनामिति लोभः तेन उपहतचेतसः तिरस्कृतकर्त्तव्याकर्त्तव्यविवेक
विज्ञानाः संतः कुलक्षयकृतं गोत्रवधनिमित्तं दोषं मित्रद्रोहे च पातकं न पश्यंति ३८ कथं न ज्ञेयमिति हे जनार्दन तथा

यद्यप्येते न पश्यंति लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं ३८ कथं न ज्ञेयमस्माभिः पापादस्मान्नि
वर्त्तितुं कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ३९ कुलक्षये प्रणश्यंति कुलधर्म्माः सनातनाः धर्म्मे नष्टे कुलं कृत्
स्नमधर्म्मोभिभवत्युत ४०

पि अस्माभिः कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्मात्पापान्निवर्त्तितुं कथं न ज्ञेयं न यत्नं कर्त्तव्यमित्यर्थः ३९ कुलक्ष
क्षये कृते यो दोषः उत्पद्यते तं दर्शयति सति कुलक्षये प्रणश्यंतीति ॥ उत इति वितर्के इदानीं कुलक्षयस्य पारंप
र्येण नरकप्राप्तिकारणत्वं दर्शयति कुलक्षये गोत्रपुरुषाणां विनाशे सनातनाः पारंपर्यागताश्चिरंतनाः कुलध
र्म्माः प्रणश्यंति धर्म्मे नष्टे धर्म्मेषु नष्टेषु कृत्स्नमपि कुलं अधर्म्मोभिभवति तिरस्करोति उत अपि अधर्म्माभिभव॥
निवारकधर्मस्याभावादित्यर्थः ४०

एतान्नहंतुमिछामि घ्नतोपिमधुसूदन। हेमधुसूदन एतान् आचार्यादीन् घ्नतोपिमारयतोपि त्रैलोक्यराज्यस्यापिहेतोः हंतुंनइछामि
महीकृते पृथिवीराज्यार्थं पुनः किंवक्तव्यं ३५ निहत्येति हेजनार्द्दन जनानदेवविपक्षभूतान् असुरादीन् अर्द्दयति पीडय
तीति अथवा जनैः अधिकारे पुरुषैः अभ्युदयादिकं अर्द्यते याच्यत इति जनार्द्दन धार्त्तराष्ट्रान् निहत्य नः अस्माकं का
प्रीतिः स्यात् किंसुखंस्यात् न किमपीति ननुअग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते ह्याततायिनः इ
त्यस्मरणात् दग्निदत्वादिभिः षड्भिरपिहेतुभिरेते तावदाततायिनः आततायिनां च वधो युक्त एव ननु आततायि

एतान्नहंतुमिछामि घ्नतोपिमधुसूदन अपित्रैलोक्यराज्यस्यहेतोः किंनुमहीकृते ३५ निहत्यधार्त्तराष्ट्रान्नः काप्री
तिःस्याज्जनार्द्दन पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ३६ तस्मान्नार्हावयंहंतुंधार्त्तराष्ट्रान्सबांधवान् स्वजनंहिक
थंहत्वासुखिनःस्याममाधव ३७

ल
नांमेतेषांवधोविहितत्वाद्युक्तः इत्येतामाशंकां धर्मशास्त्रस्य अर्थशास्त्राद्बलवत्त्वेन पापमेव नरकादिदुःखकारणं आश्रयेत ३६ यस्मा
त् आततायिनां एतेषांहनने लौकिकद्वयेपि अकल्याणमेव तस्मादिति सबांधवान् धार्त्तराष्ट्रान् हंतुं वयं न अर्हाः एतेषां वधस्यान्याय्यत्वात् अधर्म
त्वाद्धनने केवलं अस्माकं पारलौकिकं सुखं न भवति ऐहिकमपि न भवतीत्याह स्वजनंहीति हेमाधव हि यस्मात् स्वजनं हत्वा वयं सु
खिनः कथं स्याम कथं सुखयुक्ताः भवामि ३७

निमित्तानीति हे केशव च पुनः विपरीतानि अन्यादितत्सूचकानि निमित्तानि नावविसूचकानि चिन्हानि पश्यामि च पुनः आहवे स्वजनं मोहत्वा
श्रेयः कल्याणं न अनुपश्यामि उत्तरकाले पश्यामि ३१ ननु विजयादिकं श्रेयः वर्त्तमाने न पश्यसि इति चेत्तत्राह न कांक्षे इति हे
कृष्ण अहं विजयं विशिष्टजयं संग्रामे उत्कर्षं न कांक्षे न प्रार्थये च पुनः राज्यं राज्ञः आधिपत्यं सुखानि च विषयजन्यानि
प्रमोदान् न प्रार्थये हे गोविंद नोस्माकं राज्येन किं भोगैः विषयसुखैः किं जीवितेनापि किं गोविंद गोभिः श्रुतिभिर्वेदां
तवाक्यैः विद्यते परमार्थरूपेण लभ्यते इति गोविंद ३२ येषामिति येषां स्वजनानां अर्थे प्रयोजनाय नोस्माकं रा

निमित्तानि च पश्यामि विपरीतानि केशव न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे ३१ न कांक्षे विजयं कृष्ण न च राज्यं
सुखानि च किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ३२ येषां अर्थे कांक्षितं नो राज्यं भोगाः सुखानि च त इमेवस्थिता
युद्धे प्राणांस्त्यक्त्वा धनानि च ३३ आचार्याः पितरः पुत्रास्तथैव च पितामहाः मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिन
स्तथा ३४

ज्यं भोगाः च पुनः सुखानि एतत्सर्वं कांक्षितं वांछितं ते इमे युद्धे युद्धनिमित्तं प्राणान् अंतरात्मधनानि चाह्य प्राणांश्च त्यक्त्वा अव
स्थिताः ३३ आचार्यादयो यथाख्याताः पितरः पुत्राः तथा पितामहाः मातुलाः श्वशुराः पौत्राः श्यालाः पत्न्या भ्रातरः संबंधि
नः विवाहादिसंबंधवंतः यदि कृपया त्वं एतान् न हंस्यसि तर्हि त्वामेव राज्यलोभेन एते हनिष्यंति अतः त्वमेव एतान् हत्वा
राज्यं भुंक्ष्वेति तत्राह ३४॥

श्वसुरानिति च पुनः श्वशुरान् सुहृदश्चैव अपश्यत् ततः किं कृतवान् अत आह तानिति स कौन्तेयः अर्जुनः सर्वान् अविशेषेण।
बन्धून् अवबध्नन्ति परस्परं स्नेहपाशैरिति बन्धवः तान् अवस्थितान् समीक्ष्य २७ कृपयेति कृपया करुणया परयाविष्टो अतिशा परया
यितया आविष्टो युक्तो विषीदन् विशेषेण सीदन् अवसादं ग्लानिं उद्भमानः इदं अनन्तरं उच्यमानं अब्रवीत् किमब्रवीदित्य
पेक्षायामाह दृष्ट्वेममित्यादिना यावदध्यायसमाप्तेः इदं किमिति हे कृष्ण

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् २७ कृपया परयाविष्टो विषीदन्निदम
ब्रवीत २८ अर्जुन उवाच दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितं २८ सीदन्ति मम गात्राणि मुखं च परिशुष्यति वेपथुश्च शरीरे मे रो
महर्षश्च जायते २९ गांडीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ३०

भक्तानां संसारचक्रे रागविलेखनात् कृष्ण इमं स्वजनं युयुत्सुं योद्धुकामं संतं समुपस्थितं इहागतं दृष्ट्वा २८ सीदंतीति मम गात्राणि
अंगानि सीदंति विशीर्णानि शिथिलानि अनुत्साहानि भवंति च पुनः मुखं परितः समंतात् शुष्यति निर्द्रवी भवति मे मम शरीरे वेपथुश्च कंप
श्च तथा रोमहर्षश्च जायते २९ गांडीवमिति मे मम हस्तात् गांडीवं स्रंसते अधः पतति त्वक्चैव परिदह्यते अंतरशोकज्वलनेन संतपतो च अ
परं मे मनः कर्तव्याकर्तव्यबोधसाधनमंतःकरणं भ्रमतीव भ्रमं गच्छति निर्धारणं कर्तुं न शक्नोमि च पुनः अवस्थातुं स्थितिं कर्तुं न

गीताभा०

देवदैतेयसंपत्तिसंविभागेनषोडशोत्रवद्ध्यानेऽधिकारस्तु सात्विकस्यीतिदर्शितं १

॥५०॥ ॥अथ एतान्सन्मार्गप्रतिपक्षभूतान् साधुद्वेषिणः मां द्विषतश्च क्रूरान्नराधमान् अशुभकर्मकारिणः संसारेषु संसारमार्गेषु आसुरीषु क्रूरकर्मप्रायासु
आ सुरीषु योनिषु अजस्रं सततं क्षिपामि॥१९॥ हे कौंतेय मूढाः अविवेकिनः आसुरीं तमोबहुलां योनिं आपन्नाः सन्तः जन्मनि जन्मनि
मां अप्राप्य॥ मदुपदिष्टं साधुमार्गमपि अप्राप्य ततः तस्या अपि योनेः निकृष्टतमां योनिं प्राप्नुवंति॥२०॥ उक्तानां आसुरदोषाणां मध्ये सकलदोष
मूलभूतं दोषत्रयं सर्वथा वर्जनीयमित्याह॥ त्रिविधमिति॥ इदं आत्मनः नाशनं त्रिविधं नरकस्य द्वारं नरकप्राप्तिमार्गः कामः क्रोधः तथा लोभः त
स्मात् एतत् त्रयं काम क्रोध लोभाख्यं त्रिविधं नरक द्वारं त्यजेत्॥२१॥ त्यागफलं विशेषमाह॥ एतैरिति॥ हे कौंतेय एतैस्त्रिभिः तमोद्वारैस्तमसः

या ॥तानहं द्विषतः क्रूरान्संसारेषु नराधमान्॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥१९॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्म
नि॥ मामप्राप्यैव कौंतेय ततो यान्त्यधमां गतिं॥२०॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्
नः ॥२१॥ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्नरः॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिं॥२२॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः
न स सिद्धिमवाप्नोति न सुखं न परां गतिं॥२३॥ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहा
र्हसि॥२४॥ इति श्री भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपत्तियोगो नाम षोडशोऽध्यायः॥१६॥

नारकस्य दुःखमोहात्मकस्य द्वारैः कामादिभिर्विमुक्तो नरः आत्मनः श्रेयः आचरति। ततः श्रेयस आचरणात् परां मोक्षाख्यां गतिं याति॥२२॥ काम॥
क्रोधादित्यागश्च स्वधर्माचरणं विना न भवतीत्याह॥ य इति॥ यः शास्त्रविधिं शास्त्रस्य विदस्य विधिं कर्तव्याकर्तव्यज्ञानकारणं उत्सृज्य त्य
क्त्वा कामकारतः यथेष्टं कामप्रयुक्तः सन् वर्तते स सिद्धिं पुरुषार्थयोग्यतां नाप्नोति॥ नापि अस्मिन्काले सुखं प्राप्नोति॥ नापि परां प्रकृष्टां ग
तिं स्वर्गं मोक्षं प्राप्नोति॥२३॥ फलितमाह॥ तस्मादिति॥ तस्मात् ते तव कार्याकार्यव्यवस्थितौ कर्तव्याकर्तव्यव्यवस्थायां शास्त्रं प्रमा ॥५०॥
णं ज्ञानसाधनं भवति। तस्मात् शास्त्रविधानोक्तं कर्म ज्ञात्वा कर्तुं अर्हसि॥२४॥ ॥इति षोडशोऽध्यायः॥ १६ ॥रामराम रामराम

इह लोके कर्तुं अर्हसि

तेषां मनोराज्यं कथयन् नरकप्राप्तिमाह ॥ इदमद्येति ॥ चतुर्भिः ॥ मया अद्य इदं धनं लब्धं इमं मनोरथं मनस्तुष्टिकरं प्राप्स्ये इदं धनं चास्ति ॥ इदम
पि धनं मे आगामिकाले पुनर्भविष्यति ॥१३॥ मया असौ दुर्जयः शत्रुर्हतः अपरानपि वराकान् हनिष्ये अहं ईश्वरः मत्तुल्य अन्यो नास्ति ॥ अहं भोगी
भोगवान् सर्वप्रकारेण सिद्धः संपन्नः पुत्रैर्युतः निष्पन्न बलवान् सुखी नरोग एव ॥१४॥ अहं आढ्यः धनेन संपन्नः अभिजनवान् सत्कुलप्रसूतो मत्त्वा
दिसंपन्नः अहमस्मि मया सदृशः अन्यः कोपि नास्ति अहं यक्ष्ये यज्ञेनापि अन्यानभिभविष्यामि ॥ नटादिभ्यः दास्यामि मोदिष्ये अतिशयेन हर्षं प्र
प्स्यामि इत्येवं अज्ञानविमोहिताः अविवेकं चापमापन्नाः ॥१५॥ एवंभूता यत्प्राप्नुवंति तदाह ॥ अनेकेति ॥ अनेकचित्तविभ्रान्ताः तैरुक्तप्रकारैः ।
अनेकधा चित्तसंकल्पैः विविधं भ्रान्ताः मोहजालसमावृताः मोहो अविवेकः अज्ञानं तदेव आवरणात्मकत्वात् जालमिव जालं तेन समावृताः कामभोगेषु प्रस

॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥१३॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि ॥ ईश्वरोऽहमहं भोगी सिद्धो
ऽहं बलवान्सुखी ॥१४॥ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ॥ यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥ अनेकचित्तविभ्रान्ता
मोहजालसमावृताः ॥ प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥१६॥ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ॥ यजंते नामयज्ञैस्ते दंभेना
विधिपूर्वकं ॥१७॥ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ॥ मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः ॥१८॥ राम राम रामरामराम

क्ताः तत्रैवासक्ताः संततस्तेन बहुसंचितकल्मषाः अशुचौ वैतरण्यादौ नरके पतंति ॥ यागादिष्वपि तेषामभिमानजन्यत्वात् केवलं दंभाहंकारादिप्रधा
नत्वमेवेति ॥ आत्मसंभाविता इति द्वाभ्यां ॥ आत्मसंभाविताः सर्वगुणविशिष्टतया आत्मनैव संभाविताः स्तब्धाः अप्रणताः मानः धनमान
मदान्विताः धनजनितो मानः मदश्च ताभ्यां अन्विताः ते न दंभेन धर्मध्वजितया अविधिपूर्वकं नाममात्रेण यज्ञाः यज्ञैर्यजंते ॥१७॥ अ
विधिपूर्वकत्वमेव प्रपंचयति ॥ अहंकारमिति ॥ विद्यमानैः अविद्यमानैः गुणैः आत्मनि अध्यारोपितैः विशिष्टं आत्मानं अहमिति मन्यते ॥ सोऽहंकारः
परापकारनिमित्तं कामरागान्वितं सामर्थ्यं बलं यस्माद्भवे धर्ममतिक्रामति सोयं अंतःकरणस्थो दोषो दर्पः कामं स्त्र्यादिविषयं क्रोधं अ
निष्टविषयं ॥ एतानन्यांश्च महतो दोषान् संश्रित्य ते आसुराः मां ईश्वरं आत्मपरदेहेषु तद्बुद्धिकर्मसाक्षिभूतं मां प्रद्विषंतः मदाज्ञालंघनातिवर्तित्व
प्रद्वेषः तं कुर्वंतः अभ्यसूयकाः सन्मार्गस्थानां गुणेषु असमानाः ॥१८॥ रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम
नामयज्ञैः

॥४९॥ न कीर्त्यमानावर्जनीयेतिवुध्या आसुरीं संपदं प्रपंचयितुमाह ॥ द्वाविति ॥ हे पार्थ अस्मिन् लोके द्वौ भूतसर्गौ दैवः चपुनः आसुरः मायादेवो भूतसर्गः विस्तरशः
विस्तरेण प्रोक्तः आसुरं भूतसर्गं मेममकारणात् शृणु ॥६॥ आसुरीं विस्तरतो निरूपयति प्रवृत्तिमिति ॥ आसुरा जनाः प्रवृत्तिं च पुनः निवृत्तिं पुरुषार्थ
साधने कर्त्तव्यप्रवृत्तिः अनर्थहेतुः कर्त्तव्यानिवृत्तिः न जनेन विदुः तेषु न शौचं नापि आचारः न च सत्यं विद्यते शौचा अनाचारा अनृतवादिनः
॥७॥ शौचायनलक्षनेकारणमाह ॥ असत्यमिति ॥ आसुरा जनाः इदं जगत् असत्यं अनृतप्रायं अप्रतिष्ठं धर्माधर्मप्रतिष्ठारहितं अनीश्वरं ईश्वरं ईश्व
र नावरहितं अपरस्परसंभूतं स्त्रीपुरुषयोः अन्योन्यसंगात् जातं कामहेतुकं कामएव हेतुः अन्यत्किं कारणं तिरनकिमपीत्यर्थः स्यादुः ॥८॥ नष्टात्म

॥ द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुरएव च ॥ दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥६॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥ न शौचं नापि
वाचारो न सत्यं तेषु विद्यते ॥७॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं ॥ अपरस्परसंभूतं किमन्यत्कामहैतुकं ॥८॥ एतां दृष्टिमवष्टभ्य नष्टात्मा
नोल्पबुद्धयः ॥ प्रभवंत्युग्रकर्माणः क्षयाय जगतोहिताः ॥९॥ काममाश्रित्य दुःपूरं दंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान् प्रवर्त्त
तेशुचिव्रताः ॥१०॥ चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥ आशापाशशतैर्बद्धाः कामक्रोध
परायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान् ॥१२॥

नः विनष्टस्वभावाः नष्टपरलोकसाधनाः अल्पबुद्धयः विषयबुद्धय एतां दृष्टिं सर्वांकां बुद्धिं अवष्टभ्य आश्रित्य उग्रकर्माणः क्रूरकर्माणः जगतः अहिताः
जगतः क्षयाय प्रभवंति ॥९॥ दंभमानमदान्विताः अशुचिव्रतापापचरित्राः दुःपूरं भावरहितं कामं आश्रित्य मोहात् अविवेकात् असद्
ग्राहान् गृहीत्वा लोके प्रवर्त्तंते भक्षणे वचने असत्यप्रत्ययात् इत्यर्थः ॥१०॥ च पुनः अपरिमेयां प्रलयांतां प्रलयपात्रो परणांतां चिंतां उपाश्रिताः आश्रिताः
कामोपभोगपरमाः शब्दादिविषयोपभोगपरमाः विषयोपभोगा एव परमार्थः एतावदिति निश्चिताः ॥११॥ अतएव आशाशतैः आशापाशशतैर्ब
द्धाः आशाएव पाशास्ते पाशशतैर्बद्धाः कामक्रोधपरायणाः सर्वदा कामक्रोधपराः कामभोगार्थं कामोपभोगाय जनार्थं अन्यायेन परस्वापह ॥४९॥
रणादिना अर्थसंचयान् ईहंते प्रार्थयंते ॥१२॥

त्मासुरीसंपदंत्यक्त्वादैवीमेवाश्रितानराःमुच्यंतइतिनिर्णीतंतद्विवेकोथषोडशे १

ॐ नवमे ऽध्याये दैवी आसुरी राक्षसी चेति प्राणिनां प्रकृतयः सूचिताः ताः विस्तरेण प्रदर्शनाय आत्मतत्त्वनिरूपणानंतरं अधिकारिणं दर्शयिष्यन् दैवी मोक्षे
तुरिति विवेचयन् दैवीसंपद्युक्तो अधिकारी इतरसंपद्युक्तो ऽनधिकारी इति दर्शयिष्यन् अधिकारिविशेषणभूतानां दैवीसंपदमाह भगवान् अभयमिति ॥
त्रिभिः ॥ अभयं अभीतता परवंचनमायया अनृतादिवर्जनेन सत्त्वसंशुद्धिः शास्त्राचार्योपात्ता आत्मादिपदार्थानामवगमः ज्ञानं अवगतानां आत्मादीनां
इंद्रियादिजयपूर्वकं एकाग्रतया स्वसंवेद्यतापादनं योगः तयोः ज्ञानयोगयोः विषये व्यवस्थितिः तन्निष्ठता यथाशक्ति अन्नादिदानं बाह्येंद्रियाणां निग्रहो द
यज्ञः मः यज्ञः श्रौतो ग्निहोत्रादिः स्मार्तः पंचयज्ञादिः ऋग्वेदाद्यध्ययनं धर्मार्थं स्वाध्यायः तपः शारीरादि वक्ष्यमाणं ऋजुत्वं सर्वदा आर्जवं ॥१॥ प्राणिपीडनम
हिंसा अमृतवर्जितं यथाभूतार्थवचनं सत्यं प्राप्तक्रोधस्य उपशमनं अक्रोधः त्यागः सर्वकर्मसंन्यासः अंतःकरणस्य निग्रहः शांतिः पररंध्रप्रकटी ॥
ति

॥श्रीभगवानुवाच॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥ दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं ॥१॥ अहिंसा सत्यमक्रोधस्त्यागः शांतिर
पैशुनं ॥ दया भूतेष्वलोलत्वं मार्दवं ह्रीरचापलं ॥२॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥ भवंति संपदं दैवीमभिजातस्य भारत ॥३॥ दंभो दर्पो
ऽभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ॥४॥ दैवी संपद्विमोक्षाय निबंधायासुरी मता ॥ मा शुचः संपदं दैवीमभिजा
तोसि पांडव ॥५॥

धौ करणं तदभावो अपैशुनं दुःखितेषु कृपा दया विषयसंनि इंद्रियाणां अलोलुपत्वं मार्दवं अक्रौर्यं ह्रीः लज्जा असति प्रयोजने वाक्पाणिपादादीनां अ
व्यापृतत्वं चापलं ॥२॥ त्वक्गतादीप्तिः तेजः आक्रुष्टस्य ताडितस्य वा अंतर्विक्रियाभावः क्षमा ॥ दुःखेंद्रियाणामवसादनिवारिका धृतिः शौचं बाह्यांतरं च ॥
आंतरं मायारागादिकालुष्याभावः अहिंसनं अद्रोहः आत्मनः पूज्यातिशयभावना अतिमानः तदभावः नातिमानिता हे भारत एता किल अभयादीनि नातिमानितांतानि दैवी
नीसंपदं अभिजातस्य दैवविभूत्यर्हस्य भवंति ॥३॥ अथ आसुरी संपदमाह दंभ इति ॥ हे पार्थ दंभः धर्म्मध्वजित्वं धनस्वजनादिनिमित्तो ऽभिमानो दर्पः आत्मनः
पूज्यातिशयभावना अतिमानः क्रोधो अमर्षः परुषवचनं पारुष्यं अविवेकतो जातं मिथ्याज्ञानं एता हि आसुरी संपत् निबंधाय संसाराय मता त्वं दैवीं
संपदं अभिजातो ऽसि अतस्त्वं मा शुचः शोकं मा कार्षीः ॥५॥ रामरामरामराम रामरामराम रामरामराम राम रामरामराम राम राम रामराम रामराम

ऽज्ञानं

ऽकार्य्यकरणे

ऽभिजातस्य संभवंति ४ हे पौड मही यस्मात् दैवीसंपत्

मस्मच्छास्त्रविनैच्छित्वासप्टंपंचदशेविभुःपुरुषोत्तमयोगाख्यंपरंपदमुपादिशत्।

गीताभटी०

॥यदर्थंक्षराक्षरोत्क्रीतनमाह॥उत्तमइति॥तुपुनःउत्तमःपुरुषःअन्यःएताभ्यांक्षराक्षराभ्यांविलक्षणःक्षराक्षरोपाधिद्वयदोषेणास्पृष्टःनित्य॥

॥५८॥ शुद्धबुद्धमुक्तस्वभावःयोऽन्यःउत्तमःउत्कृष्टतमःपुरुःपतमःपुरुषःअन्यःएताभ्यांअत्यंतविलक्षणःपुरुषद्वयात्परःपरमउत्कृष्टःआत्मास

ति र्वभूतानांप्रत्यगात्माअतःवेदांतेषुपरमात्मेत्युक्तःयःईश्वरःसर्वज्ञःईशनशीलःलोकत्रयंभूर्भुवस्वराख्यंप्रविश्यस्वकीयबलशक्त्यास्वरूपस

द्भावमात्रेणधारयति॥१७॥स्वकीयपुरुषोत्तमनामनिर्वचनेनस्वात्मनिरतिशयैश्वर्यंदर्शयति॥भगवान्यस्मात्अहंक्षरंसंसारमायावृक्षंअश्व

त्थाख्यमतीतः॥चपुनःअक्षरात्संसारवृक्षबीजभूतात्अव्याकृतादपिउत्तमःउत्कृष्टः।तमःकृतैर्तमोवाअतःक्षराक्षराभ्यांउत्तमत्वात्लो॥

[margin note, partly legible] के वेदेचपुरुषोत्तमःइतिविख्यातः॥१८॥इदानीयथोक्तात्मज्ञानस्यफलमाह॥योमामेति॥हेभारतयःअसंमूढःसंमोहवर्जितसन्मांईश्वरं॥

॥उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः॥योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः॥१७॥यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः॥अ

तोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः॥१८॥योमामेवमसंमूढोजानातिपुरुषोत्तमं॥ससर्वविद्भजतिमांसर्वभावेनभारत॥

१९॥इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ॥एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत॥२०॥ ॥इतिश्रीभगवद्गीतासूप॥

निषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेपुरुषोत्तमयोगोनामपंचदशोऽध्यायः॥ १५ ॥रामरामरामरामरामरामराम॥

पुरुषोत्तमएवंयथोक्तप्रकारेणअहमस्मीतिआत्मभावेनजानाति।ससर्ववित्॥सर्वज्ञःसर्वभावेनसर्वज्ञत्वात्मचिंतयासर्वत्रआत्मभावे

नमांभजति॥१९॥अध्यायार्थमुपसंहरन्तुक्तस्यमोक्षसाधनस्यभगवत्तत्त्वज्ञानस्यस्तुतिमाह॥इतीति॥हेअनघमयाइतीदमत्यंतं॥गु

ह्यतमंअत्यंतरहस्यंशास्त्रंसकलगीताशास्त्रार्थभूतंअध्यायंपंचदशाध्यायरूपमुक्तंएतत्यथादर्शितार्थंज्ञात्वाबुद्धिमान्स्यात्॥ ॥५८॥

भगवत्तत्त्वेज्ञातेकर्मिकर्तव्यंसर्वंपरिसमाप्तंभवति॥२०॥इतिपंचदशोध्यायः॥ १५॥ ॥रामरामरामरामरामरामरामरामरामरामरामराम

किं च ॥ गामिति ॥ च पुनः अहं गां पृथ्वीं आविश्य ओजसा ओजः बलं कामरागवर्जितं ऐश्वर्यं जगद्धारणाय पृथिव्यामीशितृत्वं येन ऊर्वी पृथ्वी नाधः पतति न विशीर्य्यते ॥ तेन ओजसा बलेन ऐश्वर्येण रूपेण भूतानि चराचराणि धारयामि ॥ किं च रसात्मकः रसस्वभावः सर्वरसानामाकरः सोमः सन् पृथ्वीं ज्योत्स्नया जाताः सर्वाः
ओषधीः व्रीहियवाद्याः पुष्णामि पुष्टिमतीः रसस्वादमतीश्च करोमि स्वात्मरसानुप्रवेशेन ॥ १३ ॥ किं च ॥ अहमिति ॥ अहमेव वैश्वानरः उदरस्थोऽग्निः भूत्वा प्राणिनां प्राणवतां देहमाश्रितः प्रविष्टः सन् प्राणापानाभ्यां संयुक्तः चतुर्विधं अन्नं भोज्यं लेह्यं चोष्यं भक्ष्यं चेति चतुर्विधं पचामि तस्य पाकं करोमि
॥ १४ ॥ किं च ॥ सर्वस्येति ॥ च पुनः अहं सर्वस्य प्राणिजातस्य आत्मत्वेन हृदि बुद्धौ संनिविष्टो वर्त्ते अतः मत्तः आत्मनः सकाशात् सर्वप्राणिनां ज्ञानं स्मृतिश्च
भवतः तयोः अपोहनं अभावश्च भवति ॥ तत्र व्यक्तिः येषां पुण्यकर्माणि तेषां पुण्यकर्मानुरोधेन ज्ञानं स्मृतिश्च भवतः तथा ये पापकर्माणस्तेषां पापकर्मा

॥ गामाविश्य च भूतानि धारयाम्यहमोजसा ॥ पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ॥ प्रा
णापानसमायुक्तः पचाम्यन्नं चतुर्विधं ॥ १४ ॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ॥ वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वे
दविदेव चाहं ॥ १५ ॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ॥ क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥ १६ ॥ राम राम राम राम राम राम राम राम

नुरूपेण स्मृतिज्ञानयोः अपोहनं अपगमः अभावो भवति ॥ च पुनः सर्वैः वेदैः अहं परमात्मा वेद्यो वेदितव्यः ॥ तथा वेदान्तकृत् वेदान्तार्थसंप्रदायकृत्
च पुनः वेदवित् वेदार्थवित् अहं नान्यः ॥ १५ ॥ यदादित्यगतमिति चतुर्भिः ॥ भगवतो नारायणस्य विभूतिः संक्षेपत उक्ता ॥ इदानीं सर्वमेव अतीतानागता
ध्यायार्थजातं द्विधा राशीकृत्य क्षराक्षरोपाधिप्रविभक्ततया निरुपाधिस्वरूपनिर्दिधारयिषया भगवतस्तस्य तत्त्वप्रतिपादनाय उत्तरो ग्रन्थः ॥ द्वाविमावि
ति ॥ इमौ लोकाः लोके संसारे क्षरो विनाशी एकोराशी पुरुषः अपरः तद्विपरीतः अविनाशी ॥ क्षराख्यस्य पुरुषस्य उत्पत्तिबीजं प्रलयादिषु भेदेन कर्मसंस्कारजन्तु
कामकर्मादिसंस्काराश्रयः राशिः पुरुषः तौ इमौ पृथक् राशीकृतौ पुरुषौ वर्त्तेते ॥ तौ स्वयमेव विविच्य दर्शयति ॥ अक्षराद्भिन्नत्वात् ॥ क्षरः सर्वाणि भूता
नि समस्तविकारजातं जगत् अक्षरः पुरुषः कूटस्थः कूटो राशिः ॥ तद्वत् स्थितः अथवा कूटो माया वञ्चनं तद्रूपेण स्थितः ॥ नक्षरतीत्यर्थः ॥ संकलसंसार
बीजं द्वितीयपुरुषः ॥ १६ ॥

कृष्ण

कदाऽऽकर्षतीत्यत्र ... च किं करोत्यत आह ॥ शरीरमिति ॥ ईश्वरो देहादिसंघातस्वामी जीवः यत् शरीरमाप्नोति । यच्चापि च यदा शरीरात् उत्क्रामति यत् यदा सर्वस्मात् श-
रीरात् शरीरांतरं प्राप्नोति । तदा एतानि मनःषष्ठानि इंद्रियाणि गृहीत्वा सम्यक् याति गच्छति तत्र दृष्टांतः वायुः आशयात् पुष्पादिगंधानिव ॥८॥ सर्वो कानी-
न्द्रियाणि इत्येदन दर्शयितुं यदर्थं गृहीत्वा याति जीवः तदपि दर्शयति ॥ श्रोत्रमिति ॥ अयं जीवः देहस्थः श्रोत्रं चक्षुः स्पर्शनं च पुनः रसनं घ्राणं एतानि पंच श्रोत्रादी-
प्र नीन्द्रियाणि मनसा सह षट् प्रत्येकं इंद्रियं अधिष्ठाय विषयान् शब्दादीन् उपभुंक्ते सेवते ॥९॥ ननु देहेंद्रियादिसंघातव्यतिरेकेण एवंभूतमात्मानं सर्वे किं न पश्यंति
तत्राह ॥ उत्क्रामंतमिति ॥ एवं देहगतं जीवं पूर्वदेहादुत्क्रामंतं अपि वा स्थितं तस्मिन् देहे वर्त्तमानं अपश्यच्छब्दादीन् विषयान् भुंजानं उपलक्षणमेतद्गुणान्वितं ॥
गुणकार्यैः सुखदुःखमोहाद्यैः अन्वितं संयुक्तं ॥ एवंभूतमप्येनं दर्शनगोचरप्राप्तमपि विमूढाः दृष्टादृष्टविषयभोगबलात्कृष्टचित्ततया अनेके यथाः प्र

॥ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात् ॥८॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ॥ अधि-
ष्ठाय मनश्चायं विषयानुपसेवते ॥९॥ उत्क्रामंतं स्थितं वापि भुंजानं वा गुणान्वितं । विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥१०॥ यतंतो यो-
गिनश्चैनं पश्यंत्यात्मन्यवस्थितं । यतंतोऽप्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥११॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलं ॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो वि-
द्धि मामकं ॥१२॥

ढाः न अनुपश्यंति ॥ अहो कष्टमिति ॥ आक्रोशयति जगत् वा अन्ये पुनः प्रमाणजनितज्ञानचक्षुषः विविक्तं पश्यंते एनं पश्यंति ॥ ज्ञानचक्षुषः विवि-
क्ततया पश्यंति ॥१०॥ ननु दुर्विज्ञेयत्वादात्मनः विविक्तं अपि केचिदेव तद्दृष्टिनः पश्यंति न सर्वे इत्याह ॥ यतंत इति ॥ च पुनः योगिनः समाहितचित्ताः
स्थं यतंतः यत्नं कुर्वंतः एनं प्रकृतिम् आत्मानं स्वात्मनि स्वबुद्धौ अवस्थितं पश्यंति ॥ अकृतबुद्धित्वात् अकृतात्मनः अयतेंद्रियाः अशांतदर्पाः अविवेकिनः यतं-
तोऽपि शास्त्राद्यभ्यासेन आत्मविचारं कुर्वंतोऽपि एनं आत्मानं स्वबुद्धौ स्थितमपि न पश्यंति ॥११॥ संसारिणो जीवमात्रस्य संसारिस्वरूपं देहादिव्यतिरि- अचेतसः
क्तं दर्शितं ॥ इदानीं तमेव परमेश्वरस्वरूपं यत् सर्वस्य अवभासकं यत् न केनचिदवभास्यते तस्य सामान्यं निवर्त्तते ॥ अनंतशक्तित्वेन सर्वात्मत्वेन निरूपयति ॥
यदादित्येति चतुर्भिः ॥ यत् आदित्यगतं तेजः अखिलं समस्तं जगत् भासयते ॥ यच्चंद्रमसि यत् अग्नौ तत्तेजः मामकं मदीयं एवेत्यवेहि विद्धि ॥ अथ-
वा यत् आदित्यादिगतं तेजः चैतन्यरूपं येन चैतन्येन आदित्यादयो ज्ञायंते ॥ अथवा येन चैतन्येन सूर्यादयः सर्वज्ञत्वं भवंति ॥ तच्चैतन्यं ज्ञानं मदीयं
मम विश्वो विद्धि जानीहि ॥१२॥ ॥४७॥

यो ऽयं संसारवृक्षो वर्णितः अस्य रूपं लोके यथा वर्णितं तथा नोपलभ्यते ॥ न च पुनर्नान्तः न आदिः न संप्रतिष्ठा स्थितिः ॥ मध्यभागः केनचिन्नोपलभ्यते ॥ एनं संसा
रवृक्षं असंगशस्त्रेण पुत्रवित्तलोकैषणाभ्यो व्युत्थानेन वैराग्येन दृढेन परमात्माभिमुख्यनिश्चयदृढीकृतेन पुनः विवेकाभ्यासनिशितेन शस्त्रेण परं भरस्य ग
सुविरूढमूलं नानाभोगवासनाभिर्दृढमूलं संसारवृक्षं छित्वा सबीजमुन्मूल्य ॥ ३ ॥ ततः पश्चात्तत्वैष्णवं पदं परिमार्गितव्यं ज्ञातव्यं यस्मिन् गता प्रविष्टा
न्नुयः पुनः अपि संसाराय न निवर्त्तन्ते ॥ परिमार्गणप्रकारमाह ॥ तं पदं तमेव चाद्यं पुरुषं प्रपद्ये शरणं गतोऽस्मि यतः संसारवृक्षस्य प्रवृत्तिः चिरंतनी प्रसृ
ता निःसृता ॥ ४ ॥ अव्ययपदस्य प्राप्तिसाधनान्युपदिशति ॥ निर्मानेति निर्मानमोहाः ॥ मानमोहाभ्यां निर्गताः ॥ जितसंगदोषाः संग एव दोषः ॥ जितः यैस्ते जित
संगदोषाः ॥ अध्यात्मनित्याः परमात्मस्वरूपे लोचनपराः ॥ अध्यात्मनित्याः विनिवृत्तकामाः विनिवृत्तः कामो येषां ते सुखदुःखसंज्ञैः द्वंद्वैः विमुक्ताः
अमूढा ज्ञानिनः ततः अव्ययं विष्णोः पदं गच्छंति ॥ ५ ॥ तदेव पदं विशिनष्टि विशेषतो दर्शयति ॥ न तदिति ॥ सर्वावभासकोऽपि सूर्यः तद्धाम वैष्णवं तेजोरू

॥ न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा ॥ अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा ॥ ३ ॥ ततः पदं तत्परिमार्गित
व्यं यस्मिन् गता न निवर्त्तन्ति भूयः ॥ तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥ निर्मानमोहा जितसंगदोषा अध्यात्मनित्या विनि
वृत्तकामाः ॥ द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययं तत् ॥ ५ ॥ न तद्भासयते सूर्यो न शशांको न पावकः ॥ यद्गत्वा न निवर्त्तंते तद्धा
म परमं मम ॥ ६ ॥ ममैवांशो जीवलोके जीवभूतः सनातनः ॥ मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति ॥ ७ ॥ राम राम राम राम राम राम राम राम

पं पदं भासयितुं न समर्थः आदित्याभावे यो रात्रौ सर्वावभासकः पूर्णचंद्रोऽपि तद्भासयितुं असमर्थः ॥ द्वयोरभावे निशांधकारं सर्वविषयप्रकाशकोऽग्निः सोऽपि तद्धाम
भासयितुं असमर्थः तद्धाम वैष्णवं पदं गत्वा प्राप्य न निवर्त्तंते पुनः संसारिणो न भवंति ॥ यच्च सूर्यादिभिर्न भास्यते तद्धाम परमं प्रकृष्टं पदं मम विष्णोः ॥ ६ ॥ ननु
सर्वोऽपि गामनोता कथं तद्धाम गतानां नावृत्तिर्निवृत्तिरिति अत संसारित्वस्य पर्यायतः कारणमाह ॥ ममैवेति ॥ मम परमात्मनोंऽश एव भागः अवयवः एकदेशः जीवलोके
संसारे जीवभूतः कर्त्ता भोक्तेति प्रसिद्धः सनातनः चिरंतनः प्रलयेऽपि स्थित्वा मनःषष्ठानींद्रियाणि पंच प्रकृतिस्थानि कर्णशष्कुल्यादौ प्रकृतौ स्थितानि संसारे सुषुप्तौ मनः कर्ष
ति आकर्षति यथा जलसूर्यकः सूर्यांशो जलस्य निमित्तस्यापाये सूर्यमेव कालानंते नैव स्वरूपेण पुनरागच्छति ॥ यथा वा घटच्छिद्रे घटोपाधिपरिच्छिन्नो घटाकाशः पुनर्घटाकाशो
शः सन् घटस्य निमित्तस्यापाये महाकाशं प्राप्य न निवर्त्तते ॥ एवं मायालिंगशरीरावच्छिन्नः परमात्मनोंऽशः तयोः मायालिंगशरीरयोरपाये परमात्मस्वरूपं ॥
प्राप्य न निवर्त्तते इति युक्तं लिंगशरीरं एकादशेंद्रियाणि पंच वायुः बुद्धिरहंकारश्चैतत् लिंगशरीरं पंचतन्मात्राणि अपि लिंगशरीरमिति केचित् ॥ ७ ॥ राम राम राम राम

बं यतलिं

 समयाने

मन

वैराग्येण विनाज्ञानेन च मोक्ति रतः स्फुटं वैराग्योपस्कृतं ज्ञानं मीशः पंचदशोदिशत्।

गीतासटी० ॥यस्मात् मदधीनां ज्ञानिनां कर्म्मिणो च ज्ञानफलं कर्म्मफलं च अतो ये मां न क्तियोगेन सेवंते मत्प्रसादात् ज्ञान प्राप्तिक्रमेण गुणातीतं मोक्षं लभंते परमात्मतत्व

॥४९॥ मप्य कुर्विजानंतः सो हेतु लभंते स्यतत्र किंव कव्यमित्याकांक्षायामर्जुनेनाऽपृष्टमपि पंचदशाध्याये परमात्मात्मतत्वं निर्द्देशयिष्यत्रविरक्तस्य तत्त्वज्ञानानधिकारात्॥

वैराग्यजननार्थं प्रथमं तावत्साद्धलोकायासं संसारस्वरूपं वृक्षरूप कल्पने कारणं दर्शयन्नाह॥ ऊर्द्धं मिति॥ ऊर्द्ध्वमुपरि कालेनवर्त्तमानां अथ वा सूक्ष्मत्वा

त् कारणत्वान्नित्यत्वात् महत्त्वाच्च ऊर्द्ध्वं ब्रह्माव्यक्तं ब्रह्मस्थलं कारणं यस्येति तं ऊर्द्ध्वमूलं संसारवृक्षं अधःशाखं महदहंकारपंचतन्मात्राणि पंचमहा

भूतानि॥ एकादशेंद्रियाणि एते चतुर्विंशति॥ प्रकृतिविकाराः अस्यसंसारवृक्षस्य शाखा इव अधःकार्यरूपेण पृथग्भावं भूतानि लक्ष्याव वर्त्तंत इति॥ अथः शाखं

१ ल अथःशाखं अश्वत्थं श्वोपि न स्थाता इति नवं विधुंसीति॥ अश्वत्थं अश्वत्थं अव्ययं कारणस्य अनादित्वात् ब्रह्मज्ञानपर्यंतं संतानानुच्छेदात् देहादि

संतानस्य इति अव्ययं तं छंदासि यस्य पर्णानि चत्वारो वेदाः अयं यस्य संसारवृक्षस्य पर्णानीव धर्म्माधर्म्म तद्धेतु फलप्रकाशनार्थत्वात् सं

॥श्रीभगवानुवाच॥ ऊर्द्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं॥ छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥१॥ अधश्चोर्द्ध्वं प्रसृतास्तस्य शाखा गुण॥

प्रवृद्धा विषयप्रवालाः॥ अधश्च मूलान्यनुसंततानि कर्म्मानुबंधीनि मनुष्यलोके॥२॥ रामराम रामराम राम रामराम राम राम राम॥

सारवृक्षे परिरक्षंति पर्णानि यः तं यथा व्याख्यातं समूलं संसार वृक्षं वेद स वेदवित्॥ वेदार्थवित् न हि समूलात् संसारवृक्षात् अन्यत् ज्ञातव्यं विद्यते यतः

स० मर्द्धेज॥१॥ तस्यैव संसारवृक्षस्य अवयवव्यापारकल्पनामाह॥ अधश्चेति॥ सर्वोर्द्ध्वस्य सर्वपरस्य मूलकारणमुक्तं ऊर्द्ध्वमूलमिति॥ इदानीं शास्ताबीयक

र्म्मफलजनितरागद्वेषादिवासनाप्रधानतरकारणत्वेनाह॥ अधश्चेति मूलेति॥ अस्यसंसारवृक्षस्य सर्वोक्ताः शाखाः अधः मनुष्यलोकमारभ्य स्थावरपर्यंतं

ऊर्द्ध्वं मनुष्यलोकादारभ्य हिरण्यगर्भलोकपर्यंतं॥ स्वकर्म्म ज्ञानानुसारेण ज्ञानकर्म्मफलभूताः शाखाः प्रसृताः॥ गुणैः सत्वरजस्तमोभिः प्रवृद्धाः स्थूली

कृताः विषयप्रवालाः विषयाः शब्दादयः कर्म्मफलेभ्यः देहादिभ्यः संसारवृक्षस्य अंकुरा भवंतीति विषयप्रवालाः शाखाः अधश्च मूलानि वर्त्तमाना

देहापेक्षया प्राग्भावीयकर्म्मफलवासनाः अथः अर्वाक् तावर्त्तमानदेहारंभकधर्म्माधर्म्मप्रवृत्ति हेतुत्वात् मूलानि वर्त्तमानसंसारस्य कारणानि

मनुष्यलोके अनुसंततानि मनुष्यदेहोपार्जितानि कर्म्मानुबंधीनि धर्म्माधर्म्मलक्षणं अनुबंधः पश्चाद्भाविये षां ता वासनानुरूपं कर्म्मभ्यारभते ॥४६॥

पुमान्॥२॥

रुध्याधीनगुणसंगप्रव्रजितभवांबुद्धिंकस्वंतरतितिलज्ञकृत्यज्ञाणेचतुर्द्दशो १

समदुःखसुखः समे दुःखसुखे यस्य सः स्वात्मनिस्थितः समलोष्टाश्मकांचनः समानि तुल्यानि लोष्टाश्मकांचनानि यस्य सः ॥ तुल्यप्रियाप्रियस्तुल्ये प्रिय
अप्रिये यस्य सः धीरः धीमान् तुल्ये निंदात्मसंस्तुती यस्य तुल्यनिंदात्मसंस्तुतिः ॥२४॥ यः मानापमानयोस्तुल्यः समः निर्विकारः मित्रारिपक्षयोस्तुल्यः
समः सर्वारंभपरित्यागी दृष्टादृष्टार्थकर्मारंभपरित्यागी स गुणातीतः उच्यते ॥२५॥ अधुना कथं चैतान् गुणानतिवर्त्तते इति प्रश्नस्य प्रतिवचनमाह ॥
मां चेति ॥ च पुनः यः यतिः कर्मी वा मां ईश्वरं सर्वभूतहृदिस्थं भजनं भक्तिः सैव योगस्तेन भक्तियोगेन विवेकविज्ञानरूपेण अव्यभिचारेण सेवते ॥
स एतान् गुणान् समतीत्य ब्रह्मभूयाय ब्रह्मभावाय मोक्षाय कल्पते समर्थो भवति ॥२६॥ भगवति अव्यभिचारिणा भक्तियोगेन ब्रह्मभावः कथं स्यादित्यत
आह ॥ ब्रह्मण इति ॥ हि यस्मात् अहं ब्रह्मणः परमात्मनः प्रतिष्ठा प्रकानुयः दिष्टयो जनायपया ईश्वरस्तथा ब्रह्मतति ल्लितप्रवर्त्तते सात्यक्तिं अति

॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥२४॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः
सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥२५॥ मां च योऽव्यभिचारेण भक्तियोगेन सेवते ॥ स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥२६॥ ब्रह्म ॥ य
णो हि प्रतिष्ठाहममृतस्याव्ययस्य च ॥ शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च ॥२७॥ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे प्रकृतिगुणभेदो नाम चतुर्द्दशोऽध्यायः ॥१४॥

ब्रह्मणो ॥ अथवा ब्रह्मणः ब्रह्मशब्दवाच्यस्य सगुणब्रह्मणः प्रपंचरूपस्य प्रतिष्ठा आश्रयत्वेन निर्गुणं सर्वोपाधिरहितं परं ब्रह्म अहं ॥ अथवा ब्रह्म
णः अमृतस्य अमरणधर्मकस्य अव्ययस्य व्ययधर्मरहितस्य मनपतः शाश्वतस्य (नित्यस्य) धर्मस्य ज्ञाननिष्ठालक्षणस्य च पुनः पुनः शाश्वत धर्म
जनितस्य सुखस्य ऐकांतिकस्य एकांतजनितस्य अहं प्रत्यक् आश्रयः ॥२७॥ ॥ इति चतुर्द्दशोऽध्यायः ॥ १४ ॥
ब्रह्मण ब्रह्मशब्दवाच्यस्य सगुणब्रह्मणः प्रपंचरूपस्य प्रतिष्ठा आश्रयत्वं निर्गुणं सर्वोपाधिरहितं परं ब्रह्म अहं किं उक्तं ब्रह्मणः निचलि

सत्वरजस्तमइत्याख्यगुणस्वरूपेणपरिणतैस्तु तेनगुणानांबंधकत्वं गुणार्हतेनिबद्धस्यपुरुषस्यनिविशेषइत्येतन्तस्त्वंज्ञानमहं बंधकारणंवि
स्तरेणोक्तं॥इदानींतद्विवेकेनसम्यक्दर्शनात्मोक्षंदर्शयति॥नान्यमिति॥यदाद्रष्टाकर्तारंगुणेभ्यःसत्वादिभ्यः देहेंद्रियविषयाकारपरिणतेभ्यः अन्यंन
अनुपश्यति॥चपुनःगुणेभ्यःपरंदेहेंद्रियादिव्यापारसाक्षिणंयोवेत्तिसद्रष्टामद्भावंब्रह्मधिगच्छति॥१९॥ब्रह्मभावाधिगमप्रकारमाह॥गुणानेतानीति॥
देहीविद्वानएतान्मायोपाधिभूतान्त्रीन्सत्वादीन्गुणान्देहसमुद्भवान्॥देहोत्पत्तिबीजभूतान्अतीत्यजीवन्नेवअतीत्यजन्ममृत्युजरा:
दुःखैःचतुर्भिःजीवन्नेवमुक्तःसन् अमृतंमोक्षंअश्नुतेप्राप्नोति॥२०॥जीवन्नेवगुणानतीत्यअमृतमश्नुतेइतिश्रुत्वागुणातीतलक्षणंतस्यगुणा
त्ययोपायंचबुभुत्सयाअर्जुनउवाच॥कैर्लिंगैरिति॥सर्वैर्लिंगैर्गुणातीतस्यलक्षणंपृच्छति॥उत्तमार्द्धेनगुणातीतस्यसाधनंपृच्छति॥हेप्रभोकैर्लिंगैस्त्रि

॥नान्यंगुणेभ्यःकर्तारंयदाद्रष्टानुपश्यति॥गुणेभ्यश्चपरंवेत्ति॥मद्भावंसोऽधिगच्छति॥१९॥गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवान्॥जन्ममृ
त्युजरादुःखैर्विमुक्तोऽमृतमश्नुते॥२०॥अर्जुनउवाच॥कैर्लिंगैस्त्रीन्गुणानेतानतीतोभवतिप्रभो॥किमाचारःकथंचैतांस्त्रीन्गुणान
तिवर्तते॥२१॥श्रीभगवानुवाच॥प्रकाशंचप्रवृत्तिंचमोहमेवचपांडव॥नद्वेष्टिसंप्रवृत्तानिननिवृत्तानिकांक्षति॥२२॥उदासीनवदासीनोगुणै
र्योनविचाल्यते॥गुणावर्त्ततइत्येवंयोवतिष्ठतिनेंगते॥२३॥

लैः एतान्त्रीन्गुणान्अतीतोभवतिगुणातीतोलक्ष्यते॥किमाचारःकेनाचारेणकथंचकेनप्रकारेणएतान्त्रीन्गुणान्अतिवर्त्तते॥गुणातीतत्वंप्राप्नो
ति॥२१॥द्वितीयेध्यायेस्थितप्रज्ञस्यकाभाषेत्यादिनाप्रजहातियदेत्यादिनाचत्तोत्तरमपिपुनर्विशेषबुभुत्सयापृच्छति॥इतिज्ञात्वाप्रकारांतरेणतस्यल
क्षणादिकमाह॥भगवान्प्रकाशंचेत्यादिसप्तभिः॥यत्तावत्कैर्लिंगैर्युक्तोगुणातीतोभवतीतिपृष्टंतस्योत्तरंप्रकाशंचेति॥हेपांडवप्रकाशंसत्वस्यकार्यंप्र
वृत्तिंरजसःकार्यंमोहंतमसःकार्यंइतिएतानित्रीन्सत्वादिकार्याणिसंप्रवृत्तानिनद्वेष्टिनिवृत्तानिअप्राप्तानिनिवृत्तानिनकांक्षतिसगुणातीतइत्युत्त
रंलक्षणंउक्तं॥किमाचारइतिद्वितीयप्रश्नस्योत्तरमाह॥उदासीनवदिति॥यःसमासीनउदासीनवत्यथाउदासीनःकस्यचित्पक्षंनभजते॥तद्वदासीनःगुणातीतत्वो ॥४५॥
पायमार्गेअवस्थितःगुणैर्नैवविचाल्यते॥गुणाःदेहेंद्रियविषयाकारपरिणतान्योन्यस्मिन्वर्तंतइतियोवतिष्ठतेनचाल्यते॥२३॥रामरामरामरामराम्

वृत्ते

रजसः प्रवृद्धस्य लिंगमाह ॥ लोभ इति ॥ हे भरतर्षभ रजसि विवृद्धे सत्येतानि लिंगानि जायंते । लोभः परधनादीनां स्पृहा ॥ प्रवृत्तिः सर्वकार्येषु
प्रवृत्तिः ॥ आरंभः कर्मविशेषाणां उपक्रमः अशमः हर्षरागादिप्रवृत्तिः ॥ स्पृहा सामान्येन वस्तुविषया तृष्णा स्पृहा ॥१२॥ तमसः प्रवृद्धस्य लिंगमाह ॥ अप्रकाश इति
हे कुरुनंदन तमसि प्रवृद्धे सति एतानि लिंगानि जायंते अप्रकाशो विवेकभ्रंशः अप्रवृत्तिः अनुद्यमः प्रमादः प्रमादः कर्त्तव्यानवधानता मो-
हो मूढता अप्रकाशः ॥१३॥ मरणसमये सत्वादीनां प्रवृद्धानां फलविशेषमाह ॥ यदा सत्वे इति ॥ द्वाभ्यां ॥ यदा तु प्र-
देहभृत् आत्मा सत्वे प्रवृद्धे यदा प्रलयं मरणं याति तदा उत्तमविदां अमलान् हिरण्यगर्भादीनां लोकान् प्रतिपद्यते प्राप्नोति ॥१४॥ रजसि प्रवृद्धे प्रल

॥ लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा ॥ रजस्येतानि जायंते विवृद्धे भरतर्षभ ॥१२॥ अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ॥ तमस्येतानि जा-
यंते विवृद्धे कुरुनंदन ॥१३॥ यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत् ॥ तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥१४॥ रजसि प्रलयं गत्वा
कर्मसंगिषु जायते ॥ तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१५॥ कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं ॥ रजसस्तु फलं दुःखमज्ञानं तमसः फलं ॥१६॥ सत्वात्संजायते ज्ञानं रजसो लोभ एव च ॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१७॥ ऊर्ध्वं गच्छंति सत्वस्थाः मध्ये
तिष्ठंति राजसाः ॥ जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः ॥१८॥

प्रलयं गत्वा कर्मसंगिषु कर्मासक्तियुक्तेषु मनुष्येषु जायते । तथा तमसि प्रलीनो मृतः मूढयोनिषु पश्वादिषु जायते ॥१५॥ सत्वादीनां स्वानु-
रूपकर्मद्वारेण विचित्रफलहेतुत्वमाह ॥ कर्मण इति ॥ सुकृतस्य सात्विकस्य कर्मणः सात्विकं निर्मलं फलमाहुः रजसः राजसस्य क-
र्मणः दुःखं फलमाहुः ॥ तमसः तामसस्य कर्मणः अज्ञानं फलमाहुः ॥१६॥ इदानीं सत्वादीनां कार्यविशेषं दर्शयति ॥ सत्वादिति ॥ सत्वात्
प्रवृद्धात् ज्ञानं संजायते ॥ रजसः प्रवृद्धात् लोभः उत्पद्यते ॥ तमसः प्रवृद्धात् प्रमादमोहौ भवतः अज्ञानं च भवति ॥१७॥ इदानीं सत्वादि-
गुणविशेषशीलानां पारलौकिकं फलविशेषमाह ॥ ऊर्ध्वमिति ॥ सत्वस्थाः सत्वगुणवृत्तस्थाः ऊर्ध्वं गच्छंति । देवादिषु जायंते । राजसाः रजोगु-
णप्रवृत्ताः मध्ये तिष्ठंति । मनुष्येषु जायंते ॥ जघन्यगुणवृत्तस्थाः तस्य वृत्तं प्रमादालस्यादि तत्र स्थिताः मूढाः तामसाः अधो गच्छंति पश्वा-
स्थि दिषु जायंते ॥१८

गीताभा० ॥तत्रसत्वस्यलक्षणंबंधकत्वप्रकारंचाह॥तत्रसत्वमिति॥हेअनघअव्यसनतत्रसत्वादीनांत्रयाणांमध्येसत्वंस्फुटिकरवनिर्मलत्वात्॥प्रका

॥५४॥ शकंअनामयंनिरूपद्रवंसुखसंगेनज्ञानसंगेनचसुखीअहंज्ञानीइतिविषयभूतस्यसुखस्यज्ञानस्यचविषयिणात्मानिबध्नातिप्रयासहे

धंकरोति॥६॥रजसोलक्षणंबंधकत्वंचाह॥रजइति॥हेकौंतेयतृष्णासंगसमुद्भवंअप्राप्तेवस्तुनिअभिलाषःतृष्णाप्राप्तेविषयेप्रीतिःसंगस्तयो

समुद्भवंरजःरंजनात्रागात्मकंजानीहितद्रजःदेहिनंआत्मानंकर्मसंगेनदृष्टादृष्टार्थेषुकर्मसुसंगेनतत्परतयानिबध्नाति॥७॥तमसो श्री

लक्षणंबंधकत्वमाह॥तमस्त्विति॥हेभारततुपुनःतमःअज्ञानजंअज्ञानात्जातंसर्वदेहिनांमोहनंमोहकरंविद्धिजानीहितत्तमःप्रमादाल न

२ स्यनिद्राभिर्देहिनंबध्नाति॥८॥तुपुनःसत्वादीनामेवस्वस्वकार्यकारणसामर्थ्यातिशयंसंक्षेपतआह॥सत्वंसुखेसंजयतिहेभारतसत्वंसुखे ह

॥तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयं॥सुखसंगेनबध्नातिज्ञानसंगेनचानघ॥६॥रजोरागात्मकंविद्धितृष्णासंगसमुद्भवं॥तन्निब

ध्नातिकौन्तेयकर्मसंगेनदेहिनं॥७॥तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनां॥प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत॥८॥सत्वंसुखे

संजयतिरजःकर्मणिभारत॥ज्ञानमावृत्यतुतमःप्रमादेसंजयत्युत॥९॥रजस्तमश्चाभिभूयसत्वंभवतिभारत॥रजःसत्वंतमश्चैवत

मःसत्वंरजस्तथा॥१०॥सर्वद्वारेषुदेहेस्मिन्प्रकाशउपजायते॥ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत॥११॥रामरामरामरामरामराम

देहिनंसंजयतिसंश्लेषयति॥रजोगुणःदेहिनंकर्मणिसंश्लेषयति॥तुपुनःतमोपिज्ञानंआवृत्यदेहिनंप्रमादेसंश्लेषयति॥९॥गुणानांस्वस्वकार्यकार

णेएवमन्योन्याविरोधहेतुमाह॥रजस्तमश्चेति॥हेभारतरजश्चतमश्चद्वावपिअभिभूयजित्वासत्वंउद्भवतिवर्द्धतेतदाज्ञानसुखादिस्वकार्यंक

रोति॥सत्वंचरजस्तमःद्वावपिअभिभूयःजित्वारजउद्भवति॥तदाकर्मतृष्णादिस्वाकार्यमारभते॥तथासत्वंरजःउभावपिअभिभूयःतम

उद्भवति॥तदाज्ञानावरणप्रमादादिस्वकार्यमारभते॥१०॥इदानींसत्वादीनांप्रवृद्धानांलिंगानिउपदिशति॥तत्रप्रथमंसत्वस्यप्रवृद्धस्यलिंगमाह॥स

र्वद्वारेष्विति॥यदासर्वस्मिन्देहेसर्वद्वारेषुश्रोत्रादिषुबुद्धिव्यापारःप्रकाशरूपःज्ञानाख्यःउपजायते॥तदातेनप्रकाशलिंगेनसत्वंप्रवृ ॥५४॥

द्धमित्यपिविद्यात्॥११॥

हाबेन

गुणस्य कृतो ऽस्वतंत्र त्वेवारयन गुणसंगतः प्राग्संसारवैचित्र्यविस्तरेण भवत्त्वतुर्दशे॥१

निरीश्वर गुण तत्पूर्वं उत्तमफलत्वात्

ईश्वराधीनयोः क्षेत्रक्षेत्रज्ञयोः जगत्कारणत्वेन न तु सांख्यानामिव स्वतंत्रयोः कारणं संयोगस्येत्यनेन गुणसंगस्य संसारकारणत्वमुक्तं तत्र कस्मिन्गुणे क
थं संगः के वा गुणाः कथं बध्नंतीति गुणेभ्यश्च मोक्षणं कथं स्यात् मुक्तस्य किं लक्षणमित्येवमर्थं अध्यायारंभेप्यतिशयेन स्तौति परं भूयः प्रवक्ष्यामीति
॥परं भूयः प्रवक्ष्यामि॥ भूयः पुनरपि ज्ञानानां यज्ञादिज्ञेयवस्तुविषयाणां परं वस्तुविषयत्वादुत्तमं ज्ञानं प्रवक्ष्यामि यत् ज्ञानं ज्ञात्वा प्राप्य सर्वे मुन
यः इतोऽस्मात् देहबंधनात् ॥परां सिद्धिं गताः॥१॥ ज्ञानसाधनानुष्ठानात् इदं यथोक्तं ज्ञानमुपाश्रित्य प्राप्य मम साधर्म्यमागताः मत्स्वरूपतां प्राप्ताः
सर्गेपि सृष्टिकालेपि नोपजायंते न उत्पद्यंते च पुनः प्रलये प्रलयेण नाशकालेन व्यथंति न चालयंति॥२॥ क्षेत्रक्षेत्रज्ञसंयोगाईश्वराधीनत्वेन जग
त्कारणत्वं न स्वतंत्रत्वात्॥ मम योनिरिति॥ हे भारत महद्ब्रह्म सर्वविकाराणां धारणात् सर्वकार्यस्य महत्त्वं यस्य महद्ब्रह्म सर्वभूतानां योनिः त्रिगुणात्मि

॥श्रीभगवानुवाच॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं॥ यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः॥१॥ इदं
ज्ञानमुपाश्रित्य मम साधर्म्यमागताः॥ सर्गेपि नोपजायंते प्रलये न व्यथंति च॥२॥ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं
दधाम्यहं॥ संभवः सर्वभूतानां ततो भवति भारत॥३॥ सर्वयोनिषु कौंतेय मूर्त्तयः संभवंति याः॥ तासां ब्रह्म मह
द्योनिरहं बीजप्रदः पिता॥४॥ सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः॥ निबध्नंति महाबाहो देहे देहिनमव्ययं॥५॥

का मायाख्या मदीया सा भूतं तस्मिन् महति ब्रह्मणि योनौ मायायां गर्भं सर्वभूतजन्मकारणं बीजं दधामि॥ क्षेत्रेण सह क्षेत्रज्ञं संयोजयामीत्यर्थः॥
सर्वभूतानां ततः संभवो भवति॥३॥ न केवलं सृष्ट्यापक्रमे मम महद्योनिर्ब्रह्म प्रकृतिपुरुषौ भूतोत्पत्तिहेतू अपितु सर्वदेवेत्याह॥ सर्वयोनिष्विति॥ हे कौ
तेय सर्वयोनिषु देवपितृमनुष्यपशुमृगादियोनिषु याः मूर्त्तयो देहाः विशेषाः संभवंति याः तासां मूर्त्तीनां महद्ब्रह्म माया त्रिगुणात्मिका मा
योनिः कारणं अहं बीजप्रदः गर्भाधानकर्ता पिता॥४॥ तदेवं परमेश्वराधीनाभ्यां प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिनिरूपणद्वारा के गुणाः क
थं बध्नंतीत्येतमर्थं निरूपयन् प्रसंगेन पुरुषस्य जीवस्य संसारप्रपंचयति॥ सत्वमित्यादि चतुर्दशभिः॥ हे महाबाहो सत्वरजस्तम इति गुणाः
प्रकृतिसंभवाः मायया संभूताः अव्ययं व्ययरहितं देहिनं आत्मानं देहे शरीरे निबध्नंति स्वाधीनमिव कुर्वंति॥५॥ राम राम राम राम

विविक्तोयेनततेनमि ओषैप्रकृतिपुरुषौतंवंदेपरमा कारणरहितात् तात्गत
नंदनंदनंदनमीश्वरं १

गीताभाष्यटी० एकस्यात्मनः सर्वदेहात्मत्वे तथापि संसारावस्थायां देहसंबंधनिमित्तैः कर्म्मभिः तत्फलैश्च सुखदुःखादिभिः वैषम्यं स्यादिति कुतः समदर्शनमिति।
॥४३॥ तदाह ॥ अनादित्वादिति ॥ हे कौंतेय अयं परमात्मा अनादित्वात् निरवयवत्वात् न स्वरूपतः व्येति तेन अव्ययः तथा निर्गुणत्वेनापि न व्येति
तेन च अव्ययः शरीरे उपलभ्यमानत्वात् शरीरस्थः उच्यते शरीरस्थोपि निःक्रियत्वात् न करोति अकर्तृत्वात् कर्म्मफलेन न लिप्यते यः कर्ता
करोति स कर्म्मफलेन लिप्यते अयं आत्मा तथा न ॥ ३१ ॥ अकर्तृत्वे अलेपत्वे च दृष्टांतमाह ॥ यथा सर्वगतमिति ॥ यथा सर्वगतमपि आकाशं सौक्ष्म्यात्॥
सूक्ष्मत्वात् न उपलिप्यते केनापि सर्वं न संबध्यते तथा सर्वत्र सर्वस्मिन् देहे अवस्थितोपि आत्मा अतिसौक्ष्म्यात् नोपलिप्यते असंगत्वा
त् लेपो नास्तीत्यर्थः ॥ प्रकाशदृष्टांत ॥ ३२ ॥ प्रकाशत्वात् प्रकाश्यधर्म्मैर्न युज्यत इति रविदृष्टांतेनाह ॥ यथा प्रकाशयतीति ॥ हे भारत यथा र

॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥ शरीरस्थोपि कौंतेय न करोति न लिप्यते ॥ ३१ ॥ यथा सर्वगतं
सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥ ३२ ॥ यथा प्रकाशयत्येकः कृत्स्नं ॥
लोकमिमं रविः ॥ क्षेत्रं क्षेत्री यथा कृत्स्नं प्रकाशयति भारत ॥ ३३ ॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा ॥ भूत
प्रकृतिमोक्षं च ये विदुर्यांति ते परं ॥ ३४ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जु
नसंवादे क्षेत्रक्षेत्रज्ञयोर्दर्शनोनाम त्रयोदशोध्यायः ॥ १३ ॥ राम राम राम राम राम राम राम राम राम राम राम

विः एकः सन् इमं कृत्स्नं लोकं युगपत् प्रकाशयति ॥ तथा अविवत् क्षेत्री आत्मा एकः सन् कृत्स्नं क्षेत्रं शरीरं माया कार्यं युगपत् प्रकाशयति ॥ ३३ ॥
अध्यायार्थं उपसंहरति ॥ क्षेत्रक्षेत्रज्ञयोरिति ये क्षेत्रक्षेत्रज्ञयोः एवं यथा प्रदर्शितप्रकारेण अंतरं इतरेतरस्मात् भेदरूपं विशेषं ज्ञानचक्षुषा शास्त्राचा
र्योपदेशजनितज्ञानचक्षुषा च पुनः भूतप्रकृतिमोक्षं भूतानां प्रकृतिः अविद्या अव्याकृतरूपा तस्याः मोक्षणं अभावगमनं ये विदुः ते परं ॥
ब्रह्मस्वरूपं यांति ॥ आप्नुवंति ॥ ३४ ॥ इति त्रयोदशोध्यायः ॥ १३ ॥ नंदे ॥४३॥

कर्मयोगस्य तृतीयचतुर्थपंचमाध्यायेषु प्रपंचितत्वात् ध्यानयोगस्य षष्ठाष्टमयोः प्रपंचितत्वात् ॥ ध्यानादेव भ्रमसांख्यविविक्तात्मविषयत्वात् ॥ सां
ख्यमेव सम्यक्दर्शनं प्रपंचयन्नाह ॥ यावदिति ॥ यावत्संजायते किंचित् ॥ हे भरतर्षभ ॥ यावत् स्थावरजंगमं स्थावरजंगमरूपं सत्वं वस्तु संजायते समुत्प
द्यते ॥ तत्सर्वं क्षेत्रक्षेत्रज्ञसंयोगात् क्षेत्रक्षेत्रज्ञयोः मिथ्याध्यारोपितसंयोगात् समुत्पन्नं विद्धि जानीहि ॥ २६ ॥ अविवेककृतं संसारोद्भवं उक्त्वा तन्निव
र्तये विविक्तात्मविषयं सम्यक्दर्शनमाह ॥ समं सर्वेष्विति ॥ यः सर्वेषु ब्रह्मादिस्थावरांतेषु समं निर्विशेषं तिष्ठंतं देहादिभ्यः परमं ईशितारं परमे
श्वरं तेषु ब्रह्मादिषु नश्यत्सु अविनश्यंतं एवं यथोक्तं परमेश्वरं पश्यति स पश्यति ॥ २७ ॥ सम्यक्दर्शनस्य फलवचनेन तत्स्तौति ॥ समं पश्यन्नि
ति ॥ हि यस्मात् सर्वभूतेषु समं स्थितं तुल्यतया अवस्थितं ईश्वरं समं समतया स्थितं पश्यन् आत्मनात्मानं न हिनस्ति ततः एवं आत्मनो ऽहिं ॥

यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं ॥ क्षेत्रक्षेत्रसंयोगात् तद्विद्धि भरतर्षभ ॥ २६ ॥ समं सर्वेषु भूतेषु तिष्ठंतं परमे
श्वरं ॥ विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥ २७ ॥ समं पश्यन् हि सर्वत्र समवस्थितमीश्वरं ॥ न हिनस्त्यात्मनात्मा
नं ततो याति परां गतिं ॥ २८ ॥ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ॥ यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९ ॥
यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३० ॥ राम राम राम राम राम राम राम राम

मनात् परां प्रकृष्टां मोक्षरूपां गतिं याति ॥ २८ ॥ ननु शुभाशुभकर्मकर्तृत्वेन वैषम्योपलंभात् कथमात्मनः समत्वमित्याशंक्याह ॥ प्रकृत्यैवेति ॥ च
पुनः यः सर्वशः सर्वप्रकारैः प्रकृत्या त्रिगुणात्मिकया परमेश्वर्या मायया एव देहेंद्रियादिव्यापाररूपाणि क्रियमाणानि कर्माणि पश्यति तथा
त्मानं अकर्तारं सर्वोपाधिरहितं पश्यति स पश्यति सर्वज्ञ इत्यर्थः ॥ २९ ॥ इदानीं भूतानां अपि प्रकृतितावन्मात्रत्वेन अभेदात् भूतभेदकृतमपि ॥
आत्मनो ऽभेदं पश्यन् ब्रह्मत्वं उपैतीत्याह ॥ यदा भूतेति ॥ यस्मिन्काले भूतपृथग्भावं भूतानां पृथग्भावं एकस्मिन् आत्मनि स्थितं एकस्थं प
श्यति ततः आत्मनः एवत्याविर्भावतिरोभावादिविस्तारं च यदा पश्यति ॥ तदा तस्मिन्काले ब्रह्म संपद्यते ब्रह्मैव भवति ॥ ३० ॥ राम राम राम राम

लि

गी॰ता॰स॰टी॰ ॥ पुरुषस्य असंगस्य कथं सुखदुःखभोक्तृत्वमित्याह ॥ पुरुष इति ॥ यस्मात्पुरुषः क्षेत्रज्ञः प्रकृतिस्थः प्रकृतौ अविद्यायां स्थितः प्रकृतिजान् प्रकृतितो
॥४२॥ जातान् गुणान् सुखदुःखादीन् भुंक्ते उपलभते अस्य च क्षेत्रज्ञस्य पुरुषस्य सदसद्योनिजन्मसु सद्योनयः देवादीनां ॥ असद्योनयः तिर्यगादीनां स्थि-
ति तत्र जन्मादि तेषु सदसद्योनिजन्मसु गुणसंगः गुणेषु सत्वादिषु सुखदुःखमोहाद्याकारपरिणतेषु संगः तदात्मभावः अविद्या कारणं हेतुः ॥ २१ ॥ इदानीं प्र-
कृतिविवेकाद्देवपुरुषस्य संसारः तत्स्वरूपेण इत्याशयेन तस्य स्वरूपमाह ॥ उपद्रष्टेति ॥ अस्मिन् देहे अन्यः कोप्यपरः पुरुषः देहेन्द्रियव्यापाराणां साक्षी उपद्रष्टा
देहेन्द्रियादीनि स्वव्यापारेषु वर्त्तमानानि न निवारयति ॥ स्वयमप्रवर्त्तमानोपि प्रवर्त्तक इव उपपते ॥ तेन अनुमंता देहादीनां आत्माधीनास्थिति-
स्तेन भर्त्ता अंतःकरणप्रतिबिंबितसुखदुःखाद्यनुभवति अतः भोक्ता सर्वात्मत्वात् स्वतंत्रत्वात् महेश्वरः सर्वोत्तरतमः आत्मा इत्युक्तः ॥ २२ ॥ वरस्या

॥ पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान् ॥ कारणं गुणसंगोस्य सदसद्योनिजन्मसु ॥ २१ ॥ उपद्रष्टानुमंता च भर्त्ता भोक्ता महेश्वरः ॥
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ २२ ॥ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ॥ सर्वथा वर्त्तमानोपि न स भूयोभिजायते ॥ २३ ॥
ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना ॥ अन्ये सांख्येन योगेन कर्म्मयोगेन चापरे ॥ २४ ॥ अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उ॥
पासते ॥ तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

॥ एवं प्रकृतिपुरुषविवेकज्ञानेन स्तौति ॥ य एवमिति ॥ यः एवंप्रकारेण पुरुषं साक्षात् अहमिति ॥ वेत्ति च प्रकृतिं च गुणैः स्वविकारैः सह प्रकृतिं अवि-
द्यालक्षणां वेत्ति स सर्वथा सर्वप्रकारेण वर्त्तमानोपि भूयः पुनः पतिते अस्मिन् शरीरे न अभिजायते ॥ २३ ॥ एवंभूते विविक्तात्मध्याने साधनवि-
कल्पानाह ॥ ध्यानेनेति ॥ केचिद्योगिनः ध्यानेन एकाग्रतया आत्मचिंतनेन आत्मनि बुद्धौ आत्मना ध्यानसंस्कृतेन अंतःकरणेन आत्मानं परमा-
त्मस्वरूपं पश्यंति ॥ अन्येपि सांख्येन योगेन सत्वादिगुणानां उच्चातेभ्यः पृथक् नित्यत्वेन विलक्षणं आत्मानं सांख्ययोगस्तेन परमेश्वरबुद्ध्या ॥
नुष्ठीयमानं कर्म्मैव योगस्तेन कर्म्मयोगेन ॥ २४ ॥ अतिमंदाधिकारिणां निस्तारोपायमाह ॥ अन्ये त्विति ॥ पुनः अन्ये तु विविक्तत्वेन प्रतरेणाय-
योक्तमार्गानजानंतः अन्येभ्यः आचार्येभ्यः श्रुत्वा उपासते चिंतयंति तेपि श्रुतिपरायणाः तत्रकृतविश्वासाः मृत्युं संसारं अतितरंति अ- ॥४२॥
तिक्रमंत्येव ॥ २५ ॥

आत्मनि बुद्धौ आत्मानं परमात्मस्वरूपं पश्यंति श्रवणपरायणाः बुद्धौ

देहलं

रू

॥ न पुनः तत् ज्ञेयं भूतानां त्वक्पर्यन्तानां वपिः व्यापकः चैतन्यरूपेण वर्त्तते ॥ यत देहमध्ये जीवरूपेण वर्त्तते ॥ मध्यस्थानीयं च ॥ चरं स्थावरं जंगम
रूपं सर्वं ज्ञेयं ब्रह्मैव वर्त्तते ॥ अविवेकिनः तत् ज्ञेयं प्रतिसूक्ष्मत्वात् यथावत् स्वस्वरूपेण अविज्ञेयं अतएव तेषां दूरस्थं विवेकिनां आत्मत्वेन अन्तिकत्वात् ॥
अंतिके निकटे ॥१५॥ न पुनः भूतेषु सर्वभूतदेहेषु विभक्तं व्योमवत् सर्वगतं एकमेव सत् प्रतिदेहं विभिन्नं इव च स्थितमेव दृश्यते ॥ तत् ज्ञेयं भूतभर्तृ स्थितिकाले
भूतानि बिभर्ति भर्तृ ॥ ग्रसिष्णु प्रलयकाले ग्रसनशीलं प्रभविष्णु सर्गकाले प्रभवनशीलं ॥१६॥ सर्वत्र विद्यमानमपि नोपलभ्यते चेत् तर्हि तत् ज्ञेयं तमोरूपं स्या
दित्याह ॥ ज्योतिषामपि ॥ ज्योतिषां आदित्यादीनामपि तत् ज्ञेयं ज्योतिः चैतन्यरूपेण प्रकाशकं तमसः अज्ञानात् परं उच्यते ज्ञानं अमानित्वादि इत्यादि
ज्ञानसाधनं ज्ञेयं परं ब्रह्म तदेव ज्ञेयं ज्ञातुम् त्वात् परमानंदत्वात् ज्ञानगम्यं ज्ञानसफलं भवति एतत् सर्वस्य हृदि विशेषेण स्थितं ॥१७॥ यथोक्तार्थमुप

॥ बहिरंतश्च भूतानामचरं चरमेव च ॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके च तत् ॥१५॥ अविभक्तं च भूतेषु विभक्तमिव च स्थितं ॥ भूतभर्तृ च
तत् ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१६॥ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ॥ ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं ॥१७॥ इति क्षेत्रं तथा ज्ञानं ज्ञे
यं चोक्तं समासतः ॥ मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१८॥ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ॥ विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभ
वान् ॥१९॥ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ॥ पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥२०॥ राम राम राम राम राम राम

संहरति ॥ इत्येवं क्षेत्रं पंचमहाभूतादि धृत्यंतं ॥ तथा ज्ञानं उच्यते अमानित्वं एतत् त्रयं समासतः संक्षेपेन उक्तं मद्भक्तः एतत्त्रयं विज्ञाय मद्भावाय मो
क्षाय उपपद्यते घटते ॥१८॥ इदानीं प्रकृत्यध्यायस्य प्रकृतिपुरुषयोः लक्षणं संसारहेतुत्वं विषयविवेकेन निरूपयन् यद्धि कारयितव्यं इत्यादि सर्वा
त्मनैव प्रपंचयति ॥ प्रकृतिमिति ॥ पंचभिः प्रकृतिं अपरां क्षेत्रलक्षणां पुरुषं प्रकृतिं जीवरूपां तौ उभौ अनादी विद्धि विकारान् बुद्ध्यादि देहेंद्रियाणां
तान् गुणान् सुखदुःखमोहप्रत्ययाकारपरिणतान् प्रकृतिसंभवान् प्रकृतिः त्रिगुणात्मिका मायातत् संभवान् विद्धि ॥१९॥ इदानीं विकाराणां च
आत्मनां च स्वरूपं दर्शयन् तेषां प्रकृतिसंभवत्वं कथयन् पुरुषस्य संसारहेतुत्वं दर्शयति ॥ कार्येति ॥ कार्यकारणकर्तृत्वे कार्यं शरीरं कार
णानि इंद्रियाणि तेषां कर्तृत्वे उत्पादकत्वे प्रकृतिः हेतुः कारणं पुरुषः क्षेत्रज्ञः सुखदुःखानां भोक्तृत्वे ज्ञातृत्वे हेतुः कारणं उच्यते ॥२०॥

अमानित्वादितत्त्वज्ञानार्थदर्शनपर्यंतं तत् ज्ञानं ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादि तमसः परमुच्यते इत्यंतं

तत्वविचारतोप्यशोकमोहौ सहत्वा शीतोष्णादिसहनं युक्तमित्याह ॥ नासत इति ॥ असतः शीतोष्णादेः सकारणस्य अविद्यमानस्य तस्य भावः सत्ता न विद्यते तथा सतः आत्मनः
अभावः अविद्यमानता न विद्यते । तुपुनः तत्वदर्शिभिः ब्रह्मज्ञैः यथात्मदर्शनशीलैः अनयोरपि अनयोः सदसतोः आत्मानात्मनोः अंतो निर्णयो दृष्टः ॥१६॥ यत्तु सत्त्व
भावं अविनाशि वस्तु अविशेषेणोक्तं तद्विशेषतो दर्शयति ॥ अविनाशीत्विति ॥ तुपुनः येन इदं सर्वं जगत् ततं व्याप्तं तत् सत् अविनाशि विद्धि ॥ कश्चिदपि पुमान् अस्य
अव्ययस्य आत्मनः विनाशं अभावं कर्तुं न अर्हति ॥१७॥ यत्त्वसत्स्वरूपस्वात्मसत्ता व्यभिचारितामान्येनोक्तं तदपि विशेषतो दर्शयति ॥ अंतवंत इति ॥ देहिनः शरीरिण इमे
देहाः अंतवंतः उक्तानि तस्य अविक्रियस्य अनाशिनो विनाशरहितस्य अप्रमेयस्य प्रमाणातीतस्य शरीरिणः आत्मनः इमे देहाः अंतवंतः अंतो नाशो येषां ते अंतवं
तः नाशोपि लोके द्विविधः यथा देहो भस्मीभूतो अदर्शनं गतो नष्ट उच्यते ॥ विद्यमानोपि यथा अन्यथापरिणतो व्याध्यादियुक्तो नष्ट उच्यते ॥ तत्र अस्य
आत्मनः अनाशिनः नित्यस्य द्विधेनापि नाशेन संबंधो नास्ति ॥ ततो तस्मात् मोहजं शोकं त्यक्त्वा युध्यस्व स्वधर्मं युद्धं कुरु ॥१८॥ यत्त्वात्मनो हंतृत्वं निमि
त्तं भीष्मादीनां हन्यमानानिमित्तं दुःखमुक्तं एतान्न हंतुमिच्छामीत्यादिना तदपि आत्मविनाशादिहेतुक शोकमोहवन्निर्हरन्नेवेत्याह ॥ य एनमिति ॥ यः पुमान् एनं दे

नासतो विद्यते भावो नाभावो विद्यते सतः उभयोरपि दृष्टोंतस्त्वनयोस्तत्वदर्शिभिः ॥१६॥ अविनाशि तु तद्विद्धि येन सर्वमिदं ततं विनाशमव्ययस्यास्य
न कश्चित्कर्तुमर्हति ॥१७॥ अंतवंत इमे देहा नित्यस्योक्ताः शरीरिणः अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥ य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं उभौ तौ
न विजानीतो नायं हंति न हन्यते ॥१९॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥

२ हिनं हंतारं हननक्रियायाः कर्त्तारं वेत्ति जानाति च पुनः यः पुमान् एनं देहिनं हतं हननक्रियायाः कर्मभूतं मन्यते तावुभावपि न विजानीतः देहं हंत्यादि संघात एवं हं
ता हन्यते च इति तौ न अवबुध्येते विवेकेन आत्मानं हंताहं हतोहं इति देहं न ते आत्मानं अहं प्रत्ययविषयं यौ विजानीतः तौ आत्मस्वरूपानभिज्ञावित्यर्थः यस्मात् नायं
आत्मा हंति हननक्रियायाः कर्त्ता न च हन्यते ॥ न च कर्म भवतीत्यर्थः ॥ अविक्रियत्वात् कथमविक्रिय आत्मेति द्वितीयो मंत्रः ॥२॥ अविक्रियत्वमाह ॥ हननक्रियायाः कर्त्ता
कर्म च न भवतीत्युक्तं ॥ एवं स्मिन् मंत्रे तदेव अविक्रियत्वे हेतुभूतं षड्भावविकाररहितत्वेन साधयति ॥ न जायत इति ॥ अयमात्मा कदाचिन्नोत्पद्यते वा कदाचिन्न म्रिय
ते वा अथवा अयं आत्मा भूत्वा भूयः भविता न ॥ न जायते यस्मादेव तस्मादजः ॥ न जायत इति ॥ अनेन षड्भावविकाररहितत्वमुक्तं जायते अस्ति विपरिणमते वर्द्धते अपक्षीय
ते नश्यति इति षड्भावविकाराः न जायते न म्रियते अजः अतो विकारो निरस्तः शाश्वतः निरवयवत्वात् न स्वरूपेण अपक्षीयते निर्गुणत्वात् न गुणक्षयेण अपक्षीय
ते इति अपक्षयरहितः पुराणः निरवयत्वात् अवयवोपचयेन वृद्धिर्नास्ति अत एव पुराणः नूतनत्वाभावात् पुराणः एतेन वृद्धिलक्षणविकाररहितः न ह
न्यते ॥ न विपरिणमते हंति इत्यनेन विपरिणामार्थः तेन विपरिणामस्य वा क्रिया निषिध्यते अन्यानि अपि तानि नास्ति । तेन षड्भावविकाररहितः ॥२०॥

गीतासटी॰ ॥६॥

य एनं वेत्ति हन्तारमित्यनेन आत्मनो हननक्रियां प्रति कर्मत्वकर्तृत्वाभावं प्रतिज्ञायत इति। अनेन अविक्रियत्वं हेतुं साधयित्वा प्रतिज्ञानामुपसंहरति॥ वेदाविना
शिनमिति॥ यः पुमान् एनं आत्मानं अविनाशिनं नित्यं अजं अव्ययं वेद जानाति। हे पार्थ स पुरुषः कथं केन प्रकारेण पुरुषं घातयति॥ कं पुरुषं हंति हिनस्ति।
आत्मनः षड्भावविकाररहितत्वात् हंतुं न शक्यते॥२१॥ आत्मनः पूर्वं प्रतिपादितमविनाशित्वं दृष्टान्तेन दृढयति॥ वासांसीति॥ नरः पुरुषः यथा येन प्र
य कारेण। लोके जीर्णानि विशीर्णानि दुर्बलतां गतानि वासांसि वस्त्राणि विहाय परित्यज्य अपराणि अन्यानि नवानि नूतनानि गृह्णाति उपादत्ते देही आत्मा
तथा तेन प्रकारेण जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति प्राप्नोति॥ देही आत्मा पुरुषवत्॥ अविक्रिय एवेत्यर्थः। कर्मनिबंधनानां देहानाम
वस्त्रप्रावित्वात्॥ न देहनाशे शोकावकाश इत्यर्थः॥२२॥ विनाशहेत्वभावादप्यविनाशीत्याह॥ नैनमिति॥ शस्त्राणि अस्त्रादीनि एनं आत्मा
नं न छिंदंति। निरवयवत्वात्॥ अवयवविभागं न कुर्वंति तथा पावकोऽग्निरपि एनं आत्मानं न दहति न भस्मीकरोति च पुनः आपः एनं आत्मा नं
न क्लेदयंति॥ आर्द्रीभावेन न शीर्णयंति॥ अपां हि सावयववस्तुन आर्द्रीभावकरणेनावयवविश्लेषापादने सामर्थ्यं न तत्तु निरवयव आत्म
म वेदाविनाशिनं नित्यं य एनमजमव्ययं। कथं स पुरुषः पार्थ कं घातयति हंति कं॥२१॥ वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। तथा
शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥२२॥ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः। न चैनं क्लेदयंत्यापो न शोषयति मारुतः
॥२३॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च। नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥२४॥ अव्यक्तोऽयमचिंत्योऽयमविकार्योऽय
मुच्यते। तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि॥२५॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं। तथापि त्वं महाबाहो नैवं शोचितुमर्हसि २६
नि न भवति मारुतः वायुरपि एनं आत्मानं न शोषयति॥२३॥ विनाशहेत्वभावे सिद्धमविनाशित्वमनुवदति॥ अच्छेद्योयमिति॥ अयं आत्मा अच्छे
द्यः छेत्तुमशक्यः अयं आत्मा अदाह्यः दग्धुमशक्यः अक्लेद्यः आर्द्रीभावेन शीर्णयितुमशक्यः च पुनः अशोष्यः शोषयितुमशक्यः नित्यः अविनाशी सर्वत्र
गः सर्वव्यापी स्थाणुः स्थिरः अचलः सनातनः चलनरहितः चिरंतनः॥२४॥ यस्मात् अयं आत्मा अव्यक्तः इंद्रियैः न अभिव्यज्यते अचिंत्यः बुद्धिद्वयागोचरः
निरवयवत्वात्॥ असंगत्वात्॥ अविकार्यः विक्रियारहितः अविनाशित्वेन प्राप्तशोकाभावमुपसंहरति॥ तस्मादेवमिति॥ तस्मात् एनं आत्मानं अच्छेद्यमदाह्यम
क्लेद्यमशोष्यं नित्यं सर्वव्यापिनं स्थिरं अचलं सनातनं अव्यक्तं अचिंत्यं अविकार्यं एवं विधं विदित्वा शोचितुं नार्हसि॥२५॥ देहादीनां विनाशेऽप्यात्मनोऽवि
नाशित्वात् शोकमोहौ न कार्याविति उक्तं॥ इदानीं देहविनाशेनात्मनोऽपि विनाशमंगीकृत्याह॥ अथ चैनमिति॥ अथ च अंगीकारे एनं आत्मानं नित्य ॥६॥
जातं शरीरेण सह सर्वदा जायमानं अथवा नित्यं म असे तथापि हे महाबाहो त्वं एनं आत्मानं शोचितुं नार्हसि॥२६॥

तत्रापि हेतुमाह ॥ जातस्येति ॥ हि यस्मात् जातस्य जन्मः ध्रुवः अव्यभिचारी मृत्युः च पुनः मृतस्य ध्रुवं अव्यभिचारि जन्म ॥ तस्मात् त्वं अपरिहार्येर्थे निराकरणे
ऽशक्येर्थे एवं भूतात्मानं शोचितुं नार्हसि ॥२७॥ यद्यपि आत्मा नित्यः शोको न युक्तः तथापि देहेंद्रियादि भूतसंघातमुद्दिश्य शोको युक्त इत्याशंक्याह तत्रापि शोको न युक्त इ
त्याह ॥ अव्यक्तेति ॥ हे भारत भूतानि अव्यक्तादीनि अदर्शनं आदिर्येषां तानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि मरणादनंतरं अव्यक्तानि ॥ तत्र का प
रिदेवना का प्रलापः कः प्रतिबुद्धस्य स्वप्नदृष्टबंधुष्विव शोको न युज्यत इत्यर्थः ॥२८॥ न केवलं त्वमेव विद्वानपि आत्मापरिज्ञानात् शोकमोहौ प्रवर्तते आत्माप
रिज्ञानं च दुर्विज्ञेयत्वात् आत्मनः इत्यभिप्रायेण दुर्विज्ञेयत्वमात्मन आह ॥ आश्चर्यवदिति ॥ कश्चित् एनं आत्मानं आश्चर्यवत् अदृष्टपूर्वं विस्मयकारि वस्तु तद्वत् प
श्यति ॥ च पुनः अन्यः तथैव आश्चर्यवत् अनुक्तं सर्वमद्भुतं उच्यमानं यथा तद्वत् वदति ॥ च पुनः एनं आत्मानं अन्यः आश्चर्यवत् अश्रुतं सर्वमद्भुतं श्रूयमा
णं यथा तद्वत् शृणोति ॥ दृष्ट्वा उक्त्वा श्रुत्वापि एनं आत्मानं कश्चित् न वेद ॥ यस्मात् आत्मनो दुर्विज्ञेयत्वात् आत्माज्ञानतः तौ सर्वस्य शोकमोहौ निर्मूलौ ॥ विवेकि
नां न कर्तव्यावित्यभिप्रायेण अशोच्यानित्यादि प्रकरणप्रतिपादितमर्थमुपसंहरति ॥२९॥ देही नित्यमिति ॥ हे भारत अयं देही सर्वस्य देहे हन्यमानेपि नित्यं अवध्यः त

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च । तस्मादपरिहार्येर्थे न त्वं शोचितुमर्हसि ॥२७॥ अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का
परिदेवना ॥२८॥ आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ॥ आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२९॥ देही नित्यमवध्योयं
देहे सर्वस्य भारत । तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥३०॥ स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि । धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥३१॥ य
दृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् । सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशम् ॥३२॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि । ततः स्वधर्मं कीर्तिं च हित्वा पापम

स्मात् सर्वाणीति भीष्मद्रोणादीनि भूतानि उद्दिश्य शोचितुं नार्हसि ॥३०॥ न केवलं परमार्थदृष्ट्या शोको न युक्तः स्वधर्मदृष्ट्यापि शोको न युक्त इत्याह ॥ स्वधर्ममपीति ॥ च पुनः
स्वधर्ममपि क्षत्रियस्य स्वकीयं युद्धरूपं धर्मं अवेक्ष्य विचार्य विकंपितुं चलितुं नार्हसि हि यस्मात् क्षत्रियस्य धर्म्यात् युद्धात् धर्मादनपेतात् संग्रामात् अ
न्यत् श्रेयः न विद्यते ॥३१॥ स्वधर्मकरणे हानिं युद्धकरणे कारणांतरमाह ॥ यदृच्छेति ॥ हे पार्थ ईदृशं युद्धं सुखिनः पुण्यवंतः क्षत्रियाः लभंते कीदृशं अप्राप्तं स्व
र्गद्वारं अपावृतं स्वर्गद्वारमित्यर्थः च पुनः यदृच्छया उपपन्नं अप्रार्थितमागतं ॥३२॥ स्वधर्माकरणे दोषमाह ॥ अथ चेदिति ॥ हे अर्जुन अथ चेत् त्वं इमं
धर्म्यं धर्मादनपेतं संग्रामं युद्धं न करिष्यसि ततः स्वधर्मं क्षत्रियधर्मं च पुनः कीर्तिं महादेवादिसमागमनिमित्तां ख्यातिं हित्वा पापं अधर्मजन्यमपकीर्तिं
च प्राप्स्यसि ॥३३॥

गीटि ॥३३॥

नकेवलंप्रत्यवायएवनचेत्किंत्वकीर्तिरपिस्यादित्याह॥अकीर्तिंचापीति॥कथयंभूतान्यपितेतवअव्ययांदीर्घकालांअकीर्तिंकथयिष्यंति॥चपुनःसंभावितस्यधर्म्मात्मा
स्यःइत्येवमादिभिर्गुणैःप्रसिद्धस्यतवअकीर्तिःमरणात्अतिरिच्यतेअधिकाभवति॥३४॥तदेवविवृणोति॥भयादिति॥महारथाःदुर्योधनादयः त्वांरणात्
भयात्उपरतंनिवृत्तमस्यंते॥चिंतयिष्यंति॥चपुनःयेषांदुर्योधनादीनांबहुमतोभूत्वाबहुभिर्गुणैर्युक्तःइत्येवंमतोभूत्वा॥लाघवंलघुत्वंयास्यसिप्राप्स्यसि
प॥३५॥ किंचापरंतवाहिताःतवशत्रवःबहून्अनेकप्रकारान्अवाच्यवादान्अवक्तव्यवादान्वदिष्यंतिकिंकुर्वंतःतवसामर्थ्यंनिंदंतःकुत्सयंतःततोनिंदादुः
खात्दुःखतरंकिंतुदुःखतरं॥३६॥ क्रियमाणेऽपिजयेपिसंदिग्धेनस्यप्रत्युतसिद्धमेवेत्याह॥हतोवेति॥हेअर्जुनअथवात्वंहतःसन्स्वर्गं
प प्राप्स्यसिवाअथवाजित्वामहींभोक्ष्यसे॥हेकौंतेयतस्मात्कृतनिश्चयोऽहंभाविवायुद्धंकरिष्यामिवेतिनिश्चयंकृत्वायुद्धायउत्तिष्ठ॥३७॥सु
खदुःखेइतिसुखदुःखेतथालाभालाभौजयाजयौसमेकृत्वाततःरागद्वेषौत्यक्त्वा॥ततो
स युद्धायजुज्यस्वघटस्व॥एवंपापंनावाप्स्यसि॥सुखेनरागःदुःखेद्वेषःहित्वातथाबुद्धिस्तयौजयपराजयौसमौकृत्वाएवंयुद्धंकुर्वन्पापफलंनप्राप्स्यतीत्य

अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययां॥संभावितस्यचाकीर्तिर्मरणादतिरिच्यते॥३४॥भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः॥येषांचत्वंबहुमतो
स भूत्वायास्यसिलाघवं॥३५॥अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः॥निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं॥३६॥हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसे
महीं॥तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः॥३७॥सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ॥ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि॥३८॥एषातेभि
हितासांख्येबुद्धिर्योगेत्विमांशृणु॥बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि॥३९॥नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥स्वल्पमप्यस्यधर्मस्यत्राय
तेमहतोभयात्॥४०॥व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन॥बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनां॥४१॥यामिमांपुष्पितांवाचंप्रवदंत्यवि
त्यर्थः॥३८॥सांख्ययोगमुपदिश्यउपसंहरन्तत्साधनकर्म्मयोगमधिकरोति॥हेअर्जुनःएषातेतुभ्यंबुद्धिःज्ञानंसांख्येपरमार्थवस्तुविवेकविषयेअभिहितं॥तुपुनः
शाने योगेईश्वराराधनार्थेकर्म्मणितुइमांवक्ष्यमाणांबुद्धिंशृणु॥हेपार्थययायोगविषययाबुद्ध्यायुक्तःकर्मबंधंधर्माधर्माख्यंबंधनंप्रहास्यसित्यक्ष्यसि॥३९॥अत्रफलंचाभिचा
रप्रत्यवायादिकमपिकेचनएपहितेतन्नसंभावितंकुत्सस्यप्रत्यपायादिवदित्याह॥नेहाभिक्रमेति॥इहमोक्षमार्गेकर्म्मयोगेअभिक्रमआरंभःतस्यफलव्याप्तिवत्नाशोनास्ति॥तथाविकि
त्सावत्कृतोमोक्षमार्गेकर्म्मयोगेप्रत्यवायोनविद्यतेनास्ति॥अस्ययोगधर्मस्यस्वल्पमपिअनुष्ठितंमहतोभयात्संसारभयात्रक्षति॥४०॥सांख्ययोगबुद्धेःअंतरस्याःकाम्यकर्मबु
द्धेश्चभेदंदर्शयन्नाह॥व्यवसायात्मिकेति॥हेकुरुनंदनइहश्रेयोमार्गेव्यवसायात्मिकानिश्चयस्वभावाबुद्धिःएकैवहिस्मात्अव्यवसायिनांअनिश्चितबुद्धीनांबुद्धयः ॥७॥
बहुशाखाःबहुभेदाअनंताःचपुनःअनंताःस्वाभेदेनअनंता॥४१॥सांख्ययोगोक्तबुद्धिरितिहि

ति

सांख्ययोगबुद्धौ प्रदर्शितसिद्ध्यर्थं अन्तरस्यां काम्यकर्मबुद्धौ प्रवर्त्तमानानां सांख्ययोगबुद्धिरसाध्या न भवतीति लक्षणं दोषमाह ॥ यामिमामिति ॥ हे पार्थ वेदवादरताः अर्थवाद[illegible]फल-
साधनप्रकाशकेषु वेदवाक्येषु रताः अविपश्चितः अविवेकिनः इमां पुष्पितां इव वृक्षं पुष्पितां शोभनां ॥ वाचं प्रवदन्ति । स्वर्गपश्वादिफलसाधनेभ्यः कर्मभ्योऽन्यन्नास्तीति वा-
दिनः ॥४२॥ तेच ॥ कामात्मानः कामपराः स्वर्गपराः पुरुषार्थो येषां ते स्वर्गपराः किंतु तां वाचां जन्मकर्मफलप्रदां जन्मैव कर्मफलं प्रददातीति जन्मकर्मफलप्रदां तां स्व-
र्गपशुपुत्रादिलक्षणं अर्थं यया वाचा बाहुल्येन प्रकाश्यते ॥ सा ता भोगैश्वर्ययोः प्राप्तिं प्रति साधनभूताः ते क्रियाविशेषाः तद्बहुलां तां वाचं प्रवदन्तो मूढाः संसारे परिवर्तन्ते इत्य-
भिप्रायः ॥४३॥ तेषां च भोगैश्वर्ययोः प्रीतिमतां तया वाचा आकृष्टचित्तानां विवेकबुद्धीनां सांख्ययोगे वा बुद्धिः व्यवसायात्मिका समाधौ चित्तेन विधीयते ॥ न जायते ॥ तमिति
पुरुषोपभोगाय सर्वमिति तिसमाधिरन्तःकरणं बुद्धिः तस्मिन् समाधौ न विधीयते न भवतीत्यर्थः ॥४४॥ यदि काम्यकर्मबुद्धिः स्वर्गादिकपरमफलेन न भवति । तर्हि वेदैः किमिति तत्
साधनतया कर्माणि विधीयन्ते तत्राह ॥ त्रैगुण्येति ॥ हे अर्जुन वेदाः त्रैगुण्यविषयाः त्रैगुण्यं संसारो विषयः प्रकाशयितव्यो येषां ते संसारविषयाः । त्वं तु निस्त्रैगुण्यो निष्कामो भव
सुखदुःखे शीतोष्णादयः परस्परप्रतिपक्षाः द्वन्द्वास्ततो निर्गतो निर्द्वन्द्वो भव सुखदुःखयोः तत्साधनयोर्वा शीतोष्णादिकयोः प्राप्तयोः क्रियारहितः उभयोरपि समम् इत्यर्थः
नित्यसत्त्वस्थः सत्त्वगुणाश्रितो भव ॥ तथा निर्योगक्षेमो भव । अनुपात्तस्योपार्जनं योगः उपात्तस्य रक्षणं क्षेमः योगक्षेमप्रधानस्य श्रेयसि प्रवृत्तिर्दुष्करा यतो निर्योग-

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥४३॥ भोगै-
श्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वन्द्वो नित्यसत्त्वस्थो निर्यो[illegible]गक्षेम आत्मवान् ॥
॥४५॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥ तावान्सर्वेषु वेदेषु ब्रा[illegible]णस्य विजानतः ॥४६॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥ मा कर्मफलहेतुर्भूर्मा ते सं-
गोऽस्त्वकर्मणि ॥४७॥ योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥

क्षेमो योगक्षेमचिन्तारहितो भवेत् ॥ आत्मवान् अप्रमत्तश्च भव एषः तवो[illegible] वोपदेशः ॥४५॥ स्वधर्ममनुतिष्ठतः सर्वेषु वेदोक्तेषु कर्मसु यान्यनन्तानि फलानि तानि
पेक्ष्यन्ते नतु ईश्वरार्थमपि किमर्थमनुष्ठीयते इत्यपेक्षायामाह ॥ यावानिति ॥ यावानर्थ उदपाने वापीकूपतडागादौ यावानर्थः यावत्स्नानपानादिप्रयोजनं स्यात् तावत्प्रयोजनं स्नान-
पानादिकं सर्वतः संप्लुतोदके यथा विद्यत एव तत्रान्तर्भवतीत्यर्थः । तथा सर्ववेदोदितकर्मप्रयोजनं स्वर्गादिसुखं ब्रह्मविदः फले विद्यते तत्रान्तर्भवतीत्यर्थः तस्मात् ईश्वरार्थं
कर्म क्रियमाणं स्वर्गादिफलेभ्यः निरतिशयफलजनकं भवतीत्यर्थः ॥४६॥ सर्वकर्मफलं ज्ञानफलेऽन्तर्भवति चेत् तर्हि सर्वं ज्ञानमेव संपादनीयं ॥ किं कर्मणा इत्याशंक्याह ॥ कर्म-
ण्येवेति ॥ हे अर्जुन ते तव कर्मण्येव अधिकारः न ज्ञाननिष्ठायां कथंभूतस्य चित्तावस्थायां फलेषु कर्मफलेषु तत्कामना न तु कर्मफलहेतुः कर्मफलसाधको मा भूः तेन तव अक-
र्मणि [illegible]कर्माकरणे संगः प्रीतिर्मास्तु ॥४७॥ यदि फलयुक्तेन कर्मणा न कर्तव्यं कथं तर्हि कर्तव्यं तत्राह ॥ योगस्थ इति ॥ हे धनंजय संगं त्यक्त्वा ईश्वरः तुष्यतु इत्यर्थं यत् योगस्थः
त्वं केवलं ईश्वरार्थकर्माणि कुरु ॥ किं कृत्वा सिद्ध्यसिद्ध्योः समो भूत्वा मन[illegible] शुद्धिजा ज्ञानप्राप्तिः सिद्धिः तद्विपरीता असिद्धिः तयोः समत्वं भूत्वा कर्माणि कुरु सिद्ध्यसिद्ध्योः स-
मबुद्धेः तत्तत्फलपरित्यागेन निष्कामतया ईश्वराराधनविष-
यात्मिका बुद्धिर्योगबुद्धिरेवेत्याह

न

कर्म

ति

कर्मकर्त्ति प्रयोगनोप युक्ता इति

र्य

न

समबुद्धिर्योगवदपीति ॥४८॥

गी०म०टीक
॥८८॥

यत्तु नः समत्वबुद्धियुक्तं ईश्वराराधनार्थं कर्म एतस्मात्कर्म्मणः श्रेष्ठं ॥ दूरेणेति । हि यस्मात् हे धनंजय बुद्धियोगात् समत्वबुद्धियुक्तात् कर्म्मणः सकाशात् फलार्थं कर्म्म दू-
रेण अतिविकृष्टमेव अवरं निकृष्टं बुद्धौ परमेश्वरार्पणे कर्म्मबुद्धौ त्वं शरणं आश्रयं अन्विच्छ प्रार्थयस्व । परमार्थज्ञानशरणो भव ॥ फलहेतवः फलतृष्णा-
युक्ताः कृपणाः दीनाः ॥४९॥ समत्वबुद्धियुक्तः सन् स्वधर्म्ममनुतिष्ठन् यत्फलं प्राप्नोति तदाह ॥ बुद्धियुक्त इति ॥ बुद्धियुक्तः समत्वविषयया बुद्ध्या युक्तः ॥ इह ल-
स्मिन्लोके उभे सुकृतदुष्कृते पुण्यपापे जहाति परित्यजति तस्मात् योगाय समत्वबुद्धियोगाय युज्यस्व घटस्व योगः समत्वबुद्धिः कर्म्मसु कौशलं बंधकमपि कर्म
समत्वबुद्धियुक्तेन विमुक्तिहेतुः ॥५०॥ कर्म्मणां मोक्षसाधनत्वप्रकारमाह ॥ कर्म्मजमिति ॥ हि यस्मात् बुद्धियुक्ताः समत्वबुद्धियुक्ताः कर्म्मजं कर्म्मभ्यो जातं इष्टा-
निष्टदेहप्राप्तिलक्षणं फलं त्यक्त्वा मनीषिणो ज्ञानिनो भूत्वा जीवंत एव जन्मबंधविनिर्मुक्ताः संतः अनामयं सर्वोपद्रवरहितं मोक्षाख्यं पदं विष्णोः परमं प-
दं गच्छंति ॥५१॥ योगानुष्ठानजनितसत्त्वबुद्धिः कदा प्राप्स्यतीत्यत आह ॥ यदा ते इति ॥ यदा ते तव बुद्धिः मोहकलिलं मोहात्मकं अविवेककालुष्यं व्यतित-
रिष्यति व्यतिक्रमिष्यति ॥ तदा तस्मिन्काले श्रोतव्यस्य श्रुतस्य च तस्य अधीतस्य निर्वेदं गंतासि । अधेतव्यस्य अधीतस्य च निःफलत्वं प्रतिज्ञास्यति ॥५२॥ मो वैराग्यं

दूरेण ह्यवरं कर्म्म बुद्धियोगात् धनंजय बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥ बुद्धियुक्तो जहातीह उभे सुकृतदुःकृते ॥ तस्मात् योगाय युज्यस्व योगः
कर्म्मसु कौशलं ॥५०॥ कर्म्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ॥५१॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ त-
दा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥ अर्जुन उवाच ॥
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव । स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥५४॥ श्रीभगवानुवाच ॥ प्रजहाति यदा कामान् सर्व्वान् पार्थ मनोगतान्
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥

के हे निवात्ययशरीरेण लब्धात्मविवेकज्ञप्तः कदा कर्म्मजं फलं परमार्थयोगमवाप्स्यसि तत्कुत इत्यत आह ॥ श्रुतिविप्रतिपन्नेति ॥ हे अर्जुन श्रुतिविप्रतिपन्ना अनेकसा-
ध्यसाधनसंबंधप्रकाशनवाक्यश्रवणैः विक्षिप्ता सती ते तव बुद्धिः यदा यस्मिन्काले निश्चला स्थिरीभूता विक्षेपचलनवर्जिता सती समाधौ आत्मनि अचला तत्रापि
प्रश्नबीजं विकल्पवर्जिता स्थास्यति ॥ तदा योगं विवेकप्रज्ञां अवाप्स्यसि ॥५३॥ अस्मिन्नवसरे लब्धप्रज्ञा प्रतिष्ठिता यस्य स स्थितप्रज्ञः ॥ तस्य का भाषा सतु कथमन्यैर्भाष्यः समाधौ आत्मनि
प्रतिज्ञा स्थितस्य च का भाषा स्थितधीः स्थितप्रज्ञः किं वक्ति किमासीत तस्य आसनं कथं व्रजेत् वा कथं ॥५४॥ यत्नसाध्यत्वात् यानि यानि यत्नसाधनानि च भवंति ता- उऋणानि
नि तानि आह ॥ प्रजहातीति ॥ हे पार्थ यदा मुनिः संन्यासी मनोगतान् मनसि स्थितान् सर्वान् कामान् इच्छाभेदान् प्रजहाति त्यजति ॥ आत्मन्येव प्रत्यगात्मनि
आत्मना परमात्मदर्शनात् रसाभिव्यक्त्या तुष्टः तदा स्थितप्रज्ञ उच्यते ॥५५॥ दुःखेष्विति ॥ आध्यात्मिकादिषु दुःखेषु अनुद्विग्नमनाः अक्षुभितमनाः सुखेषु अप्राप्तेषु विगतस्पृहः ॥८॥
नष्टसमाधिप्रज्ञस्य लक्षणमुक्त्वा साधारण अर्जुनस्याद स्थितप्रज्ञस्येति वीतरागभयक्रोधो मुनिः स्थितधीरुच्यते ॥५६॥

क

य: सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं। नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥ यदा संहरते चायं कूर्मोंगानीव सर्वशः। इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥ विषया विनिवर्तंते निराहारस्य देहिनः। रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः। इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥६०॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः। वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते। संगात्संजायते कामः कामात्क्रोधोभिजायते ॥६२॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः। स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन्। आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते। प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥६५॥

य: सर्वत्र देहजीवनादिष्वपि अनभिस्नेहो वर्जितः तत्तच्छुभाशुभं प्राप्य नाभिनंदति न हृष्यति न द्वेष्टि। तस्य मुनेः प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता ॥५७॥

च अपरं यदा मुनिः अयं ज्ञाननिष्ठायां प्रवृत्तः सर्वशः सर्वेभ्य इंद्रियार्थेभ्यः विषयेभ्यः इंद्रियाणि चक्षुरादीनि संहरते उपसंहरति। कः इव कच्छपः अंगानि वयथा कूर्मः भयात् स्वांगानि सर्वशः सर्वतः उपसंहरति तस्य प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता स्थिता ॥५८॥ विषयाः निराहारस्य आतुरस्यापि इंद्रियाणि निवर्तंते। ननु तद्विषयो रागः रोगी सकुंचितः स जिघत्सते। तदाह विषया इति। निराहारस्य अनुपभुञ्जानस्य देहिनः रसवर्जं विषयरागं वर्जं विषयाः विनिवर्तंते। अस्य देहिनः रसो रागो अपि परं परमार्थतत्वं दृष्ट्वा निवर्तते ॥५९॥ आत्मज्ञानविकीर्षोः इंद्रियानियमने दोषमाह ॥ यततो ह्यपीति ॥ हे कौंतेय हि यस्मात् यततो अपि प्रयत्नं कुर्वतो विपश्चितः ॥ मेधाविनः पुरुषस्य प्रमाथीनि प्रमथनशीलानि इंद्रियाणि प्रसभं हठात् मनो हरंति ॥६०॥ युक्तः समाहितचित्तः तानि सर्वाणि इंद्रियाणि संयम्य वशीकृत्य मत्परः मत्परायणः तिष्ठेत्। हि यस्मात् यस्य

इंद्रियाणि वशे यदधीनानि वर्तंते तस्य प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता ॥६१॥ विषयान् शब्दादीन् ध्यायतः आलोचयतः पुंसः पुरुषस्य तेषु विषयेषु संगः आसक्तिः उपजायते। संगात् आसक्तेः प्रीतेः कामः तृष्णा उपजायते। कामात् अभिलाषात् कुतश्चित् प्रतिहतात् क्रोधो अभिजायते ॥६२॥ क्रोधात् संमोहः अविवेको भवति। संमोहात् शास्त्रसंस्कारजनिताया स्मृतेर्विभ्रंशो भवति। भ्रंशात् कार्याविषयाया बुद्धेः नाशो भवति। बुद्धिनाशात् प्रणश्यति विवेकविज्ञानरहितो नष्ट एव भवति ॥६३॥ सर्वानर्थस्य मूलं विषयाभिध्यानमुक्त्वा अथेदानीं मोक्षकारणमिदमुच्यते ॥ रागद्वेषेति ॥ तु पुनः विधेयात्मा वशीकृतचित्तः रागद्वेषरहितैः आत्मना वशीकृतैः इंद्रियैः श्रोत्रादिभिः अप्रार्थितान् विषयान् चरन् उपभुंजानः प्रसादं स्वास्थ्यम् अधिगच्छति ॥६४॥ प्रसादे सतीति किं स्यादित्याह ॥ प्रसादे इति ॥ प्रसादे चेतसः प्रसादे सति अस्य सर्वदुःखानां आध्यात्मिकादीनां हानिर्विनाशः उपजायते। किंच हि यस्मात् प्रसन्नचेतसः स्वच्छांतःकरणस्य बुद्धिः विवेकजा प्रज्ञा आशु शीघ्रं पर्यवतिष्ठते आत्मस्वरूपेणैव निश्चला भवति ॥६५॥ राम राम राम राम राम राम राम राम राम राम राम राम

न
योगिनः

न

न

मततु लौ

स्मृति
कार्य
शांति

बाह्येन्द्रियसंयमाभावे दोषमुक्त्वा मनःसंयमाभावे दोषमाह ध्यायत इति

यथाऽप्रमत्तस्य कर्णधारस्य नावं वायु

मध्ये

अयुक्तस्य योगरहितस्य बुद्धिः आत्मस्वरूपविषया नास्ति न च पुनः अयुक्तस्य असमाहितस्य चित्तस्य भावना आत्मज्ञानाभिरतिर्नास्ति॥ न च पुनः अभावयतः
आत्मज्ञानाभिनिवेशमकुर्वतः शान्तिर्न भवति अशान्तस्य उपशमरहितस्य सुखं कुतः। न ह्यशान्तस्य सुखस्य गंधमात्रमपि नोपपद्यते इत्यर्थः॥६६॥ अयु
क्तस्य कस्मात् बुद्धिर्नास्ति इत्याह॥ इंद्रियाणामिति॥ हि यस्मात् मनः इंद्रियाणां चरतां स्वस्वविषयेषु वर्त्तमानानामनुविधीयते॥ तत् मनः अस्य यतेः इंद्रियविषयविकल्पनेन प्रवृ
त्तं सत् प्रज्ञां आत्मानात्मविवेकजां हरति। कइव। वायुरिव यथा वायुः अंभसि उदके जिगमिषतां मार्गाद् उद्धृत्य उन्मार्गे नावं प्रवर्त्तयति एवमात्मविषयां प्रज्ञां हृत्वा म
नो विषयविषयां करोति॥६७॥ यततो ह्यपीत्युपन्यस्तस्यार्थस्य अनेकधा उपपत्तिमुक्त्वा तं चार्थं उपपाद्य उपसंहरति॥ तस्मादिति॥ इंद्रियाणां प्रवृत्तौ दोषः उ
पादितो यस्मात् हे महाबाहो यस्य यतेः इंद्रियाणि सर्वशः इंद्रियार्थेभ्यः विषयेभ्यः निगृहीतानि तस्य यतेः प्रज्ञा विवेकजा बुद्धिः प्रतिष्ठिता॥६८॥ योयं लौकि
को व्यवहारः ... उत्पन्नविवेकज्ञानस्य स्थितप्रज्ञस्य अविद्याकार्यत्वात् अविद्यानिवृत्तौ निवर्त्तते॥ अविद्यायाश्च विद्याविरोधान्निवृत्तिः॥ इत्येतमर्थं स्फुटी

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना॥ न चाभावयतः शान्तिरशान्तस्य कुतः सुखं॥६६॥ इंद्रियाणां हि चरतां यन्मनोनुविधीयते॥ तदस्य हरति प्रज्ञां वा
युर्नावमिवांभसि॥६७॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥६८॥ या निशा सर्वभूतानां तस्यां जा
गर्त्ति संयमी॥ यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥६९॥ आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत्॥ तद्वत्कामा यं प्रविशंति सर्वे स शां
तिमाप्नोति न कामकामी॥७०॥ विहाय कामान्यः सर्वान् पुमांश्चरति निस्पृहः॥ निर्ममो निरहंकारः स शांतिमधिगच्छति॥७१॥

कुर्वन्नाह॥ तथा च॥ विद्याविद्ययोर्विरोधात् तत्त्वदर्शिनोऽविषयत्वमाह॥ या निशेति॥ सर्वभूतानां यस्यां यस्मिन् परमार्थतत्त्वे मोहमयी सर्वपदार्थानां अ
विवेककरी तमःस्वभावा निशा निशेव निशा यथा नक्तंचराणां अहरेव निशा निशेव कल्पते तद्वत्॥ अनिशा तस्यां तस्मिन् परमार्थतत्त्वे संयमी जागर्त्ति यस्यां
अविद्यालक्षणायां निशायां भूतानि जाग्रति परमार्थतत्त्वं पश्यतो मुनेः सा निशा॥६९॥ विदुषः त्यक्तैषणस्य यतेरेव मोक्षप्राप्तिः न तु असंन्यासिनः काम
कामिनः इत्येतमर्थं दृष्टान्तेन प्रतिपादयिष्यन्नाह॥ आपूर्यमाणमिति॥ आपः अद्भिः आपूर्यमाणं अचलप्रतिष्ठं अचलतया अवस्थितं समुद्रं यद्वत्
प्रविशंति॥ तद्वत् सर्वे कामाः सर्वे मनोरथाः यं यतिं प्रविशंति आत्मन्येव प्रलीयंते स यतिः मोक्षं प्राप्नोति॥ कामकामी पुरुषः न प्राप्नोति॥
॥७०॥ यस्मादेवं तस्मात् यः संन्यासी पुमान् सर्वान् कामान् अशेषान् मनोरथान् विहाय परित्यज्य निस्पृहः। शरीरजीवनमात्रेऽपि नि
रभिलाषः निर्ममः ममतारहितः निरहंकारः अहंकाराभिमानरहितः सन् चरति जीवनमात्रचेष्टाशेषः पर्यटति स स्थितप्रज्ञः शांतिं निर्वाणं प्रा

विषयायुक्तः

एवं वशीकृतमिंद्रियेण सह गच्छति

रामकृष्णः

कथिते मा मादिर्घैन

मोहात् ज्ञाननिष्ठा स्तूयते॥ हेपार्थ एषा ब्रह्मणि जाता ब्राह्मी यथोक्ता स्थितिः सर्वकर्मसंन्यस्य ब्रह्मस्वरूपेणैवावस्थानमित्येतत् एनां स्थितिं प्राप्य न मुह्य
ति मोहं न प्राप्नोति॥ अन्तकालेपि अन्ते वयस्यपि अस्यां यथोक्तायां ब्राह्म्यां स्थितौ स्थित्वा पुमान् ब्रह्मनिर्वाणं मोक्षं गच्छति प्राप्नोति। यो ब्रह्मचर्या
देव संन्यस्य यावज्जीवं ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वाणं गच्छतीति किं वक्तव्यं॥७२॥ इति द्वितीयोध्यायः॥२॥ सांख्ययोगबुद्धी शास्त्रस्य प्र
वृत्तिविषयत्वेन भगवता निर्दिष्टे तत्र प्रजहाति यदा कामान् इत्यारभ्य अध्यायपरिसमाप्तेः सांख्यबुद्ध्याश्रितानां संन्यासं कर्त्तव्यमुक्तं॥ एषा ब्राह्मी स्थितिरित्यनेन सांख्य
बुद्धियोगेन निष्ठा तथैव चाकृतार्थानां उक्ता। अर्जुनाय च कर्मण्येवाधिकारस्ते मा ते सङ्गोस्त्वकर्मणि इति योगबुद्धिमाश्रित्य कर्मैव कर्त्तव्यमुक्तवा
न् न केवलं तत एव श्रेयः प्राप्तिं उक्तवान् तदेतत् आलक्ष्य पर्याकुलीभूतबुद्धिः अर्जुन उवाच॥ ज्यायसी चेदिति॥ हे जनार्दन न चेत् यदि कर्मणः सकाशात् बुद्धि
र्ज्ञानं तव ज्यायसी श्रेयसी मता अभिप्रेता॥ हे केशव तत् तर्हि घोरे क्रूरे कर्मणि कर्ममार्गे मां किं कस्मान्नियोजयसि॥१॥ किंच हे जनार्दन। व्यामिश्रेणेति मिश्र
त्वात्केनैव मिश्रमबुद्धिः संशयवान् भवत्येकं ज्ञानं वा कर्म वा निश्चित्य वद येनाहं श्रेयः निर्वाणं आप्नुयां॥२॥ अत्र अधिकारिभेदेन विषयव्यवस्थायां उत्तरमाह॥ लो के

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति॥ स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छति॥७२॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा
र्जुनसंवादे सांख्ययोगो नाम द्वितीयोध्यायः॥२॥ अर्जुन उवाच॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन। तत्किं कर्मणि घोरे मां नियोजयसि केशव॥१॥ व्यामिश्रे
णेव वाक्येन बुद्धिं मोहयसीव मे॥ तदेकं वद निश्चित्य येन श्रेयोहमाप्नुयां॥२॥ श्रीभगवानुवाच॥ लोकेस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ॥ ज्ञानयोगेन सांख्या
नां कर्मयोगेन योगिनां॥३॥ न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोश्नुते॥ न च संन्यसनादेव सिद्धिं समधिगच्छति॥४॥ न हि कश्चित् क्षणमपि जातु तिष्ठ
त्यकर्मकृत्॥ कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥५॥

लोकेस्मिन्निति॥ हे अनघ अस्मिन् लोके मया पुरा सर्गादौ द्विविधा निष्ठा प्रोक्ता कर्त्तव्यतात्पर्येणोक्ता॥ ज्ञानयोगेन। ज्ञानमेव योगः ज्ञानयोगः तेन ज्ञानयोगेन सांख्या
नां परब्रह्मणि स्थितानां संन्यासिनां निष्ठोक्ता कर्मयोगेन कर्मैव योगः कर्मयोगः तेन कर्मयोगेन योगिनां कर्मनिष्ठा उक्ता॥३॥ ज्ञानकर्मनिष्ठयोः परस्परवि
रुद्धत्वात् एकेन पुरुषेण युगपदनुष्ठानुमशक्यत्वात् अन्योन्यनिरपेक्षयोरेव पुरुषार्थहेतुत्वे प्राप्ते कर्मनिष्ठायाः ज्ञाननिष्ठाप्राप्तिहेतुत्वेन पुरुषार्थहेतुत्वं न स्वा
तन्त्र्येण ज्ञाननिष्ठा तु कर्मनिष्ठोपायलब्धात्मिका सती स्वातन्त्र्येण पुरुषार्थहेतुरित्येतमर्थं प्रदर्शयिष्यन्नाह॥ न कर्मणेति॥ पुरुषः कर्मणां यज्ञादीनां अनारंभात् अ
करणात् नैष्कर्म्यं ज्ञाननिष्ठां न अश्नुते न प्राप्नोति॥ च पुनः संन्यासिनां देवकेवलात् ज्ञानरहितात्॥ संन्यासादेव सिद्धिं न समधिगच्छति न प्राप्नोति॥४॥ क
स्मात् पुनः कारणात् कर्मसंन्यासमात्रादेव ज्ञानरहितात् नैष्कर्म्यं लक्षणां सिद्धिं पुरुषो नाधिगच्छतीति हेत्वाकांक्षायामाह॥ न हि कश्चिदिति॥ हि य
स्मात् कश्चिदपि जातु कदाचित् क्षणमपि अकर्मकृत् न तिष्ठति। हि यस्मात् सर्वोपि प्रकृतिजैः प्रकृतितो जातैः गुणैः सत्वरजस्तमोभिः अवशो

गीतासरी० ॥१०॥

देवैदत्तान न
स्मानितितिह्यस्मात् देवाः यज्ञेनतेषिता वो युष्मभ्यं इष्टान्वा छितान् भोगान्प्रदास्यंते ॥ य ते ईर्त्तानऽनादिराच्चोदे भोऽस्य अप्रदाये नेकेसस्तेनएवस्यापहारी ॥१२॥ पंचयज्ञानि दत्वा को भुं

ज्ञानरहितस्य कर्म्मत्यागे दोषमाह ॥ कर्मेन्द्रियाणि इति ॥ यः कर्मेन्द्रियाणि वाक्पाणिपादरूपस्थानि नियम्य इंद्रियार्थान् विषयान्मनसा स्मरण ध्यायन् आस्ते तिष्ठति ॥ सवि तेः स्तेनः
मूढात्मा मोहितचेता मिथ्याचारः पापाचारः उच्यते ॥६॥ एतद्विपरीतः कर्म्मकर्त्ता श्रेष्ठ इत्याह ॥ यस्त्विंद्रियाणीति ॥ वपुनः हे अर्जुन यः इंद्रियाणि बुद्धीन्द्रियाणि श्रोत्रत्वक् चौर एवदेव
चक्षुरसनघ्राणानि मनसा नियम्य कर्मेन्द्रियैः वाक्पाणिपादपायूपस्थैः कर्म्मयोगं परमेश्वरसंतुष्ट्यै कर्म्म आरभते कुरुते ॥ सः असक्तः फलाशारहितः मिथ्याचारा स्यापहारी
द्विशिष्यते ॥७॥ यस्मादेवं तस्माद्हे सस्यास कथ्यरहितः कर्म्मकरणमेवउचितं इत्याह ॥ नियतंमिति ॥ हे अर्जुन त्वं तियतं नित्यं विहितं कर्म्म कुरु ॥ नफ ज्ञ र्थस्य यस्मात् २
अकर्मणः अकरणात् कर्म्मकरणं ज्यायः श्रेष्ठं चपुनः तेत व अकर्मणः कर्म्म अकुर्वतः शरीरयात्रा शरीरस्थितिरपि न प्रसिध्येत् न भवति ॥८॥ कर्म्मणो वंध
कत्वमाशंक्य यथाहत्तं कर्म्म वंधकं न भवति ॥ तप्रकारमाह ॥ यज्ञार्थादिति ॥ यज्ञो वै विष्णुः तदर्थं कर्म्म यज्ञार्थं तस्मात् यज्ञार्थात् कर्म्मणः अन्यत्र तेन कर्म्म
णा अयं लोकः कर्म्मवंधनः कर्म्मैव वंधनं यस्य सः कर्म्मवंधनः हे कौंतेय मुक्तसंगः फलाकांक्षारहितः सन् तदर्थं विष्णुर्थं विहितं कर्म्म समाचर ॥९॥ प्रजाप
तिवचनात् अपि कर्म्मकरणमपि श्रेयइत्याह ॥ सहयज्ञा इति चतुर्भिः श्लोकैः ॥ प्रजापतिः पुरा सर्गादौ सहयज्ञाः यज्ञसहिताः प्रजाः ब्राह्मणक्षत्रियवैश्यत्रीन्वर्णान्

नित्र सप
कर्मेन्द्रियाणि संयम्य यः आस्ते मनसा स्मरन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥६॥ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन ॥ कर्मेन्द्रियैः कर्म्मयोगमस
केस विशिष्यते ॥७॥ नियतं कुरु कर्म्म त्वं कर्म्म ज्यायो ह्यकर्म्मणः ॥ शरीरयात्रापि च ते न प्रसिद्ध्येदकर्म्मणः ॥८॥ यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मवंधनः ॥
तदर्थं कर्म्म कौंतेय मुक्तसंगः समाचर ॥९॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ॥ अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥१०॥ देवान् भावयतानेन ते देवा स्ते
भावयंतु वः ॥ परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥११॥ इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः ॥ तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः ॥१२॥ यज्ञशिष्टा
शिनः संतो मुच्यंते सर्वकिल्बिषैः ॥ भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात् ॥१३॥ अन्नाद्भवंति भूतानि पर्जन्यादन्नसंभवः ॥ यज्ञाद्भवति पर्जन्यो यज्ञः कर्म्मसमु
द्भवः ॥१४॥
सृष्ट्वा उवाच ॥ अनेन यज्ञेन हे प्रजाः यूयं प्रसविष्यध्वं वृद्धिं कुरुध्वं ॥ एष वो युष्माकं इष्टकामधुक् अभीष्टकामप्रदो भवतु ॥१०॥ कथं इष्टकामदो भवत्ययज्ञो भवे
दित्याह ॥ देवानिति ॥ हे प्रजाः यूयं अनेन देवान् भावयत वर्द्धयत ते देवा यज्ञभाविताः संतः वो युष्मान् वृष्ट्यन्नोत्पत्तिद्वारेण भावयंतु परस्परं भावयंतः वर्द्धयं
तः परं श्रेयः मोक्षं स्वर्गं वा अवाप्स्यथ ॥११॥ एतदेवं स्पष्टीकुर्वन्नकर्म्मकरणे दोषमाह ॥ यज्ञशिष्टाशिन इति ॥ यज्ञशिष्टाशिनः देवयज्ञादीन् निवर्त्य तच्छेषभोजिनः संतः सा
धवः सर्वैः सर्वकिल्बिषैः मुच्यंते [redacted] पचंति ते अघं भुंजते ॥१३॥ जगच्चक्रप्रवृत्तिहेतुत्वादपि कर्म्म कर्त्तव्यमित्याह ॥ अन्नाद्भवंती
ति त्रिभिः ॥ अन्नात् भुक्तात् अन्नात् लोहितरेतःपरिणतात् भूतानि जायंते पर्जन्यात् वृष्टेः अन्नसंभवः अन्नोत्पत्तिः यज्ञात्पर्जन्यो भवति यज्ञः धर्म्मविशे ॥१०॥
षः कर्म्मसमुद्भवः ऋत्विक्यजमानयो व्यापाररूपनादिलक्षणं कर्म्म तत्समुद्भवः ॥१४॥ रामराम
अस्मिन् लोके इत अध्यपनंतम् एव श्रेष्ठा नेतरे इसा दय
ये पापा आत्मकारणात् पचंति
यज्ञशिष्टाशिन इति

वं

कर्म ब्रह्मोद्भवं वेदोद्भवं विद्धि जानीहि ॥ ब्रह्म वेदः तं अक्षरसमुद्भवं परब्रह्मसमुद्भवं जानीहि ॥ तस्मात्परब्रह्मसमुद्भवो वेदः तस्मात्सर्वगतः सर्वव्यापकः नित्यं
यज्ञे प्रतिष्ठितं ॥ सर्वदा यज्ञविधिपरायणं यस्मादेवं परमेश्वरेणैव भूतानां पुरुषार्थसिद्धये कर्मादिचक्रं प्रवर्तितं तस्मादेवं रूपं कर्तव्यमेव ॥१५॥ तदकरणे दोषं
वक्ति एवमिति ॥ एवमिति ॥ यः कर्माधिकारी इह अस्मिन्लोके एवं परमेश्वरेण वेदयज्ञपूर्वकं प्रवर्तितं जगच्चक्रं नानुवर्तयति नाश्रयते ॥ हे पार्थ स
अघायुः पापजीवनः इंद्रियारामः विषयेषु इंद्रियैः आरामः आक्रीडा यस्य सः मोघं वृथा जीवति ॥१६॥ न कर्मणामनारंभादित्यादिना अज्ञस्यांतःकरणशुद्ध्यर्थं क
र्मयोगः कर्तव्य इत्युक्तं ज्ञानिनः कर्मानुपयोगमाह ॥ यस्त्विति ॥ यः पुनः आत्मज्ञाननिष्ठो मानवः आत्मरतिरेव स्यात् आत्मन्येव रतिः प्रीतिर्यस्य न विषयेषु आत्मरति
श्च पुनः आत्मतृप्तः स्वात्मबोधेनैव तृप्तः न अन्नपानरसादिना च पुनः आत्मन्येव आत्मज्ञानेनैव संतुष्टः न बाह्यार्थस्त्रीपुत्रादिलाभेन तस्य परमा
र्थरते कार्यं कर्माधिकारो न विद्यते ॥१७॥ तत्र हेतुमाह ॥ नैवेति ॥ तस्य परमार्थरतेः इह लोके कृतेन कर्मणा अर्थः प्रयोजनं नास्ति ॥ अकृतेन कर्म

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं ॥ तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं ॥१५॥ एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ॥ अघायुरिंद्रियारा
मो मोघं पार्थ स जीवति ॥१६॥ यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥१७॥ नैव तस्य कृतेनार्थो नाकृते
नेह कश्चन ॥ न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥ तस्मादसक्तः सततं कार्यं कर्म समाचर ॥ असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ॥१९॥
कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥ लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥२०॥ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥ स यत्प्रमाणं कु
रुते लोकस्तदनुवर्तते ॥२१॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ॥ नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥ याम वा

करणे न कश्चिदपि अर्थः प्रत्यवायरूपो नास्ति ॥ च पुनः अस्य परमार्थरतेः सर्वभूतेषु ब्रह्मादिस्थावरांतेषु कोपि अर्थः प्रयोजनाय आश्रयो नास्ति
॥१८॥ यस्मादेवं तस्मात्त्वं कर्म कुरु इत्याह ॥ तस्मादिति ॥ तस्मात् असक्तः संगवर्जितः सततं सर्वदा कार्यं कर्म नित्यं कर्म समाचर हि यस्मात् असक्तः तृ
फलसंगवर्जितः पुरुषः ईश्वरार्थं कर्म आचरन् कुर्वन् परं मोक्षं आप्नोति ॥१९॥ अत्र सदाचारं प्रमाणीकुर्वन् उत्तरार्द्धेन ज्ञानिनोपि कर्माचरणमुचि
तमित्याह ॥ कर्मणैवेति ॥ हि यस्मात् जनकादयोपि विद्वांसः कर्मणैव यज्ञादिना संसिद्धिं आस्थिताः मोक्षं गताः प्रवृत्ताः ॥ हे अर्जुन लोकसंग्रहमपि
संपश्यन् उन्मार्गप्रवृत्तिनिराकरणं लोकस्य लोकसंग्रहः त्वमपि प्रयोजनं संपश्यन् कर्तुमेव अर्हसि ॥२०॥ लोकसंग्रहः कुर्यात् कथं न कुर्यात् तदु
च्यते आह ॥ यद्यदिति ॥ श्रेष्ठः यद्यत्कर्म आचरति इतरो जनः तत्तदेव आचरति ॥ स यत्प्रमाणं कुरुते यत् लौकिकं वैदिकं वा प्रमाणं करोति ॥ लोकस्तत् दि
अनुसरति एव अनुवर्तते ॥२१॥ लोकसंग्रहः कर्तव्यतायां विप्रतिपत्तिः आत्मदृष्टांतेन परिहरति ॥ न मे पार्थेति ॥ हे पार्थ त्रिषु लोकेषु मे मम किंचन कर्तव्यं ना
स्ति ॥ अनवाप्तं अप्राप्तं किमपि नास्ति अवाप्तव्यं प्राप्तव्यं नास्ति ॥ तथापि नित्यनैमित्तिके कर्मणि अहं वर्त एव ॥२२॥ याम

अ अ अनुवर्त्तेरन्नित्यर्थः२३ यत

११८ कर्मण्यतन्द्रित इति यतोहं

न्यकोर्हलोकस्य विनाशहेतुः स्यामित्याह॥यदिह्यहमिति॥हिनिश्चितं अहं अतंद्रितः अनलसः यदिजातु कदाचिदपि कर्माणि नित्यनैमित्तिके कर्मणि न व
र्तेयं हे पार्थ सर्वशः सर्वप्रकारैः मनुष्या मम वर्त्म अनुवर्त्तंते॥२३॥ तमेव दोषं दर्शयति॥उत्सीदेयुरिति॥चेत् यदि अहं कर्म नित्यनैमित्तिकं न कु च
र्यां तर्हि इमे लोकाः स्थितिनिमित्तस्य कर्मणः॥अभावात् उत्सीदेयुः विनश्येयुः चपुनः संकरस्य च कर्त्ता स्याम् एवमिमाः प्रजाः अहं उपहन्याम् मल
िनपरः स्यामित्यर्थः॥२४॥ आत्मविदोपि स्वात्मनः कृत्याभावेपि कर्त्तव्यमित्याह॥सक्ता इति॥ हे भारत यथा अविद्वांसः अनात्मज्ञाः कर्मणि सक्ताः कर्मफले निष्ठा भावेपिपरा
वः कर्म कुर्वंति॥तथा विद्वान् असक्तः कर्मफले निस्पृहः लोकस्य संग्रहं चिकीर्षुः लोकानुग्रहं कर्त्तुं इच्छन् कर्म कुर्यात्॥२५॥ ननु आत्मविदा कृप नुग्रहार्थं
यापरस्य ब्रह्मज्ञानमेवोपदेष्टव्यं दुःखात्मकेषु कर्मणि स्वयं प्रवर्त्तनेन न च किमित्यत आह क्व अधिकारित्वान्नेत्याह॥नबुद्धिभेदमिति॥विद्वा कर्मकर्त्तव्य
नात्मवित् कर्मसंगिनां कर्मण्यासक्तानां अज्ञानां अनात्मविदां बुद्धिभेदं बुद्धिचालनं न जनयेत्॥कर्माणि श्रद्धोज्झानं न कुर्यात्॥ विद्वान् स्व मित्याह

मे

यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः॥मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः॥२३॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं॥संकरस्य च
कर्त्ता स्यामुपहन्यामिमाः प्रजाः॥२४॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत॥ कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं॥२५॥ न
बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां॥ जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥२६॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः॥ अहंकारवि
मूढात्मा कर्त्ताहमिति मन्यते॥२७॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः॥ गुणा गुणेषु वर्त्तंत इति मत्वा न सज्जते॥२८॥ प्रकृतेर्गुणसं
मूढाः सज्जंते गुणकर्मसु॥ तानकृत्स्नविदो मंदान् कृत्स्नविन्न विचालयेत्॥२९॥

बुद्धि धिस्वयुक्तः अभियोगपरः सर्वकर्माणि नित्यनैमित्तिकानि समाचरन् तान् अज्ञान् जोषयेत् कर्म कारयेत्॥२६॥ अविद्वान् कथं कर्मसु सज्ज
ते इत्याह॥प्रकृतेरिति॥अहंकारविमूढात्मा देहे आत्मबुद्धिः अहंकारः तेन मोहितचित्तः पुमान् प्रकृतेः गुणैः विकारैः देहेंद्रियैः कर्माणि लौ कार्य्यैः इंद्रियैः
किकानि शास्त्रीयाणि च सर्वशः सर्वप्रकारैः क्रियमाणानि अहं कर्त्ता इति मन्यते॥२७॥ विद्वांस्तु न तथा मन्यत इत्याह॥तत्त्वविदिति॥हे महा वि
ति बाहो गुणकर्मविभागयोः तत्त्ववित् गुणविभागस्य कर्मविभागस्य च याथात्म्यवेत्ता गुणाः इंद्रियाणि गुणेषु विषयेषु वर्त्तंते न आत्मा
इति मत्वा न सज्जते॥ अहं करोमीति न मन्यते॥२८॥ ननु बुद्धिभेदं न जनयेदित्युक्तं उपसंहरति॥प्रकृतेरिति॥ प्रकृतेः मायायाः गुणैः संमूढाः गुणेषु अतिशयेन मो
हिताः गुणकर्मसु देहेंद्रियादीनां व्यापारेषु सज्जंते वयं कुर्वंत इति मन्यते॥तान् अकृत्स्नविदः कर्मफलमात्रदर्शिनः कर्मसं ॥११॥
गिनः मंदान् कृत्स्नवित् आत्मवित् न विचालयेत् नभ्रंशयेदित्यर्थः॥२९॥

अहंकारेण देहादिष्वात्माध्यासेन वि
मूढात्मा बुद्धिर्यस्य स

किंच ॥ पुत्रदारगृहादिषु असक्तिः प्रीत्यभावः अनभिष्वङ्गः एकत्वाभिमानाभावः ॥ च पुनः इष्टानिष्टोपपत्तिषु इष्टानिष्टप्राप्तौ नित्यं निरंतरं समचित्तत्वं
तुल्यचित्तता ॥ ९ ॥ किंच ॥ मय्येति ॥ च पुनः मयि विषये अनन्ययोगेन अपृथक्समाधिना अव्यभिचारिणी ध्रुवा न [illegible] भक्तिः ॥ विविक्तदेशसेवित्वं
कोलाहलवर्जितदेशसेवित्वं जनसंसदि अरतिः अप्रीतिः ॥ १० ॥ किंच ॥ अध्यात्मेति ॥ अध्यात्मज्ञाननित्यत्वं आत्मादिज्ञाने नित्यभावः ॥ तत्त्वज्ञानार्थदर्शनं
तत्त्वज्ञानेन अर्थो मोक्षः तद्दर्शनं एतत् ॥ अमानित्वादितत्त्वज्ञानार्थदर्शनांतं यदुक्तं तत् ज्ञानं हेतुत्वात् ॥ ज्ञानमिति ॥ प्रोक्तं यत् यत् अतः ॥ एतस्मात्
ज्ञानात् अन्यथा विपरीतं मानित्वं दंभित्वं हिंसितत्वं अज्ञानं तत् हेयं संसारहेतुत्वात् ॥ ११ ॥ एभिः साधनैः यत् ज्ञेयं तदाह ॥ ज्ञेयमिति ॥ यत् ज्ञेयं तत्
अहं प्रवक्ष्यामि यत् ज्ञात्वा अमृतं अश्नुते ॥ च पुनः प्रवृत्तेति ॥ अमृतं अनादिमत् उत्पत्तिरहितं ॥ परं निरतिशयं ब्रह्म तत् ज्ञेयं ॥ न सत् न अस
प

॥ असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ ९ ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्त
देशसेवित्वमरतिर्जनसंसदि ॥ १० ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं ॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥ ११ ॥ ज्ञेयं य
त्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥ १२ ॥ सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं ॥ स
र्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥ बहिरंतश्च भूतानामचरं चरमेव च ॥ सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चांतिके
च तत् ॥ १५ ॥

दुच्यते ॥ सदसत् बुद्धिविषयो न भवति ॥ १२ ॥ सदसत्त्वाभ्यां प्रत्ययाविषयत्वे ज्ञेयस्य कथं सत्त्वमाशंक्याह सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वप्र
तिपादयन् तदाशंकां निवर्तयति ॥ सर्वत इति पंचभिः ॥ तत् ज्ञेयं ब्रह्म सर्वे ये पाणिपादादयो अवयवाः अस्यैव तत् सर्वतः पाणिपादं सर्वतः अ
सि क्षिशिरोमुखानि यस्य तत् सर्वतोऽक्षिशिरोमुखं सर्वतः सर्वत्र श्रुतिमत् लोके प्राणिसमूहे सर्वं आवृत्य तिष्ठति ॥ १३ ॥ उपाधिभूतपाणि त
पादादि इंद्रियतानेंद्रियाध्यारोपणात् ज्ञेयस्य तद्वत्ता मा भूत् इत्येवमर्थमाह ॥ सर्वेंद्रियेति ॥ सर्वेषां इंद्रियाणां कर्मेंद्रियज्ञानेंद्रियमनो
बुद्धीनां वृत्तिः करणं अंतःकरणानां गुणैः अध्यवसायसंकल्पश्रवणवचनादिभिः अवभासत इति ॥ सर्वेंद्रियगुणाभासं सर्वेंद्रियव्यापारैः आ
र्तिमिव भासते सर्वेंद्रियैः अंततः करणैः विवर्जितं रहितं ॥ असक्तं सकलवस्तुसंश्लेषवर्जितं सर्वं बिभर्ति सर्वभृत् च तत् जगतो जनस्य ... शुक्तिका ॥ ४१ ॥
सत्त्वादिगुणैः वर्जितं निर्गुणं गुणानां सत्त्वादीनां सुखदुःखमोहाकारपरिणतानां भोक्तृ च उपलब्धृ च ॥ १४ ॥ रामरामरामरामरामरामराम

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥
सर्व ३

महत्तन्मात्रादी

प॰ ३

लक्षणमविपुरलीभूताय तज्ज्ञानाय तावत् क्षेत्रस्वरूपमाह ॥ महाभूतानीति द्वाभ्यां ॥ महाभूतानि महाभूतारंभकाणि पंचतन्मात्राणि पृथ्व्यादीनि ॥ अ
हंकारोऽहंभाव ॥ बुद्धिर्महत्तत्वं ॥ अव्यक्तं अव्याकृतं ॥ इंद्रियाणि दश पंच बुद्धींद्रियाणि पंच कर्मेंद्रियाणि एकं च मनः ॥ पंचेंद्रियगोचराः स्थूला व्याद
यः पंचमहाभूतानां रूपाः गंधादिधर्म्मोपेता विषयाः ॥ किं च ॥ अनुकूलं सर्वं जानीये सुखे तत्साधने वा योऽभिलाषः सा इच्छा अनिष्टविषयो द्वेषः ॥ सु
खमाह्लादः दुःखं परितापः ॥ संघातो देहेंद्रियाणां संहतिः तस्यां संहतौ अभिव्यक्तोऽन्तःकरणवृत्तिः तप्तायःपिंडे अग्निरिव चैतन्याभासरसविद्धा
सा चेतना उच्यते ॥ धृतिः यया अवसादं ग्लानिप्राप्तानि देहेंद्रियाणि ध्रियंते सा धृतिः ॥ एते इच्छादयः ज्ञेयत्वात् क्षेत्रधर्म्माः प्रकृतिधर्म्मा एव न आत्म
धर्म्माः तस्मात् एतत् क्षेत्रं सविकारं समासेन संक्षेपेन उदाहृतं ॥६॥ इदानीं तत् करणानां तद्व्यात विविक्ततया ज्ञेयं शुद्धक्षेत्रज्ञं विस्तरेण वर्णयिष्यन् तत्सा ए

॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥५॥ इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ॥ एतत्क्षे
त्रं समासेन सविकारमुदाहृतं ॥६॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥ ७ ॥ इंद्रि
यार्थेषु वैराग्यमनहंकार एव च ॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ॥८॥ राम राम राम राम राम राम राम राम राम राम राम राम राम राम ॥

धनानि च ज्ञानसाधनं प्रभुवन् निरूपयति ॥ अमानित्वमिति पंचभिः ॥ अमानित्वं आत्मश्लाघाविरहः अदंभित्वं स्वधर्म्मप्रकटीकरणाभा
वः ॥ अहिंसा प्राणिनामपीडनं ॥ क्षांतिः परापराधप्राप्तौ अविक्रिया ॥ आर्जवं ऋजुभावः ॥ मोक्षसाधनोपदेशेषु आचार्यस्य शुश्रूषादिप्रयोजने
शौचं सेवनं आचार्योपासनं ॥ देहस्य मृज्जलकादिना अंतःकरणस्य सद्वासनया रागादिमलानां क्षालनं द्विविधं शौचं ॥ मोक्षमार्गे एव निश्चयं त्वं स्थैर्यं ॥
आत्मविनिग्रह आत्मविनिग्रहः ॥ आत्मोपकारिणं तयास्मार्गस्थापनं ॥७॥ इंद्रियार्थेषु विषयेषु वैराग्यं वैतृष्ण्यं ॥ अनहंकार अहंकारभाव ॥ जन्ममृत्यु
जराव्याधिदुःखदोषानुदर्शनं ॥ जन्मनि गर्भवासयोनिद्वारनिःसारणं दोषः ॥ मृत्यौ मर्म्मच्छेदनादि दुःखं दोषः ॥ जरायां प्रज्ञाशक्तितेज ॥
इंद्रियबलहानिरिति दोषः व्याधौ शिरोरोगज्वरादिषु पीडा दोषः तथा दुःखेषु आधिदैविकादिषु दोषः तेषां सर्वेषां अनुदर्शनं आलोचनं ॥८॥

आत्मग्रहत्वाभ्यसदेहेंद्रियसंघातस्य विनिग्रहः

तयोरविवेकात् जीवस्य बाप्नस्यचिदंशस्य संसार: तदेवं प्रकृतिद्वयं क्षेत्रक्षेत्रज्ञात्मत्वेन
उक्तमात

मायाख्यपरमेश्वरस्य जगन्निर्माणसाधनभूते द्वे प्रकृती निर्दिष्टे तत्रापराष्टधा भिन्ना त्रिगुणात्मिका क्षेत्रलक्षणा ॥ अन्या परा जीवभूता क्षे
॥६०॥ त्रज्ञलक्षणा तयोर्विविक्तं तत्त्वं निरूपयन् तेषामहं समुद्धर्तेति ॥ स्वभक्तस्य संसारात् समुद्धरणं प्रतिज्ञाय तत्त्वज्ञानमन्तरेण तदसंभवात्
तस्य प्रकृतिद्वयविवेकेन परमात्मतत्त्वं निरूपयन्नाह ॥ श्रीभगवानुवाच ॥ इदमिति ॥ हे कौन्तेय इदं परिदृश्यमानं शरीरं क्षेत्रं क्षतात् त्राणा
त् क्षेपात् अथवा क्षेत्रवत् अस्मिन् कर्मफलं निष्पद्यते ॥ संभवात् ॥ क्षेत्रमित्येतदभिधीयते ॥ कथ्यते ॥ एतत् आपादतलमस्तकं क्षेत्रं यो वेत्ति
क्षेत्र स्वभावेनानुपदेशेन वा तद्विदः क्षेत्रज्ञविभागविदः तं क्षेत्रज्ञ इति प्राहुः ॥ कथयन्ति ॥ ॥ इदानीं तस्यैव पारमार्थिकमसंसारि स्वरूपमाह ॥ क्षेत्र
ज्ञं चेति ॥ हे भारत सर्वक्षेत्रेषु ब्रह्मादिस्तम्बपर्यन्तेषु क्षेत्रेषु शरीरेषु तदवच्छिन्नं संसारिणमपि वा त्वमात्मानं क्षेत्रज्ञं जीवात्मानं मामसंसारि

॥ अर्जुन उवाच ॥ प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ॥ एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥ ॥ श्रीभगवानुवाच ॥ इदं शरीरं कौन्तेय क्षेत्र
मित्यभिधीयते ॥ एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ ॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं
मतं मम ॥ २ ॥ तत्क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत् ॥ स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥ ऋषिभिर्बहुधा गीतं छन्दोभिर्वि
विधैः पृथक् ॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ ४ ॥

णः सर्वोपाधिरहितं विद्धि जानीहि ॥ यत् क्षेत्रक्षेत्रज्ञयोर्ज्ञानं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तत्सम्यग्ज्ञानमिति मम परमेश्वरस्य मतं ॥
त्रि अभिप्रेत ॥ २ ॥ अष्टधा भिन्ना त्रिगुणात्मिका प्रकृतिः पुरुषस्य भोगार्थं सर्वदेहेन्द्रियं तया परिणता सेह दृश्यमाना शरीरमित्यक्षेत्रशब्देनोक्तां तदेतत् प्रपंच
यष्यन् प्रतिजानीते ॥ तत् क्षेत्रमिति ॥ तत् क्षेत्रं शरीरं यच्च यद्रूपं यादृक् यादृशं स्वकार्ये धर्मैर्युक्तं यद्विकारि यैः इन्द्रियादिविकारैर्युक्तं यतश्च प्रकृति
पुरुषसंयोगात् भवति ॥ यत् प्रकारं स्थावरजंगमादिभेदभिन्नं ॥ स च क्षेत्रज्ञोऽपि यत्स्वरूपश्च यत्प्रभावश्च अचिन्त्यैश्वर्ययोगेन ये प्रभावाः यस्य
तं तत्संक्षेपतो मत्तः शृणु ॥ ३ ॥ क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं वसिष्ठादिभिरन्यत्र विस्तरेण उक्तं संक्षेपेण दर्शयन् तद्याथात्म्यं दर्शयन् विवक्षितं स्तौति
बुद्धिपरोचनायेति ॥ ऋषिभिरिति ॥ ऋषिभिर्वसिष्ठादिभिः विविधैः नानाप्रकारैः छन्दोभिः ऋगादिभिः हेतुमद्भिर्युक्तियुक्तैः विनिश्चितैः निःसंदिग्धैः ब्रह्मस ॥६०॥
त्रवाचकैः पदैः वेदवाक्यैरेव क्षेत्रक्षेत्रज्ञयाथात्म्यं बहुधा पृथक् विवेकेन गीतं ॥ ४ ॥ रामरामरामरामरामरामरामराम रामरामरामरामरामरामरामराम

चिरंजीवाय

१वर्गा

प्रदि:

यस्मात्संन्यासिनं मत्कारणात् लोकः न उद्विजते उद्वेगं न प्राप्नोति तु पुनः यः संन्यासी लोकात् न उद्विजते न संतप्यते प्रियत्वात् अत्र तः कारणं स्पष्टत्वक्षरीरमोचा
सापादिभ्यो हर्षः असहिष्णुता अमर्षः भयं त्रासः उद्वेगः उद्विग्नता तैर्मुक्तो यः स मे प्रियः ॥१५॥ यो मद्भक्तः एवंविधो यो मद्भक्तः स मे मम प्रियः कथंभूतः अ
नपेक्षः देहेन्द्रियविषयसंबंधादिषु अपेक्षारहितः विषयेषु निस्पृहः बाह्याभ्यन्तरशौचेन संपन्नः प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत् प्रतिपत्तुं समर्थः
दक्षः कस्यचित् निर्लिप्तो पक्षे न भजते ॥ उदासीनो गतव्यथः गतभयः स्वार्थकर्मपरित्यागी ॥ सर्वारंभपरित्यागी भक्तिमान् यः स मे मम प्रियः
१६॥ यः इष्टप्राप्तौ न हृष्यति अनिष्टप्राप्तौ न द्वेष्टि प्रियवियोगे न शोचति यः अप्राप्तं न कांक्षति शुभाशुभे कर्मणी परित्यक्तुं शीलं यस्य सः शुभाशुभपरित्यागी
एवंविधः यो भक्तिमान् स मे मम प्रियः ॥१७॥ च पुनः शत्रौ मित्रे च तुल्यः समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः संगव

॥ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ॥ सर्वारंभ
परित्यागी यो मद्भक्तः स मे प्रियः ॥१६॥ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ॥ शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१७॥ समः शत्रौ च
मित्रे च तथा मानापमानयोः ॥ शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥१८॥ तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित् ॥ अनिकेतः स्थिर
मतिर्भक्तिमान्मे प्रियो नरः ॥१९॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ॥ श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥२०॥ इति श्रीभगवद्गीता
सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥१२॥ राम राम राम राम राम राम राम राम राम राम राम

र्जितः एकान्तसेवी ॥१८॥ तुल्यनिन्दास्तुति तुल्ये समे निन्दास्तुती यस्य सः मौनी संयतवाक् येन केनचित् शरीरस्थितिहेतुमात्रेणापि संतुष्टः अनिकेतः
अनाश्रयः स्थिरमतिः परमार्थवस्तुनि निश्चलबुद्धिः यः एवंविधो नरः भक्तिमान् स मे मम प्रियः ॥१९॥ उक्तं धर्मजातं फलेन स्तुवन् उपसंहरति ॥ ये त्विति ॥ तु
पुनः ये संन्यासिनः इदं यथोक्तं अद्वेष्टा सर्वभूतानामित्यादि विष्णुकारणोक्तं धर्म्यामृतं पर्युपासते अनुतिष्ठन्ति ॥ श्रद्दधानाः श्रद्धावन्तः मत्परमाः अ
हं अक्षरात्मा परमा निरतिशया गतिः येषां ते मत्परमाः मद्भक्ताः उत्तमां परमार्थज्ञानलक्षणां भक्तिं आस्थिताः ते अतीव मे भगवतः विष्णोः पर
मेश्वरस्य प्रिया भवन्ति [illegible] तस्मात् इदं धर्म्यामृतं मुमुक्षुणा यत्नतः अनुष्ठेयं विष्णोः प्रियं धाम जिगीषुणा इति वाक्यशेषः ॥२०॥ इति द्वादशोऽध्यायः
॥१२॥
दुःखमयत्वं च वर्तेत तद्विघ्नमतो बुधः स्वस्वरूपपदांभोजं भक्तिसत्पथमाभजेत् १ भक्तानां महतां मुख्यं मोक्षसाधनमादित्यवादिमत
त्रयोदशेऽथ तस्मै तत्त्वज्ञानमुदीर्यते १

नकेवलं एतावदेव किंच ॥ इहैकस्थमिति ॥ हे गुडाकेश इह मम देहे अवयवत्वेन समग्रं सचराचरं चरेण सह वर्त्तत इति सचराचरं स्थावरजंगमं एकस्थं जगत् पश्य
पश्य अन्यदपि जयपराजयादिकं यद्द्रष्टुमिच्छसि तदपि पश्य ॥७॥ विद्यमानचक्षुषोऽनधिकारित्वं दर्शयन् चक्षुरंतरं ददातु इति जानीतेन त्विति ॥ तु पुनः
मां दिव्यं विश्वरूपं परं अनेन नात्राहं तेन स्वचक्षुषा द्रष्टुं न शक्नोषि ते तु त्वं दिव्यं च चक्षुर्ददामि येन दिव्येन च चक्षुषा द्रष्टुं शक्नोषि मे मम ऐश्वरं ईश्वरसंबंधि
न योगं शक्तिं अतिशयं पश्य ॥८॥ एवं उक्त्वा भगवान् अर्जुनाय यत्स्वरूपं प्रदर्शितवान् तत्स्वरूपं यावद्दर्शितवान् ईदृशं धृतराष्ट्रं प्रति संजयः एवमु
क्त्वेत्यादि षड्भिः श्लोकैः प्रतिपादयति ॥ एवमिति ॥ हे राजन् महायोगेश्वरः हरिः एवं यथोक्तेन प्रकारेण उक्त्वा ततोऽनंतरं पार्थाय अर्जुनाय परमं ॥
ऐश्वरं रूपं दर्शयामास ॥९॥ कथंभूतं तदित्याह ॥ अनेकेति ॥ अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे तत् ॥ अनेकवक्त्रनयनं अनेकानि

॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं ॥ मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥७॥ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ॥ दिव्यं ददामि ते चक्षुः
पश्य मे योगमैश्वरं ॥८॥ संजय उवाच ॥ एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ॥ दर्शयामास पार्थाय परमं रूपमैश्वरं ॥९॥ अनेकवक्त्रनयनम
नेकाद्भुतदर्शनं ॥ अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं ॥१०॥ दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं ॥ सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं ॥११॥
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥१२॥

द्भुतानि विस्मयकानि दर्शनानि यस्मिन् रूपे तत् अनेकाद्भुतदर्शनं अनेकानि दिव्यानि आभरणानि यस्मिन् रूपे तत् अनेकदिव्याभरणं दिव्यानि
बह्वादीनि उद्यतानि आयुधानि यस्मिन् रूपे तत् दिव्यानेकोद्यतायुधं ॥१०॥ दिव्यानि माल्यानि पुष्पाणि अंबराणि वस्त्राणि च बिभर्त्तीति दिव्यमा॥
ल्यांबरधरं दिव्याः गंधानुलेपनानि च यस्य तत् दिव्यगंधानुलेपनं सर्वैः आश्चर्यकारिभिः वस्तुभिर्युक्तं सर्वाश्चर्यमयं देवमनंतं नास्ति देशतः ॥
कालतो वस्तुतश्च अंतो यस्य तं अनंतं विश्वतोमुखं सर्वतोमुखं सर्व[illegible]द्रष्टारं ॥११॥ याः पुनः भगवतो विश्वरूपस्य भासः तासां तारतम्य उपमां
कुर्वन् तस्यातीवरूपत्वं निरतिशयत्वं चाह ॥ दिवीति ॥ अंतरिक्षे द्यौलोके वा युगपदुत्थितस्य सूर्यसहस्रस्य युगपदुत्थिता भाः कांतिः तस्य महात्मनो वि
श्वरूपस्य भासः भासां कांत्याः यदि सदृशी स्यात् ॥ यदि वा न स्यात् भगवतो भाः ततोऽपि अधिका इत्यर्थः ॥१२॥ रामराम रामरामराम रामरामराम राम रामराम ॥३४॥

विभूतिवैभवं दशमाध्यायांते विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति ज्ञापयता यत् जगदात्मरूपं स्वायमैश्वरस्वरूपं तत् निर्दिष्टं तत्साक्षात्कर्तुकामो मुमु-
क्षुर्विवेकी अर्जुन उवाच ॥ मदनुग्रहायेति ॥ हे कृष्ण त्वया मदनुग्रहाय ममानुग्रहार्थं यत्परमं निरतिशयं गुह्यं अध्यात्मसंज्ञं तेन ज्ञानैश्वर्यश-
क्तिबलवीर्यतेजोभिः संपन्नो भगवान् स्वस्वरूपं विषयं आत्मानात्मविवेकविषयं वच: वाक्यं उक्तं तेन ममायं मोहः विगतः अपगतः ॥१॥ किंच ॥ भवाप्य-
याविति ॥ हे कमलपत्राक्ष हि निश्चितं मया त्वत्तः भूतानां भवाप्ययौ भवः उत्पत्तिः अप्ययः प्रलयः तौ भवाप्ययौ त्वत्सकाशात् विस्तरशः विस्तारेण ॥
श्रुतौ च अव्ययं अक्षयं माहात्म्यं च श्रुतं ॥२॥ सर्वोत्कर्षं निजस्वाभिप्रायमाविःकरोति ॥ एवमिति ॥ हे परमेश्वर यथा त्वं आत्मानं आत्थ
स्वकीयं परमात्मानं आह कथयसि ॥ तमेव एवमेव नान्यथा हे पुरुषोत्तम ते तव ऐश्वरं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नं रूपं द्रष्टुं

॥ अर्जुन उवाच ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं ॥ यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम ॥१॥ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥२॥ एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ॥ द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥३॥ मन्यसे यदि त-
च्छक्यं मया द्रष्टुमिति प्रभो ॥ योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं ॥४॥ श्रीभगवानुवाच ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ॥ नानाविधा-
नि दिव्यानि नानावर्णाकृतीनि च ॥५॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ॥ बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥६॥ ताम

ध्यापि ॥३॥ न केवलं ममेच्छयैतत्त्वया वक्तव्यमपि मदीयमधिकारित्वं च अपेक्षणीयमित्याह ॥ मन्यसे इति ॥ हे प्रभो यदि तत् ऐश्वरं रूपं मया द्रष्टुं
शक्यं इति मन्यसे हे योगेश्वर योगा: योगिन: तेषां ईश्वर: योगेश्वर: तत: त्वं मे मह्यं अव्ययं आत्मानं दर्शय ॥४॥ एवं प्रार्थितो भगवान् अद्भुतं स्वकीय-
रूपं दर्शयिष्यन् सावधानत्वसंपादनेन च अर्जुनं अभिमुखीकरोति ॥ पश्य मे इति ॥ हे पार्थ मे मम रूपाणि शतश: अथ सहस्रश: नानाविधानि अनेकप्र-
काराणि दिव्यानि अलौकिकानि अप्राकृतानि च पुन: नानावर्णाकृतीनि नानाविधा नीलपीतादिप्रकारा वर्णा: तथा आकृतय: अवयव वदनसंस्थान
वयवस्थानविशेषा: येषां रूपाणां तानि नानावर्णाकृतीनि रूपाणि पश्य ॥५॥ किंच ॥ पश्येति ॥ हे भारत तथा आदित्यान् वसून् रुद्रान् अ- विशेषा:
श्विनौ मरुतः पश्य बहूनि अदृष्टपूर्वाणि आश्चर्याणि आश्चर्यकारीणि पश्य ॥६॥

॥ तथा साम्नां मध्ये बृहत्साम अस्मि । छंदसां मध्ये गायत्री छंदः अस्मि । मासानां मध्ये मार्गशीर्षः अस्मि । ऋतूनां मध्ये कुसुमाकरः अस्मि ॥ ३५ ॥ छलयतां छलनकर्तॄणां म
ध्ये द्यूतं अस्मि । तेजस्विनां प्रभूणां तेजः प्रभावो अस्मि । जेतॄणां जयो अस्मि । व्यवसायिनां उद्यमवतां उद्यमः अस्मि । सत्ववतां सात्विकानां सत्वं अस्मि ॥ ३६ ॥ वृ
ष्णीनां वृष्णिकुलोत्पन्नानां मध्ये वासुदेवः अस्मि । पांडवानां युधिष्ठिरादीनां मध्ये धनंजयः अर्जुनो अस्मि । मुनीनामपि मध्ये व्यासः वेदव्यासो अस्मि । कवी
नां मध्ये उशना शुक्राचार्यः कविः अस्मि ॥ ३७ ॥ दमयतां दमयितॄणां दुर्दान्तानां दमनकारकः दंडः अस्मि । जिगीषतां जेतुं इच्छतां नीतिः अस्मि । च पुनः गुह्यानां गोप्या
नां मौनं अस्मि । ज्ञानवतां ज्ञानं अस्मि ॥ ३८ ॥ हे अर्जुन च पुनः सर्वभूतानां यदपि बीजं प्ररोहकारणं तत् अहं अस्मि । यत् चराचरं भूतं मया विना मया अपरित्य ६
क्तं स्यात् भवेत् तत् नास्ति ॥ ३९ ॥ प्रकरणार्थं उपसंहरति ॥ हे परंतप मम दिव्यानां विभूतीनां विस्ताराणां अंतः नास्ति । यतः ईश्वरस्य सर्वा

॥ बृहत्साम तथा साम्नां गायत्री छंदसामहं ॥ मासानां मार्गशीर्षोहं ऋतूनां कुसुमाकरः ॥ ३५ ॥ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं ॥ जयोस्मि ॥ तेज
व्यवसायोस्मि सत्वं सत्ववतामहं ॥ ३६ ॥ वृष्णीनां वासुदेवोस्मि पांडवानां धनंजयः ॥ मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥ ३७ ॥ दंडो
दमयतामस्मि नीतिरस्मि जिगीषतां ॥ मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ॥ ३८ ॥ यच्चापि सर्वभूतानां बीजं तदहमर्जुन ॥ न तदस्ति विना यत्
स्यात् मया भूतं चराचरं ॥ ३९ ॥ नांतोस्ति मम दिव्यानां विभूतीनां परंतप ॥ एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥ यद्यद्विभूतिमत्स
त्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावगच्छ त्वं मम तेजोंशसंभवं ॥ ४१ ॥ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन ॥
स्थितो जगत् ॥ ४२ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोध्यायः ॥ ॥ १० ॥

त्मनः दिव्यानां विभूतीनां इयत्ता केनचित् वक्तुं ज्ञातुं शक्या न । तु पुनः मया एव विभूतेः विस्तरः उद्देशतः । एकदेशेन विभूतेर्विस्तरः प्रोक्तः ॥ ४० ॥
पुनः प्रसाकांक्षे प्रतिसौकत्येन कथयति ॥ यद्यदिति ॥ यद्यत् लोके विभूतिमत् ऐश्वर्ययुक्तं श्रीमत् संपत्तियुक्तं ऊर्जितं तत् उत्साहादिगुणोपेतं
वस्तु सत्वं तत्तत् मम तेजसः अंशस्य अंशेन संभवं संभूतं जानीहि ॥ ४१ ॥ अथवा किं अनेन परिच्छिन्नदर्शनेन सर्वं मयापरिच्छिन्नमेव कुरु इत्याह । अथ
वेति ॥ हे अर्जुन अथवा अनवप्तेन एवमादिना बहुना परिच्छिन्नेन ज्ञानेन किं अहं कृत्स्नं इदं जगत् एकावयवेन अशेषतः अवष्टभ्य व्याप्य अवस्थितो अस्मि ॥३३॥

॥ ४२ ॥ इति दशमोध्यायः ॥ १० ॥

इंद्रियद्वारा ... बुद्धिर्विदितिमस्य प्रज्ञादृष्टि विधानाय निदर्शनाय

विभूतिं ... हरिः दिव्ये ... अर्जुनस्य ... विश्वरूप ...

सर्ववृक्षाणां मध्ये अश्वत्थः। चपुनः देवर्षीणां देवा एव सन्तः ऋषित्वं प्राप्ता मंत्रद्रष्टारो ये ते देवर्षयस्तेषां देवर्षीणां मध्ये नारदः नामा देवर्षिरहं। गंधर्वाणां हाहा
हूहू प्रभृतीनां मध्ये चित्ररथनामा गंधर्वोऽहं। सिद्धानां जन्मनैव धर्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्ताः सिद्धास्तेषां सिद्धानां मध्ये कपिलनामा मुनिरस्मि
अहं॥२६॥ अश्वानां मध्ये अमृतोद्भवं अमृतार्थं क्षीरोदधिमथनोद्भूतं उच्चैःश्रवसं मां विद्धि। गजेन्द्राणां मध्ये ऐरावतं मां विद्धि। नराणां पुरुषाणां मध्ये
नराधिपं राजानं मां विद्धि॥२७॥ आयुधानां मध्ये वज्रं अहं। धेनूनां मध्ये कामधुक् कामधेनुरहं। चपुनः प्रजनः प्रजननहेतुः कंदर्पोऽहं। सर्पाणां मध्ये वा
सुकिरहं॥२८॥ चपुनः नागानां मध्ये अनंतोऽहं। यादसां जलदेवतानां मध्ये वरुणोऽहं। चपुनः पितॄणां कव्यवालादीनां मध्ये अर्यमाऽहं। संयमतां संयमं
कुर्वतां मध्ये यमोऽहं॥२९॥ चपुनः दैत्यानां मध्ये प्रह्लादोऽहं। कलयतां वशीकुर्वतां गणनां वा कुर्वतां कालोऽहं। चपुनः मृगाणां मध्ये मृगेन्द्रः सिंहोऽहं।

प॰२

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः। गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥२६॥ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं। ऐरावतं गजें
द्राणां नराणां च नराधिपं॥२७॥ आयुधानामहं वज्रं धेनूनामस्मि कामधुक्॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः॥२८॥ अनंतश्चास्मि नागा
नां वरुणो यादसामहं। पितॄणामर्यमा चास्मि यमः संयमतामहं॥२९॥ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं। मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च
पक्षिणां॥३०॥ पवनः पवतामस्मि रामः शस्त्रभृतामहं। झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥३१॥ सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन॥
अध्यात्मविद्या विद्यानां वादः प्रवदतामहं॥३२॥ अक्षराणामकारोऽस्मि द्वंद्वः सामासिकस्य च। अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥३३॥
मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां॥ कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥३४॥राम

चपुनः पक्षिणां मध्ये वैनतेयः गरुडोऽहं॥३०॥ पवतां पावयितॄणां वेगवतां च मध्ये पवनो वायुरहं। शस्त्रभृतां मध्ये रामः दाशरथिरहं। चपुनः झषाणां मध्ये म
करोऽहं। स्रोतसां नदीनां मध्ये जाह्नवी गंगाऽहं॥३१॥ हे अर्जुन सर्गाणां सृष्टीनां आदिरंतर्मध्ये उत्पत्तिविनाशस्थितयोऽहं। विद्यानां मध्ये अध्यात्मविद्या
अहं। प्रवदतां प्रवचनानां कथनां वादजल्पवितंडानां वादोऽहं। वीतरागकथा वादः विजिगीषुकथा जल्पः स एव जल्पः एव [illegible] स्वपक्षस्थापनाहीनो वितं
डा॥३२॥ अक्षराणां मध्ये अकारोऽहं। चपुनः सामासिकस्य समाससमुदायस्य द्वंद्वोऽहं। अक्षयः अक्षीणः कालः कालस्यापि परमेश्वरो वा अहमेव विश्वतोमुखः
चतुर्मुखः धाता ब्रह्माऽहं॥३३॥ चपुनः सर्वहरः मृत्युरहं। मृत्युर्द्विविधः धनादिहरः प्राणहरश्च सर्वहरः धनप्राणहरः। द्विविधोऽपि अहं। चपुनः भविष्यतां
भाविकल्याणानां उत्कर्षप्राप्तियोग्यानां उद्भवोऽभ्युदयः तत्प्राप्तिहेतुरहं। नारीणां स्त्रीणां मध्ये कीर्तिः श्रीः वाक् सरस्वती इति [illegible] उत्तमाः तथा स्मृतिर्मेधा
धृतिः क्षमा अहं॥३४॥

श्री

गीतासटी॰

इतिश्रुकंपासंबोधने

॥३२॥ ॥तदेवंवदिष्ठेविषयिचिंतेतत्रतत्रविभूतिभेदेनत्वश्चिंतैवयथाभवेत॥तथाविस्तरेणकथयइत्याह॥विस्तरेणेति॥हेजनार्द्दन॥भूयःपुनरपिआत्मनोयोगंऐश्व
र्यमाप्मर्थ्यविभूतिंध्येयपदार्थानांविस्तारंचपुनरपिविस्तरेणकथय॥हियस्मात्त्वमेममत्वन्मुखनिःसृतवाक्यामृतंशृण्वतःतृप्तिर्नास्ति॥१८॥एवंप्रार्थि
तःसन्श्रीभगवानुवाच॥हंतेतिहंत॥हेकुरुश्रेष्ठअहंतेइदानींतितवदिव्याःदिव्यावाआत्मविभूतयःआत्मनोममप्राधान्यविस्ताराःप्राधान्यतःक
रूपं थयिष्यामि॥मेममविस्तरस्यअंतोनास्ति॥१९॥तत्रप्रथमंईश्वरस्वरूपंकथयतिअहमिति॥हेगुडाकेशअहंसर्वभूताशयस्थितःसर्वेषांभूतानांचराचराणां॥
हृदिस्थितःआत्माजीवात्माअस्मि॥चपुनःअहंभूतानांआदिःमध्यंअंतएवचअस्मि॥२०॥इदानींअध्यायपरिसमाप्तेःविभूतीःकथयति॥आदित्यानामि
बोधने ति॥आदित्यानांद्वादशादित्यानांमध्येविष्णुर्नामआदित्योऽहं॥ज्योतिषांप्रकाशानांमध्येअंशुमान्रश्मिमान्रविःअस्मि॥मरुतांएकोनपंचाशतांवा

॥विस्तरेणात्मनोयोगंविभूतिंचजनार्द्दन॥भूयःकथयतृप्तिर्हिशृण्वतोनास्तिमेमृतं॥१८॥श्रीभगवानुवाच॥हंततेकथयिष्यामिदिव्याह्यात्म
विभूतयः॥प्राधान्यतःकुरुश्रेष्ठनास्त्यंतोविस्तरस्यमे॥१९॥अहमात्मागुडाकेशसर्वभूताशयस्थितः॥अहमादिश्चमध्यंचभूतानामंतएवच॥२०॥आदित्या
नामहंविष्णुर्ज्योतिषांरविरंशुमान्॥मरीचिर्मरुतामस्मिनक्षत्राणामहंशशी॥२१॥वेदानांसामवेदोस्मिदेवानामस्मिवासवः॥इंद्रियाणांमनश्चास्मिभू
तानामस्मिचेतना॥२२॥रुद्राणांशंकरश्चास्मिवित्तेशोयक्षरक्षसां॥वसूनांपावकश्चास्मिमेरुःशिखरिणामहं॥२३॥पुरोधसांचमुख्यंमांविद्धिपार्थ॥
बृहस्पतिं॥सेनानीनामहंस्कंदःसरसामस्मिसागरः॥२४॥महर्षीणांभृगुरहंगिरामस्म्येकमक्षरं॥यज्ञानांजपयज्ञोस्मिस्थावराणांहिमालयः॥२५॥

यूनांमध्येमरीचिर्नामवायुरहं॥नक्षत्राणांमध्येशशीचंद्रमाअहं॥२१॥वेदानांचतुर्णांऋग्यजुःसामाथर्वणांसामवेदोऽहं॥देवानांरुद्रादित्यानांमध्ये
वासवःइंद्रोऽहं॥इंद्रियाणांएकादशानांचक्षुःश्रवणघ्राणरसनत्वक्पाणिपादपायूपस्थमनसांमध्येमनःअहं॥भूतानांमध्येचेतनासर्वदाज्ञानशक्तिर्बु
द्धिःअहं॥२२॥चपुनःरुद्राणांएकादशानांमध्येशंकरनामारुद्रोऽहं॥यक्षरक्षसांमध्येवित्तेशःधनदोऽहं॥चपुनःवसूनांअष्टानांमध्येपावका
नामावसुरहं॥शिखरिणांकुलाचलानांमध्येमेरुरहं॥२३॥हेपार्थचपुनःपुरोधसांराज्ञांपुरोहितानांमुख्यंबृहस्पतिंमांविद्धि॥सेनानीनांसेनाप
तीनांमध्येस्कंदःअहं॥सरसांजलाशयानांमध्येसागरोऽहं॥२४॥महर्षीणांवसिष्ठादीनांमध्येभृगुर्नामामहर्षिःअहं॥गिरांपदानांमध्येएकाक्षरः ॥३२॥
ॐकारःअहं॥यज्ञानांश्रौतानांस्मार्त्तानांमध्येजपयज्ञोऽहं॥स्थावराणांमध्येहिमालयःअहं॥२५॥रामरामरामरामरामरामरामराम

नाशकत्वमाह तिमिरप्रतिबंधकस्याज्ञानस्य विनाशबुद्धियोगदाने हेतुं वदन् तस्य बुद्धियोगस्य फलं संसारबीजस्याज्ञानस्यापि विनाशयामीत्याह ॥ तेषामिति ॥ अनु
तेषामेवानुकंपार्थं कथं तु नाम श्रेयः स्यादिति दयाहेतोः आत्मभावस्थः आत्मनो भावोऽन्तःकरणमाशयः तस्मिन्नेव स्थितः सन् भास्वता। नि संप्र
प्रवृत्तैकाग्र्यध्यानजनितसम्यग्दर्शनभास्वता ज्ञानदीपेन विवेकप्रत्ययरूपेण अज्ञानजं अविवेकतो जातं मिथ्याप्रत्ययलक्षणं तमो मोहांधकारं
नाशयामि ॥ ११ ॥ यथोक्तां भगवतो विभूतिं योगं च श्रुत्वा विस्तरेण जिज्ञासुः ॥ अर्जुन उवाच ॥ परं ब्रह्मेति ॥ भगवान् परं ब्रह्म परं धाम परं तेजः परमं पवित्रं
पावनं ॥ परमेश्वरो हि ॥ शाश्वतं नित्यं दिव्यं स्वप्रकाशं दिव्यं आदिदेवं सर्वभूतानां आदिभूतं विभुं व्याप्तं ॥ १२ ॥ किं च ॥ आहुरिति ॥ सर्वे ऋषयो महर्षयः ॥
वसिष्ठादयः तथा देवर्षिर्नारदः एते सर्वे ऋषयः असितः देवलः व्यासः त्वामाहुः ॥ चान्यत् स्वयं त्वमेव मे मह्यं ब्रवीषि ॥ १३ ॥ अतो मम इदानीं त्व

॥ तेषामेवानुकंपार्थमहमज्ञानजं तमः ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ ११ ॥ अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् ॥
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं ॥ १२ ॥ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥ १३ ॥ सर्वमे
तदृतं मन्ये यन्मां वदसि केशव ॥ नहि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥ १४ ॥ स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ॥ भूतभावन भूते
श देवदेव जगत्पते ॥ १५ ॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥ कथं विद्यामहं
योगिंस्त्वां सदा परिचिंतयन् ॥ केषु केषु च भावेषु चिंत्योऽसि भगवन्मया ॥ १७ ॥

दैश्वर्यस्य भावनाविरहे तेत्याह ॥ सर्वमिति ॥ हे केशव यत् त्वं मां प्रति वदसि एतत्सर्वं त्वया कृपया निश्चयथोक्तं तत् ऋतं सत्यमेव मन्ये हि यस्मात् हे भ
गवन् तव व्यक्तिं प्रादुर्भावं देवाः दानवाः न विदुः न जानंति ॥ १४ ॥ किं तर्हि स्वयमेवेति ॥ हे पुरुषोत्तम हे भूतभावन भूतानि भावयतीति भूतभावन
भूतेश देवदेव जगत्पते त्वं आत्मना आत्मानं निरतिशयं ज्ञानैश्वर्यबलादिशक्तिमंतं ईश्वरं स्वयमेव वेत्थ जानासि ॥ १५ ॥ यस्मात् तवाभिव्यक्तिं त्वमेव वे
त्सि न देवादयः तस्मात् वक्तुमर्हसि ॥ इति हि यस्मात् ता दिव्याः अलौकिकाः आत्मविभूतयः स्वकीयमहात्म्यविस्तराः अशेषेण साकल्येन वक्तुं त्वमेवार्
हसि याभिर्विभूतिभिः ॥ त्वं इमान् लोकान् व्याप्य तिष्ठसि ॥ १६ ॥ कथनप्रयोजनं दर्शयन् कथनमेव प्रार्थयते ॥ कथमिति ॥ हे योगिन् अहं त्वां सदा प
रिचिंतयन् कथं विद्यां कथं जानीयां हे भगवन् मया केषु केषु भावेषु पदार्थेषु चिंत्योऽसि ध्येयोऽसि ॥ १७ ॥

॥ किं च अहिंसेति ॥ प्राणिनामपीडनं अहिंसा । सर्वप्राणिषु तुल्यचित्तता समता संतोषस्तुष्टिः इंद्रियसंयमनपूर्वकं शरीरपीडनं तपः यथाशक्ति पात्रे प्र
तीर्थे दानं । धर्मनिमित्ता कीर्तिः यशः अधर्मनिमित्ता अकीर्तिरयशः ॥ यथोक्ता बुद्ध्यादयः भावाः भूतानां प्राणिनां स्वकर्मानुरूपेण मत्त एव अने
कप्रकारा भवंति ॥ ५ ॥ किं च ॥ महर्षय इति ॥ पूर्वे अतीतकाले भवाः सप्त भृग्वाद्याः महर्षयः तथा सावर्णा इति प्रसिद्धाः ॥ चत्वारो मनवः ते सर्वे एकाद सनकादयः
श मद्भावाः मच्चित्ताः वैष्णवसामर्थ्ययुक्ताः मनसैव मत्त उत्पादिताः मानसाः जाताः उत्पन्ना येषां एकादशानां लोके सर्गः इमाः स्थावरजंगमाः प्रजाः प्र
जाः ॥ ६ ॥ यथोक्तविभूत्यादितत्त्वज्ञानस्य फलमाह ॥ एतामिति ॥ पः मम एतां विभूतिं विस्तारं योगं च योगजं सर्वज्ञत्वं योगैश्वर्यमुच्यते ॥ अथवा योगमैश्व
र्यसामर्थ्यं तत्त्वतः यथावत् यो वेत्ति सः अविकंपेन अप्रचलितेन योगेन सम्यक्ज्ञानेन स्थैर्यरूपेण युज्यते संबध्यते अत्र संशयो न ॥ ७ ॥ अविकं ॥

॥ अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥ ५ ॥ महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ॥ मद्भावा मान
सा जाता येषां लोक इमाः प्रजाः ॥ ६ ॥ एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ॥ सोऽविकंपेन योगेन युज्यते नात्र संशयः ॥ ७ ॥ अहं सर्वस्य प्रभवो म
त्तः सर्वं प्रवर्त्तते । इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ ८ ॥ मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं ॥ कथयंतश्च मां नित्यं तुष्यं
ति च रमंति च ॥ ९ ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ॥ ददामि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥ राम राम राम राम राम राम राम राम राम ॥

पयोगस्वरूपं दर्शयन् तेन यथा सम्यक्ज्ञानं भवति तत्प्रकारमाह ॥ अहमिति ॥ अहं परं ब्रह्म सर्वस्य जगतः प्रभवः सर्वं जगत् स्थितिनाशक्रियाफलो
पभोगरूपं विक्रियास्वरूपं मत्त एव प्रवर्त्तते ॥ इति एवं मत्वा बुधाः अवगततत्त्वाः भावः परमार्थतत्त्वाभिनिवेशः तेन युक्ताः मां भजंते आश्रयंते ॥ ८ ॥
प्रीतिपूर्वकं भजनप्रकारमाह ॥ मच्चित्ता इति ॥ मयि परमेश्वरे चेतो येषां ते मच्चित्ताः ॥ मयि गतप्राणाः इंद्रियव्यापाराः मद्गतप्राणाः मद्गतेंद्रियाः अथवा मद्गत
जीवनाः परस्परं अन्योन्यं बोधयंतः अवगमयंतः मां ज्ञानबलवीर्यादिविशिष्टं कथयंतः तुष्यंति परितोषमुपयांति । रमंति । चरंति प्राप्नुवंति ॥
॥ ९ ॥ एवं भजतां सम्यक्ज्ञानं ददामीत्याह ॥ तेषामिति ॥ तेषां सततयुक्तानां नित्याभियुक्तानां प्रीतिपूर्वकं भजतां तं बुद्धियोगं मत्तत्त्वविषयं ॥ ३१ ॥
सम्यक्ज्ञानं बुद्धिः तया योगः संबंधः तं बुद्धियोगं ददामि ॥ येन बुद्धियोगेन सम्यग्दर्शनलक्षणेन ते मां परमेश्वरं आत्मत्वेन उपयांति प्रतिपद्यंते

उक्तः संक्षेपतः पूर्वं सप्तमादौ विभूतयः दशमे ताविस्तरंते सर्वत्रेश्वरदृष्टये

भि

तज्जनप्रकारं दर्शनेनोपसंहरति ॥ मन्मनाइति ॥ मन्मना मच्चित्तो भव ॥ मद्भक्तः मयि भक्तिमान् भव ॥ मद्याजी मयि पूजनशीलो भव ॥ मां नमस्कुरु ॥ मामेवैष्यसि ॥ एवं
चित्तं युक्त्वा समाधिं कृत्वा मत्परायणः मदेकशरणः सन् मां परमात्मस्वरूपं प्राप्स्यसि ॥ ३४ ॥ इति नवमोऽध्यायः ॥ ९ ॥ एवं सप्तमादिभिः त्रिभिरध्यायैः
भजनीयं परमेश्वरस्य रूपं निरूपितं तस्योक्तेषु केषु कौन्तेय ॥ ... दिना ... वमे चकार ॥ ... कतुरं ... यत्तत् ... दिनाऽध्यायद्वयेन तद्विभूतयः संक्षेपतो उक्ताः अ
थेदानीं ... विभूतीः प्रपंचयिष्यन् येषु येषु भावेषु चिन्त्योऽसि भगवान् तान् भगवान् भगवतस्तत्त्वं ... निरूपितमपि ... दुर्विज्ञेयत्वात् ... न कानुकं
पयानत्यपि निरूपयति ॥ भूयएवेति ॥ हे महाबाहो भूयएव पुनरपि मे मम परमं परमात्मस्वरूपप्रकाशकं वचः वाक्यं शृणु ॥ यत् अहं ते तुभ्यं प्रीयमाणाय
मद्वचनात् प्रीतिं प्राप्नुवते हितकाम्यया वक्ष्यामि ॥ उक्तस्यापि परमेश्वरतत्त्वस्य पुनर्वचने दुर्विज्ञेयत्वं हेतुमाह ॥ नमेति ॥ मे मम प्रभवं प्रभुशक्त्यातिशयं

॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥ ३४ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे राजविद्याराजयोगो नाम नवमोऽध्यायः ॥ ९ ॥ श्रीभगवानुवाच ॥ भूयएव महाबाहो शृणु मे परमं वचः ॥ यत्तेऽहं प्रीयमाणाय वक्ष्या
मि हितकाम्यया ॥ १ ॥ नमे विदुः सुरगणाः प्रभवं न महर्षयः ॥ अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरं ॥ असंमू
ढः स मर्त्येषु सर्वपापैः प्रमुच्यते ॥ ३ ॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवोऽभावो भयं चाभयमेव च ॥ ४ ॥ राम राम राम राम राम राम ॥

प्रभावं उत्पत्तिं वा ॥ सुरगणाः न विदुः महर्षयोऽप्यादयो न विदुः ॥ हि यस्मात् अहं सर्वशः सर्वप्रकारैः देवानां महर्षीणां च आदिः कारणं उत्पादि हेतुः ॥ २ ॥ एवंभूत
तत्त्वज्ञाने फलमाह ॥ योमामिति ॥ यः मां अजं अनादिं च पुनः लोकमहेश्वरं तुरीयाव ... संसारतत्कारणं हेतुं ... भूतानामीशं विद्याद्धयाहिते मां वेत्ति
स मर्त्येषु असंमूढः संमोहेन वर्जितः सर्वपापैः ... बुद्धिः सर्वा बुद्धिः सर्वबन्धनैः प्रमुच्यते ॥ ३ ॥ सर्वलोकमहेश्वरत्वे कारणमाह ॥ बुद्धिरिति ॥ बुद्धिः अन्तः
करणस्य सूक्ष्माद्यर्थप्रकाशनसामर्थ्यं ॥ ज्ञानं आत्मादिपदार्थानां अवबोधः असंमोहः बोधव्येषु विषयेषु विवेकपूर्विका प्रवृत्तिः ॥ क्षमा ... ॥ सत्यं यथार्थ
स्यतालिंगस्य वाक्यविहितं ... यथा श्रुतस्य यथा दृष्टस्य वा ... परत्वे ... धनार्थं उच्चार्यमाणं वचनं सत्यं ॥ बाह्येंद्रियनिग्रहो दमः
अंतःकरणस्य निग्रहः शमः ॥ चित्ताह्लादः सुखं ... परितापः दुःखं भवः उत्पत्तिः अभावः अनुत्पत्तिः अभावः ... भयं त्रासः अभयं ... ॥ ४ ॥ रामराम

भावः नाशः

एवंकुर्वतःयत्फलंभवतितदाह॥ शुभाशुभेति॥ एवंमयिसर्पणंकुर्वन्शुभाशुभफलैः सुखदुःखप्रदैः कर्म्मभिर्बंधनैः मोक्ष्यसेसंन्या
सयोगयुक्तात्माअयंकर्म्मयोगः मयिकर्म्मसमर्पणात्संन्यासःकर्त्तृत्वा...योगस्तेनसंन्यासयोगेनयुक्तांतःकरणःसन्कर्म्मबंधनैर्जीवन्नेव
विमुक्तःपतितेशरीरेमामुपैष्यसिप्राप्स्यसि॥२८॥ नर्हिरागद्वेषवान्भगवान्यतोभक्तानेवानुगृह्णातिनेतरानित्येवात्॥ समोहमिति॥ अहंस
र्वभूतेषुसमःस्वकान्यत्कर्मसुसमःतुल्यः अतोममपरकीयोनद्वेष्यः स्वकीयोनप्रियः अपयात्मनिग्निरभिमानरहितःसमीपंतपसमर्प्यतांत्रीत
अपनयति॥ नद्वरतोरेषांतथा॥ अहंनजानअनुग्र...हानिनेतरान्॥ तुपुनःयेमांभजंतितेमय्येवज्ञानावतएववर्त्ततेतेनममरागनिमित्तंतेषु
कर्माह्यवज्ञानावतएववर्त्तेनिरतरेषु॥ नतत्रममरागद्वेषौ॥२९॥ ...ननन्यभक्तेःमहात्म्यंदर्शयति॥ अपिचेदिति॥ अपिचेत्यःसुदुराचारोभजन

ते ते
॥ शुभाशुभफलैरेवंमोक्ष्यसेकर्म्मबंधनैः॥ संन्यासयोगयुक्तात्माविमुक्तोमामुपैष्यसि॥२८॥ समोहंसर्व्वभूतेषुनमेद्वेष्योस्तिनप्रियः॥ ये
भजंतितुमांभक्त्यामयितेषुचाप्यहं॥२९॥ अपिचेत्सुदुराचारोभजतेमामनन्यभाक्॥ साधुरेवसमंतव्यःसम्यग्व्यवसितोहिसः॥३०॥ क्षि
मार प्रंभवतिधर्म्मात्माशश्वच्छांतिंनिगच्छति॥ कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति॥३१॥ मांहिपार्थव्यपाश्रित्ययेपिस्युःपापयोनयः॥
स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं॥३२॥ किंपुनर्ब्राह्मणाःपुण्याभक्ताराजर्षयस्तथा॥ अनित्यमसुखंलोकमिमंप्राप्यभजस्वमां॥३३

न्यभाक्मांभजते॥ ससाधुरेवमंतव्यःहियस्मात्सम्यक्व्यवसितःसम्यकनिश्चयंकृतवान्॥३०॥ ननुकथंममीचीनाध्यवसायमात्रे
णदुराचारःसाधुर्भवतीत्याह॥ क्षिप्रमितिक्षिप्रंशीघ्रंधर्म्मात्माधर्म्मचित्तोभवति॥ शाश्वतनित्यंशांतिंउपशमनंनिगच्छतिप्राप्नोति॥
१२म हेकौंतेयप्रतिजानीहि॥ एतत्त्वंकृष्णमद्भक्तःमयिसमर्पितात्मानप्रणश्यति॥ नाशंनप्राप्नोति॥३१॥ मद्भक्तिःपवित्रीकरोतिकिंअत्रकिंचित्रंयतो
मद्भक्तिःदुःकुलानन्यधिकारिणोपिसंसारान्मोचयतीत्याह॥ मांहीति॥ हियस्मात्हेपार्थयेपिस्त्रियःवैश्यास्तथाशूद्राःपापायोनयःपा
पात्मानःस्युःतेपिमांव्यपाश्रित्यममाश्रयंगृहीत्वापरांप्रकृष्टांगतियांति॥३२॥ सदाएवंदुःकुलाअनधिकारिणोपिमद्भक्ताःपरांगतिंगच्छंति॥त
त्रसदाचाराःसत्कुलाश्चपरांगतियांतीतिकीवक्तव्यं॥ इत्याह॥ किंपुनरिति॥ येपुण्याःअपापयोनयःब्राह्मणास्तथाभक्ताराजर्षयःक्षत्रि
यवरास्तेषां॥ किंपुनर्वक्तव्यंअतोनित्यंक्षणभंगुरंअसुखंसुखवर्जितंइमंमनुष्यलोकंपुरुषार्थसाधनेदुर्ल्लभंमनुष्यत्वंलब्ध्वामांभजस्व ॥३०॥
मत्सेवांकुरु॥३३॥

येपुनर्निःकामाः सम्यग्दर्शिनः तेमत्प्रसादात् कृतार्था भवंतीत्याह ॥ अनन्याइति ॥ येजनाः अनन्याः अपृथग्भूताः परं देवं नारायणं आत्मत्वेन गताः सं
तः मां चिंतयंतः पर्युपासते ॥ अहं तेषां परमार्थदर्शिनां सततं नित्ययोगिनां योगक्षेमं ॥ योगः अप्राप्तस्य प्रापणं क्षेमस्तद्रक्षणं तदुभयं वहामि प्रापयामि ॥२२
ननु अन्या अपि देवता त्वमेव चेत् तर्हि केन वस्त्वंतरस्याभावात् ॥ अन्तस्तेषां भक्ताः त्वामेव यजंत इति ॥ कथं गतागतं लभंत इत्याशंक्य भगवानुक्त
ने समानेपि अज्ञानकृतं तेषां गतागतमित्याह ॥ येप्यन्येति ॥ हे कौंतेय येपि अन्यदेवताभक्ताः अन्यासु भक्ताः अन्यासु भक्ताः ॥ श्रद्धया आस्तिक्यबुद्ध्यान्विताः देवता
यजंते ॥ तेपि अविधिपूर्वकं अज्ञानपूर्वकं ॥ मामेव यजंते ॥ अहमेव सर्वदेवता इति जानंति ॥२३॥ कथं पुनः अन्यदेवताभक्ता अज्ञानपूर्वकं यजंत इत्य
त्रेतुमाह ॥ अहं हीति ॥ हि यस्मात् अहं सर्वस्य यज्ञानां श्रौतानां स्मार्तानां देवतास्वरूपेण अहमेव भोक्ता ॥ न पुनः यज्ञानां प्रभुः स्वामी अहं तु पुनः तेमां

अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥२२॥ येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ॥ तेपि मामेव कौं
तेय यजंत्यविधिपूर्वकं ॥२३॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥२४॥ यांति देवव्रता देवान् पितॄ
न्यांति पितृव्रताः ॥ भूतानि यांति भूतेज्या यांति मद्याजिनोपि मां ॥२५॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्ना
मि प्रयतात्मनः ॥२६॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं ॥२७॥ राम राम राम राम रामराम राम

तत्त्वेन याथात्म्येन न जानंति ॥ अतः कारणात् अज्ञानपूर्वं इष्ट्वा यज्ञफलात् च्यवंते ॥२४॥ येपि अन्यदेवताभक्ताः तेषामपि यज्ञफलं अवश्यं भवतीत्याह ॥
य यांतीति ॥ देवव्रताः देवेषु नियम इज्यादिरूपो येषां ते देवान् यांति प्राप्नुवंति ॥ पितृव्रताः श्राद्धादिक्रियापराः पितृभक्ताः पितॄन् अग्निष्वात्तादीन् यांति प्रा
प्नुवंति ॥ भूतेज्याः भूतानि विनायकमातृगणचतुर्भगिन्यादीन् पूजकाः ॥ ते भूतानि यांति प्राप्नुवंति ॥ मद्याजिनो मद्भक्ताः तु स्वेपि आयासे मां परमा
नंदरूपं यांति प्राप्नुवंति ॥२५॥ न केवलं मद्भक्तानां अनावृत्तिलक्षणं अनंतफलं सुखाराधनश्चाहं ॥ कथमित्याह ॥ पत्रं पुष्पमिति ॥ यः मे मह्यं पत्रं पुष्पं
फलं तोयं भक्त्या प्रयच्छति ॥ अहं तत्पत्रादिकं सर्वं भक्त्युपहृतं भक्त्या सर्वकं उपढौकितं प्रयतात्मनः ॥ शुद्धबुद्धेः अश्नामि गृह्णामि ॥२६॥ यत एवं
अतः सर्वं मदर्पणं कुरु ॥ इत्याह ॥ यत्करोषीति ॥ हे कौंतेय यत्करोषि ॥ यत्स्वेच्छयाचरसि स्वतः प्राप्तं अन्नं वा यत् अश्नासि ॥ यज्जुहोषि
हवनं करोषि श्रौते स्मार्ते वा ॥ यत् ब्राह्मणेभ्यो हिरण्यादि ददासि ॥ यत्तपश्चरसि तत्सर्वं मयि समर्पणं कुरु ॥२७॥ राम राम राम राम राम राम राम

॥२९॥ किंच ॥ पितेति ॥ अस्य जगतः पिता माता धाता प्राणिभ्यः कर्म्मफलस्य स्रष्टा पितामहः ॥ वेद्यं ज्ञातव्यं पवित्रं ॐकारः ऋक् साम यजुरेव चाहं ॥१७॥ किंच ॥ ग
तिरिति ॥ गतिः कर्म्मफलं भर्त्ता पोषकः प्रभुः स्वामी प्राणिनां कृताकृतस्य साक्षी निवसंति यस्मिन् प्राणिनः स आर्त्तानां प्रपन्नानां आर्त्तिहृत् शरणं सुहृ
त् प्रत्युपकारनिरपेक्षः सन् उपकारी प्रभवः उत्पत्तिर्जगतः प्रलीयते यस्मिन् विश्वमिति प्रलयः तिष्ठत्यस्मिन्निति स्थानं ॥ निधानं निक्षेपः का
लांतरोपभोग्यं प्राणिनां बीजं प्ररोहकारणं ॥ प्ररोहधर्म्मिणां अव्ययं यावत् ॥ संसारभावित्वात् अव्ययं बीजमित्यर्थः ॥१८॥ किंच ॥ तपाम्यहमि
ति ॥ अहं आदित्यो भूत्वा कैश्चित् रश्मिभिः तपामि ॥ कैश्चित् रश्मिभिः अहं वर्षं उत्सृजामि ॥ वर्षं उत्सृज्य पुनः अष्टभिर्मासैः कैश्चित्
रश्मिभिः वर्षं निगृह्णामि मासचतुष्टयेन प्रावृषि कैश्चित् रश्मिभिः पुनः वर्षं उत्सृजामि ॥ अमृतं देवानां मृत्युर्मर्त्यानां सत् विद्यमानं असत्

दृम

॥ पिताहमस्य जगतो माता धाता पितामहः ॥ वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥१७॥ गतिर्भर्त्ता प्रभुः साक्षी निवासः शरणं सुहृत् ॥ प्रभ
वः प्रलयः स्थानं निधानं बीजमव्ययं ॥१८॥ तपाम्यहं वर्षं निगृह्णाम्युत्सृजामि च ॥ अमृतं चैव मृत्युश्च सदसच्चा[redacted]हमर्जुन ॥१९॥
त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ॥ ते पुण्यमासाद्य सुरेंद्रलोकमश्नंति दिव्यान्दिवि देवभोगान् ॥२०॥ ते तं भुक्त्वा स्व
र्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति ॥ एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं कामकामा लभंते ॥२१॥ रामरामरामरामरामरामराम

सत् अविद्यमानं अथवा सत्कारणं असत्कार्यं अहं ॥१९॥ ये त्वपेक्षवंतो निवृत्तिप्रकारैः एकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्मां उपासते ते यथा विज्ञानं मामेव रुपं
प्राप्नुवंति ॥ ये पुनः अज्ञाः कामकामास्ते संसारमेवानुवर्त्तंते इत्याह ॥ त्रैविद्येति ॥ त्रयीधर्म्मं केवलं वैदिकं कर्म्म आश्रिताः त्रैविद्याः सोमपाः सोमपायि
नः पूतपापाः शुद्धकिल्बिषाः तेनैव सोमपायेन शुद्धकिल्बिषाः यज्ञैः अग्निष्टोमादिभिः मां विष्ण्वादिरूपिणं इष्ट्वा पूजयित्वा स्वर्गगमनं प्रा
र्थयंते ॥ ते पुण्यं पुण्यफलं सुरेंद्रलोकं शतक्रतोः स्थानं आसाद्य संप्राप्य दिवि स्वर्गे दिव्यान् अप्राकृतान् भोगान् अश्नंति भुंजते ॥२०॥ किंच ॥ ते
तमिति ॥ सोमपाः तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे मर्त्यलोकं विशंति ॥ एवं यथोक्तप्रकारेण त्रयीधर्म्मं केवलं वैदिकं कर्म्म अनुप्रपन्नाः
आश्रिताः कामकामाः कामान् कामयंत इति कामकामाः गतागतं गमनागमनं लभंते न तु स्वातंत्र्यं मोक्षं लभंत इत्यर्थः ॥२१॥ रामरामराम ॥२९॥

एवंभूतं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वजंतूनामात्मानमपि संतं केचित् दुरात्मानो नाद्रियंते इत्याह ॥ अवजानंतीति ॥ मूढाः अविवेकिनः मम भूतमहेश्व
रं सर्वभूतानां महांतमीश्वरं परं भावं परमार्थतत्त्वं अजानंतः मां मानुषीं तनुं मनुष्यदेहं आश्रितं अवजानंति अवज्ञां कुर्वंति ॥११॥ कुतो नाद्रियंते इत्या
ह ॥ मोघाशा इति ॥ अत एव मोघाशाः वृथाभिलाषाः मां परमेश्वरं विहाय अन्यदेवताश्रयाः कर्माणि येषां ते ॥ अत एव फलदातुः मम अवज्ञानात् मोघकर्मा
णः अत एव मोघज्ञानाः विचेतसः विगतविवेकाः राक्षसीं राक्षसानां आसुरीं असुराणां च मोहिनीं मोहनकरीं प्रकृतिं स्वभावं देहात्मभावं आश्रिताः मामव
जानंति अवज्ञां कुर्वंति ॥१२॥ ये पुनः श्रद्दधानाः भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः आद्रियंते इत्याह ॥ महात्मान इति ॥ हे पार्थ ये पुनः महात्मानः
अक्षुद्रचित्ताः दैवीं प्रकृतिं दैवीं सात्त्विकीं प्रकृतिं आश्रिताः अनन्यमनसः मत्तः भूतादिं भूतानां आदिं कारणं अव्ययं अविना आकारणादिं

॥ अवजानंति मां मूढा मानुषीं तनुमाश्रितं। परं भावमजानंतो मम भूतमहेश्वरं ॥११॥ मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः। राक्षसीमासुरीं
चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥ महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं ॥१३॥ सततं कीर्तयंतो मां य
तंतश्च दृढव्रताः। नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥ ज्ञानयज्ञेन चाप्यन्ये यजंतो मामुपासते। एकत्वेन पृथक्त्वेन बहुधा विश्वतोमु
खं ॥१५॥ अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं। मंत्रोहमहमेवाज्यमहमग्निरहं हुतं ॥१६॥ राम राम राम राम राम राम राम राम राम राम राम राम राम

व्ययं मां ज्ञात्वा भजंति ॥१३॥ तेषां भजनप्रकारमाह ॥ सततमिति ॥ मां सततं कीर्तयंतः च अन्ये यतंतः इंद्रियनिग्रहशमदमेषु अहिंसादिधर्मेषु यतंतः यत्नं २
कुर्वंतः दृढव्रताः दृढं स्थिरं व्रतं येषां ते दृढव्रताः ॥ च पुनः मां नमस्यंतः भक्त्या नित्ययुक्ताः मां हृदयेशयं आत्मानं उपासते सेवंते ॥१४॥ किं
च ज्ञानेति ॥ च पुनः अन्ये अपि ज्ञानयज्ञेन ज्ञानमेव यज्ञः भगवद्विषयं यज्ञस्तेन ज्ञानयज्ञेन मां पूजयंतः अन्यां उपासनां परित्यज्य मामेव ईश्वरं सेवंते त
त्र ज्ञानेन एकत्वेन एकमेव परं ब्रह्मेति परमार्थदर्शिनेन उपासते ॥ केचित् पृथक्त्वेन ॥ आदित्यचंद्रादिभेदेन स एव भगवान् विष्णुरेव स्थितः ॥ स एव
भगवान् सर्वतोमुखो विश्वरूप इति ॥ तं विश्वरूपं सर्वतोमुखं बहुप्रकारेण उपासते ॥१५॥ कथं त्वामेव उपासते इत्यत आह ॥ अहमिति ॥ क्रतुः श्रौ
तकर्म अहं यज्ञः स्मार्तः पंचमहायज्ञादिकं कर्म अहं ॥ स्वधेति ॥ साधारणं अन्नं स्वधा अन्नं पितृभ्यो दीयमानं अहं औषधं सर्वप्राणिभिः अद्यमानं अन्नं
अहं अथवा औषधं व्याधिउपशमनं भेषजं मंत्रः देवपितृहविर्दाने साधनभूतः आज्यं हविः अहं हुतं हविः प्रक्षेपः चलनरूपं कर्मचेष्टादिकं अहं ॥१६॥

धु माला

एवं ज्ञानस्तुत्या अर्जुनं अभिमुखीकृत्य तदेव ज्ञानमाह ॥ मयेति ॥ इदं सर्वं जगत् अव्यक्तमूर्तिना अतीन्द्रियाकारेण स्वरूपेण मया परमात्मस्वरूपेण ततं व्याप्तम् अतः सर्वाणि भूतानि ब्रह्मादिस्थावरान्तानि मत्स्थानि मयि स्थितानि न पुनः अहं निरवयवत्वात् असंगत्वात् च तेषु संश्लेषरूपेण क्वचिदवस्थितः ॥४॥ असंगत्वादेव च आत्मनः मत्स्थानि त्वमपि कस्यानिकमेवेत्याह ॥ न चेति ॥ न च पुनः मत्स्थानि भूतानि असत एव असंगत्वात् न मयि स्थितानि मे मम ऐश्वर्यं योगं यात्म्यं नो यथात्म्यं पश्य ॥ मम आत्मा भूतभावनः तत्र असंगोपि भूतानि धारयति ॥ असंगत्वात् न भूतस्थः भूतभावनः भूतानां उत्पादयिता ॥५॥ श्लोकद्वयेनोक्तेर्यं दृष्टान्तेनोपपादयन्नाह ॥ यथेति ॥ यथा महान् सर्वत्र परिमाणः सर्वत्रगो वायुः नित्यं सर्वदा आकाशे असंश्लेषेणाकाशे स्थितः तथा सर्वाणि भूतानि मत्स्थानि मयि स्थितानि मा असंश्लेषेण इति उपधारय जानीहि ॥६॥ तदेवं असंगस्यैव यया योगमायया स्थितिहेतुत्वं एवं सृष्टिहेतुत्वमपीत्याह ॥ सर्वभूतानीति ॥

॥ मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ॥ मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥ न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं ॥ भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥५॥ यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ॥ तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६॥ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकां ॥ कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहं ॥७॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ॥ भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥८॥ न च मां तानि कर्माणि निबध्नंति धनंजय ॥ उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९॥ मयाध्यक्षेण प्रकृतिः सूयते सचराचरं ॥ हेतुनानेन कौंतेय जगद्विपरिवर्तते ॥१०॥

हे कौन्तेय कल्पक्षये सर्वभूतानि ब्रह्मादिस्थावरान्तानि मामिकां मदीयां त्रिगुणात्मिकां अपरां प्रकृतिं यान्ति ॥ कल्पादौ पुनः तानि अहं विसृजामि ॥७॥ ननु असंगस्य निर्विकारस्य तव कथं सृष्ट्यादिहेतुत्वं इत्यपेक्षायामाह ॥ प्रकृतिमिति ॥ इमं कृत्स्नं भूतग्रामं भूतसमुदायं प्रकृतेर्वशात् स्वभाववशात् अवशं अस्वतंत्रं एवं अविद्यालक्षणां त्रिगुणात्मिकां स्वां प्रकृतिं अवष्टभ्य आश्रित्य पुनः विसृजामि उत्पादयामि ॥८॥ ननु एवं विषमं भूतग्रामं विदधतः तन्निमित्तधर्माधर्मसंबंधः स्यात् इत्यत आह ॥ न चेति ॥ हे धनंजय ॥ न पुनः तानि विषमसृष्ट्यादिहेतूनि कर्माणि मां न बध्नंति ॥ तेषु कर्मसु असक्तं फलापेक्षारहितं उदासीनवत् आसीनं कर्तृत्वाभिमानरहितं ॥९॥ तत्र भूतग्रामं सृजतो मे उदासीनवत् आसीनं इति च विरुद्धं इत्याशंक्य तं विरोधं परिहरन्नाह ॥ हे कौंतेय प्रकृतिः त्रिगुणात्मिका अविद्या मया चैतन्यरूपेण अविक्रियेण अध्यक्षेण साक्षिणा सचराचरं जगत्सूयते उत्पाद्यते ॥ अनेन अध्यक्षत्वेन निमित्तेन सचराचरं जगत् विपरिवर्तते पुनः पुनः जायते ॥१०॥

ऽपेक्षः आप्यते गुरुद्वत्नैर्निश्चितमेव मनव येनु तदैश्वर्यमलाश्चर्यं प्रपंचते १

मार्गस्य ज्ञानफलं दर्शयन्नुक्तयोगमुपसंहरति ॥ नैते इति ॥ हे पार्थ एते मार्गौ सृती मार्गौ एकः मोक्षाय अपरः संसाराय इति जानन् कश्चि-
दपि योगी न मुह्यति । हे अर्जुन तस्मात् सर्वेषु कालेषु सदा योगयुक्तः आत्मनि समाहितो भव ॥ २७ ॥ अध्यायार्थं उक्तमप्रश्नार्थनिर्णये च योगं च सफलं नुप-
संहरति ॥ वेदेष्विति ॥ वेदेषु सम्यक् अधीतेषु यज्ञेषु तथा सम्यगनुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यक् च यत्पुण्यफलं प्रदिष्टं भवति ॥ योगी तत्सर्वमिदं
विदित्वा उत्तरमार्गस्वरूपं समस्तप्रश्ननिर्णयद्वारेण विदित्वा अत्येति अनुष्ठाय अत्येति अतिक्रामति । च पुनः परं प्रकृष्टं ऐश्वरं स्थानं आद्यं आदौ भवं कारणं ब्रह्मरू-
पैतिः प्रतिपद्यते ॥ २८ ॥ इति श्रीअष्टमोऽध्यायः ॥ ८ ॥ अष्टमे नाडीद्वारेण धारणया मूर्धन्यया स्वमनमुक्तं ॥ तस्य च अग्निर्ज्योतिरादिमार्गेण ब्रह्मलोकं गत्वा कालां-
तरे परब्रह्मप्राप्तिलक्षणा ... नवमे ... मुक्तिसाधनं नित्यं निर्गुणब्रह्मस्वरूपं भगवान् उपदिशति ॥ इदं त्विति ॥ तु

॥ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन ॥ तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७ ॥ वेदेषु यज्ञेषु तपःसु चैव दानेषु यत्पुण्यफलं प्रदिष्टं ॥ अत्ये-
ति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं ॥ २८ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषयोगो
नामाष्टमोऽध्यायः ॥ ८ ॥ श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १ ॥ राजविद्या राज-
गुह्यं पवित्रमिदमुत्तमं ॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं ॥ २ ॥ अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ॥ अप्राप्य मां निवर्तन्ते मृत्युसं-
सारवर्त्मनि ॥ ३ ॥

पुनः इदं सर्वं कथयिष्यमाणं गुह्यतमं गोप्यतमं ज्ञानं अनसूयवे असूयारहिताय ते तुभ्यं प्रवक्ष्यामि । विज्ञानसहितं ब्रह्मविषयसाक्षात्कारसहितं ब्रह्मज्ञानं अनुभवसहितं तते
तुभ्यं अनसूयवे असूयारहिताय प्रवक्ष्यामि ॥ कथयिष्यामि यत् अनुभवसहितं ज्ञानं ज्ञात्वा अशुभात् संसारबंधनात् मोक्ष्यसे ॥ १ ॥ तु राज्ञ-
स्तिपतेः नत ज्ञानं गततेविशेषमाह ॥ राजविद्येति ॥ इदं ज्ञानं किं लक्षणं राजविद्या विद्यानां राजा श्रेष्ठविद्या ज्ञानं ॥ गुह्यानां गोप्यानां राजा राजगुह्यं
पावनानामपि पावनं उत्तमं पवित्रं प्रत्यक्षेण सुखादिवत् ज्ञातुं शक्यं ॥ धर्म्यादनपेतं धर्म्यं कर्तुं सुसुखं सुखेन संपाद्यं अविनाशिफलत्वात् अव्य-
यं ॥ २ ॥ अत्यक्तसमपि सुलभमपि एतत् ज्ञानं येन प्राप्नुवंति तानाह ॥ अश्रद्दधाना इति ॥ हे परंतप अस्य ज्ञानधर्मस्य स्वरूपे फले च अश्रद्दधाना अश्र-
द्धारहिताः पुरुषाः मां अप्राप्य मन्मार्गमपि अप्राप्य मृत्युसंसारवर्त्मनि मृत्युयुक्तः संसारः तस्य वर्त्म मार्गः नरकादिः तस्मिन् निवर्तंते आ-
वर्तंते ॥ ३ ॥

पवित्रं उत्तमं पावनानामपि

अमलविद्यायया

गी॰ता॰स॰ अविनाशित्वप्रमाणं दर्शयन्नाह ॥ अव्यक्त इति ॥ योसौ अव्यक्तः अक्षर इत्युक्तः तमेव संप्रलयं परां प्रकृष्टां गतिमाहुः ॥ यं प्राप्य संसारायतन निवर्त्तन्ते ॥ तद्धाम स्थानं
॥२१॥ परमं मम विष्णोः पदं ॥२१॥ तस्य प्राप्त्युपायमाह ॥ पुरुष इति ॥ स तु पुनः सपरः निरतिशयः पुरुषः सर्वं अनन्यया तत्त्वज्ञानलक्षणया भक्त्या लभ्यः यस्य कारणभूतस्यान्तः
तस्यान्तर्मध्ये स्थितानि भूतानि कार्यभूतानि मृदि घटशरावादयः येन सर्वमिदं जगद्व्याप्तं यथा मृदा घटशरावादि कार्यं व्याप्यते ॥२२॥ अर्चिरादिमार्गेण ब्रह्मोपास
काः क्रमेण कालान्तरे मुक्ता नावर्त्तन्ते ॥ तेषां ब्रह्मलोकप्रत्यागमनावृत्तिरुक्ता मार्गो वक्तव्यः ॥ ततस्तत्स्तुत्यर्थं इतरेषां केवलकर्मिणां पुनरावृत्तियुक्तो दक्षिण
मार्गो वक्तव्य इति मार्गद्वयं वक्तुं प्रतिज्ञां करोति ॥ यत्र काल इति ॥ हे भरतर्षभ तु पुनः योगिनः सगुणब्रह्मोपासकाः कर्मिणश्च यत्र काले प्रयाताः मृताः ॥ना वृत्तिं
अपुनरावृत्तिं यान्ति यत्र काले मृताः पुनरावृत्तिं च प्राप्नुवन्ति तं कालं क्रमेण वक्ष्यामि ॥२३॥ किं च तं कालमाह ॥ अग्निरिति ॥ अग्निर्देवत्या अग्निदेवताप्रा
प्यते ज्योतिर्देवता ततो अहर्देवता प्राप्य शुक्लपक्षदेवता ततो उत्तरायणदेवता तदनन्तरं शुक्लकृष्णवशिष्टा ब्रह्मदेवता क्रमेण प्राप्य तस्यायावि

॥ अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं ॥ यं प्राप्य न निवर्त्तन्ते तद्धाम परमं मम ॥२१॥ पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥ यस्यान्तः
स्थानि भूतानि येन सर्वमिदं ततं ॥२२॥ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ॥ प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥२३॥ अग्निर्ज्योति
रहः शुक्लः षण्मासा उत्तरायणं ॥ तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥२४॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं ॥ तत्र चान्द्र
मसं ज्योतिर्योगी प्राप्य निवर्त्तते ॥२५॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ॥ एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः ॥२६॥ [illegible]

॥ अहर्देवतां यां प्राप्यायात अमानवः पुरुषः तान् नीत्वा हिरण्यगर्भलोके नयति ॥ ततः ते ब्रह्मणा सह मुच्यन्ते न पुनरावर्त्तन्ते ॥ अयं चतुर्दशपर्वा उत्तरोमा
धा र्गः ॥२४॥ दक्षिणमार्गमावृत्तिमार्गमाह ॥ धूम इति ॥ तं योगी कर्मयोगी केवलकर्मी ॥ इदं शरीरं त्यक्त्वा धूमाभिमानिनीं देवतां प्राप्य ॥ ततः रात्र्यभिमानि
देवतां प्राप्य नीं ततः कृष्णपक्षदेवतां ततः षण्मासदेवतां ततः चान्द्रमसं देवतां क्रमेण प्राप्य चन्द्रलोकं गत्वा तत्र कर्मफलं भोगान् भुक्त्वा तस्य कर्म
णः क्षये पर्यन्त दृष्ट्वा पुरुषयोषित क्रमेण पुनरावर्त्तते ॥२५॥ उक्तौ दक्षिणोत्तरमार्गावुपसंहरति ॥ शुक्लकृष्णे इति ॥ निश्चितं एते शुक्लकृष्णे ते ज्ञानप्रका
एक शयुक्तत्वात् शुक्ला तद्रूपत्वात् कृष्णा एते जगतः ज्ञानकर्मणोः अधिकृतानां न सर्वस्य जगतः गती मार्गौ शाश्वते नित्ये ब्रह्म ॥२१॥
ज्ञानपर्यन्ते जगतो नित्यत्वात् अविनाशि मोमते [illegible] एकया शुक्लया अनावृत्तिं याति अन्यया कृष्णया पुनरावर्त्तते ॥२६॥

प्राप्य लिमानिनीं प्राप्य ततः ... देवतां प्राप्य

॥ नाग्नेव मौनत्वेन न यद्भवति तद्दात ॥ मामुपेत्येति ॥ महात्मानो यतन्तः परमां प्रकृष्टां संसिद्धिं मोक्षाख्यां गताः प्राप्ताः ॥ मामीश्वरं उपेत्य मद्भावं प्राप्य ॥ दुःखा
लयमशाश्वतं स्वकारीनेत्यात्मयं आश्रयं अशाश्वतं अनित्यं जन्म कदापि ते पुनर्नाप्नुवन्ति ॥१५॥ सर्वेषु कालेषु पुनरावृत्तिर्न स्यात् न चेकमर्थ इत्यपेति ॥
आब्रह्मलोकेति ॥ हे अर्जुन सर्वे लोकाः आब्रह्मभुवनात् सह ब्रह्मभुवनेन पुनरावर्तनस्वभावाः ॥ तु पुनः हे कौन्तेय मामेकं उपेत्य प्राप्य पुनर्ज
न्म पुनरुत्पत्तिर्न विद्यते ॥१६॥ ब्रह्मलोकपर्यन्तानां कालपरिच्छिन्नत्वात् तत्र गता आवर्तन्ते ॥ मम तु स्वरूपस्य कालासंबद्धत्वात् तत्र गता नावर्त
न्त इति विशेषं दर्शयितुं ब्रह्मणः अहोरात्रयोः प्रमाणमाह ॥ सहस्रेति ॥ यत् ब्रह्मणः प्रजापतेः विराजः सहस्रयुगपर्यन्तं ॥ सहस्रयुगानि पर्यन्तं पर्य
वसानं यस्य तदहः तत्स्वरूपं सहस्रयुगपर्यन्तं ये विदुः ते जनाः अहोरात्रविदः अतः ब्रह्मणोपि कालपरिच्छिन्नत्वात् पुनरावृत्तिरस्ति ॥१७॥ रात्रिमपि

॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं ॥ नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥१५॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनो ऽर्जुन ॥ मामुपेत्य तु कौं तु
दृ २ न्तेय पुनर्जन्म न विद्यते ॥१६॥ सहस्रयुगपर्यन्तमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रान्तां ते ऽहोरात्रविदो जनाः ॥१७॥ अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्य
हरागमे ॥ रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ॥१८॥ भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥
॥१९॥ परस्तस्मात्तु भावो ऽन्यो ऽव्यक्तो ऽव्यक्तात्सनातनः ॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥२०॥ रामरामरामरामरामराम रामराम॥

तावत्प्रमाणामिति प्रजापतेः अहो निरात्रो च यद्भवति तदुच्यते ॥ अव्यक्तादिति ॥ सर्वा व्यक्तयः स्थावरजंगमलक्षणाः प्रजाः अहरागमे ब्रह्मणः दिना
दौ अव्यक्तात् अव्याकृतात् ब्रह्मणः सुषुप्त्यवस्थारूपात् प्रभवन्ति ॥ तथा रात्र्यागमे ब्रह्मणः स्वापकाले तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके प्रलीयन्ते ॥
श्री प्रभवन्ति ॥१८॥ अविद्यादिक्लेशमूलकर्मवशात् अवशः तस्यावशः भूतग्रामः भूत्वा भूत्वा प्रलीयत इति तथा अहनो आगमनकाले विप्राणां वात्र
संगवारयन् संसारवैराग्यं प्रदर्शनाय स एव प्रजायते वा स्वप्नविच्छेदमाह ॥ भूतग्राम इति ॥ हे पार्थ स एवायं भूतग्रामः भूतसंघातः स्थावरजंगमलक्ष
लयं प्राप्नोति णः भूत्वा भूत्वा रात्र्यागमे ऽवशः अस्वतंत्रः प्रलीयते अहरागमे पुनः प्रभवति ॥१९॥ सर्वे ब्रह्मणः ते नित्यकालमित्यादिना संसारस्वरूपं प्रदर्शितं इदा
नीं तस्य स्वरूपमाह ॥ लोकानामनित्यत्वं प्रदर्श्य स्वरूपस्य नित्यत्वं प्रदर्शयति ॥ परस्तस्मादिति ॥ तु पुनः तस्मात् पूर्वोक्तादव्यक्तात्परः श्रेष्ठः
सनातनः चिरंतनः अव्यक्तो ऽतीन्द्रियगोचरः भावोऽन्यः ब्रह्माख्योऽव्यक्ताद्भिन्नलक्षणः यः स सर्वेषु ब्रह्मादिस्थावरान्तेषु नश्यत्सु न विनश्यति ॥२०॥

पुरु याऽभिचारिणा

परमपुरुषार्थप्राप्तिनिमित्तं तत्त्वभावनाया प्रकारविशेषमाह ॥ प्रयाणकालेति ॥ किंच ॥ सज्ञानीयोगी न कंपमानं यन्न त्वायुक्तः प्रयाणकाले मरणका
ले अचलेन चलनवर्जितेन अन्यविषयवर्जितेन मनसा ॥ च पुनः योगबलेन युक्तः योगः समाधिः तस्य बलं तज्जनितसंस्कारजन्यं चित्तस्थैर्यलक्षणं
योगबलं तेन युक्तः भ्रुवोर्मध्ये प्राणमावेश्य पूर्वं हृत्पुंडरीके चित्तं वशीकृत्य ततः ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणवायुमावेश्य
स्थापयित्वा सम्यक् अप्रमत्तः सन् कविं पुराणमित्यादिलक्षणं दिव्यं परं पुरुषं उपैति प्राप्नोति ॥१०॥ पुनरपि वक्ष्यमाणेनोपायेन प्राप्तिमिति तस्य ब्रह्म इ॰ सि
णो विशेषणांतरविशिष्टं स्वरूपं निरूपयति ॥ यदक्षरमिति ॥ वेदविदः वेदार्थज्ञाः यत्ब्रह्म अक्षरं अविनाशि वदंति ॥ विगतरागाः संन्यासिनो यतयः ॥ यत्अक्षरं
विशंति ॥ यद्ब्रह्म अक्षरं ज्ञातुं इच्छंतः गुरौ ब्रह्मचर्यं चरंति ॥ तत् अक्षरं पदं प्राप्यं ते तुभ्यं संग्रहेण संक्षेपेण प्रवक्ष्ये ॥११॥ इदानीं मंदमध्यमबुद्धीनां क

॥ प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव ॥ भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं ॥१०॥ यदक्षरं वेदविदो व
दंति विशंति यद्यतयो वीतरागाः ॥ यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥११॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ॥ मूर्ध्न्या
धायात्मनः प्राणमास्थितो योगधारणां ॥१२॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ यः प्रयाति त्यजन्देहं स याति परमां गतिं ॥१३॥ अनन्यचेताः
सततं यो मां स्मरति नित्यशः ॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥१४॥

विं पुराणं यदक्षरमित्यादिना सर्वोक्तं परं ब्रह्म प्रतिपत्तुमशक्तानां सुखेन तत्प्राप्तिसाधनत्वेनोक्तं कालांतरमुक्तिफलं योगधारणासहितं ओंकारस्य प्र
योगं प्रतिपादयितुं प्रक्रमानुप्रसक्तं किंचिदक्षरं तत्त्वतो यत्र प्रपंचयिष्यते ॥ सर्वद्वाराणि विषयोपलब्धौ द्वाराणि सर्वेद्रियाणि संयम्य नियमनं कृत्वा मनः
हृदि हृदयपुंडरीके निरुध्य तन्निर्व्यापारं कृत्वा आत्मनः प्राणं प्राणवायुं हृदयात् ऊर्ध्वगामिन्या नाड्या ॥ ऊर्ध्वमारुह्य मूर्ध्नि आधाय योगधारणां धार
यितुं आस्थितः प्रवृत्तः सन् ॥१२॥ किंच ॥ यः योगी ओमित्येकाक्षरं प्रणवं ब्रह्मवाचकं व्याहरन् ॥ तदर्थभूतं मां ईश्वरं अनुचिंतयन् ॥ देहं त्यजन्
प्रयाति म्रियते ॥ स परमां मोक्षलक्षणां गतिं याति ॥१३॥ किंच ॥ अनन्यचेता इति ॥ हे पार्थ यः सततं निरंतरं अनन्यचेताः ॥ न अन्यविषये चेतो यस्य
सः अनन्यचेताः ॥ मां परमेश्वरं नित्यशः दीर्घकालं यावज्जीवं स्मरति ॥ तस्य योगिनः नित्ययुक्तस्य सदा समाहितचित्तस्य अहं सुलभः सुप्रापः ॥१४॥

अंतकाले च कथं ज्ञेयोसीति प्रश्नस्योत्तरं तत्काले ज्ञानोपायफलं दर्शयन्नाह ॥ अंतकाले चेति ॥ यः पुनः अंतकाले मरणकाले मामेव स्मरन् कलेवरं मुक्त्वा प्रयाति स मद्भावं वैष्णवं तत्त्वं याति ॥ अत्र संशयो नास्ति ॥५॥ न केवलं मामेव स्मरणं मद्भावं प्राप्नोति ॥ इति नियमः किंतर्हि अन्यमपि देवतांतरं स्मरन्नपि यम स्मरन् त्यजेत् ॥ यं यमिति ॥ हे कौंतेय अपि वा अंतमरणकाले यं यं भावं देवताविशेषं स्मरन् कलेवरं देहं त्यजति ॥ सदा तद्भावभावितः तस्मिन्भावे तद्भावः सततं भावितो येन सः सततं भावितः तद्भावभावितः तं तमेव देवताविशेषं प्राप्नोति ॥६॥ यस्मात्पूर्वभावनादंतकाले स्मरणं न चरमो भावः तदा न चित्तस्य विवशत्वात् पूर्वभावनासंभवति ॥ तस्मात्सर्वदैव विष्णुभावनैव कर्त्तव्येत्याह ॥ तस्मादिति ॥ यस्मादेवं तस्मात्सर्वेषु कालेषु यावज्जीवं यथाशास्त्रं मां अनुस्मर यथाशास्त्रं युद्ध्य च ॥ युद्धं स्वधर्म्मं कुरु मयि परमेश्वरे अर्पिते मनोबुद्धी यस्य स त्वं एवंवि

॥अंतकाले च मामेव स्मरन्मुक्त्वा कलेवरं ॥ यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥५॥ यं यं वापि स्मरन् भावं त्यजत्यंते कलेवरं ॥ तं तमेवैति कौंतेय सदा तद्भावभावितः ॥६॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युद्ध्य च ॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः ॥७॥ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ॥ परमं पुरुषं दिव्यं याति पार्थानुचिंतयन् ॥८॥ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥९॥

धः सन् मामेव यथा स्मृते ॥ आगमिष्यसि ॥ असंशयः संशयोऽत्र न विद्यते ॥७॥ परमपुरुषार्थहेतुत्वं तायाः इच्छाया अंत्यभावनाया अभ्यासात् एक कारणमित्याह ॥ अभ्यासेति ॥ हे पार्थ अभ्यासयोगयुक्तेन मद्विषयो निरंतरतानप्रवाहो अभ्यासः स एव योगस्तेन युक्तेन चेतसा अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ॥ अन्यत्र विषयांतरे गमनरहितेन अनुचिंतयन् शास्त्राचार्योपदेशमनु ध्यायन् परमं निरतिशयं दिव्यं सूर्यमंडले व्यवस्थितं पुरुषं याति प्राप्नोति ॥८॥ तमेव पुरुषं विशेषतो दर्शयति ॥ यः पुराणं चिरंतनं ॥ कविं सर्वज्ञं अनुशासितारं जगतः शासकं अणोः सूक्ष्मादपि अणीयांसं सूक्ष्मतरं ॥ सर्वस्य कर्म्मफलजातस्य ॥ धातारं विचित्रतया प्राणिभ्यो विभक्तारं ॥ अचिंत्यरूपं विद्यमानमपि रूपं केन चित्तं चिंतयितुमशक्यं यस्य स तं ॥ आदित्यस्येव नित्यचैतन्यप्रकाशो वर्णो यस्य स तं ॥ आदित्यवर्णं ॥ तमसः अज्ञानलक्षणात् मोहांधकारात् परस्तात् परं अनुस्मरेत् ततः अनुचिंतयेत् ॥९॥ सप्र

हेऽर्जुन

ॐ

कृष्णस्य केशवस्येतेनबुद्धिस्तुः ममवाप्यते इतिविनयोगात्संसमस्तंकामीति ब्रह्मकर्माधिविज्ञताद
विदुःकृत्स्नमध्यात्मंकर्मादिरससमतउच्यतेन

मरणकालेपि

॥२५॥ तेकिमर्थंयतंतइत्याह॥ जरामरणेति॥ येमांआश्रित्यममसमाहितचित्ताः संतोजरामरणमोक्षार्थंयतंतेप्रयत्नंकुर्वंति। तेयत्परंब्रह्मतत्तत्कृत्स्नं
तेसमग्रंविदुः यत्स्वअध्यात्मंप्रत्यगात्मविषयंवस्तु तदपिसमग्रंविदुः कर्मचाखिलंसमग्रंतत्साधनभूतंकृत्स्नंविदुः॥२९॥ कृत्तराध्या
यस्यबीजंप्रक्षिपति॥ साधिभूतेति॥ येमांसाधिभूतंचअधिदैवतंचअधिभूताधिदैवसहितेनवर्त्ततेतिसाधिभूताधिदैवतसाधियज्ञं
अधियज्ञेनसहवर्त्ततइतिसाधियज्ञं। जानंति। तेयुक्तचेतसःसमाहितचेतसः॥ प्रयाणकालेपिमांविदुः तेषांमतिविदनाविद्वत्त्वं
त्रिविधायाः मपिकृपयाविश्वेतनमार्गबोधपि॥३०॥ ॥इतिसप्तमोध्यायः॥७॥ तत्वीध्यायातेब्रह्मतद्विदुःकृत्स्नमित्यादिनाभगवताअर्जुनस्यप्रश्न
बीजंतास्यनपन्यस्तानिश्रुत्वातस्यार्थंअर्जुनउवाच। किंतद्ब्रह्मेतिद्वाभ्यां॥ हेपुरुषोत्तम॥ तद्ब्रह्मकिं। ततअध्यात्मंकिंकर्मकिंच

जरामरणमोक्षायमामाश्रित्ययतंतिये॥ तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्मचाखिलं॥२९॥ साधिभूताधिदैवंमांसाधियज्ञंचयेवि
दुः॥ प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः॥३०॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादे
ज्ञानविज्ञानयोगोनामसप्तमोध्यायः॥७॥ ॥अर्जुनउवाच॥ किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम॥ अधिभूतंचकिंप्रोक्तमधिदैवंकिमुच्यते॥१॥ कि
अधियज्ञःकथंकोत्रदेहेस्मिन्मधुसूदन॥ प्रयाणकालेचकथंज्ञेयोसिनियतात्मभिः॥२॥ श्रीभगवानुवाच॥ अक्षरंब्रह्मपरमंस्वभावोध्यात्ममु
च्यते॥ भूतभावोद्भवकरोविसर्गःकर्मसंज्ञितः॥३॥ अधिभूतंक्षरोभावःपुरुषश्चाधिदैवतं॥ अधियज्ञोहमेवात्रदेहेदेहभृतांवर॥४॥ रामराम

अपरंअधिभूतंकिंप्रोक्तं। अधिदैवंकिमुच्यते॥१॥ हेमधुसूदन। अत्रदेहेअस्मिन्कथंअधियज्ञःच। प्रयाणकालेनियतात्मभिःकथंज्ञेयोसि
॥२॥ एवंप्रश्नानांयथाक्रमंनिर्णयायभगवानुवाच॥ अक्षरंब्रह्मेति। हेअर्जुनपरमंअक्षरंपरमात्माब्रह्म। स्वभावःतस्यब्रह्मणःप्रतिदेहंस्वकीय
भावःअध्यात्मंउच्यते॥ आत्मानंदेहंअधिकृत्यस्वात्मतयाप्रवृत्तंचैतन्यंअध्यात्मं। भूतभावोद्भवकरःप्राणिनांदेहोत्पत्तिकरःविसर्गःदे
वतोद्देशेनपुरोडाशादेःद्रव्यस्यउत्सर्गःकर्मसंज्ञितः॥३॥ किंच॥ अधिभूतमिति॥ देहेदेहेभृतांवरक्षरोभावःविनाशीभावःअधिभूतंप्राणिजातं
अधिकृत्यभवतीतिअधिभूतं। चपुनःपुरुषःपुरिशयनात्पुरुषउच्यते। आदित्यांतर्गतोहिरण्यगर्भःसर्वव्यापकःअधिदैवतं। अत्रअस्मिन्देहे ॥२५॥
अधियज्ञःसर्वयज्ञाभिमानिनीदेवताविष्ण्वाख्यःसत्र्वोहं॥४

तेषां कामिनां फलं तु तुच्छत्वमाह॥ अंतवदिति॥ तु पुनस्तेषां अल्पमेधसां अल्पप्रज्ञानां तत्फलं अंतवत् विनाशि भवति॥ देवयजः देवान्यजंतीति देवय
जः देवान्यांति प्राप्नुवंति॥ मद्भक्ता मामपि यांति प्राप्नुवंति॥२३॥ एवं समानेप्यायासे अनंतफलाय मामेव न प्रपद्यंते अज्ञा बत कष्टं वर्त्तत इति अनु
क्रोशन्दर्शयति॥ आवान् किं निमित्तं त्वामेव न प्रपद्यंते तत्राह॥ अव्यक्तमिति॥ अबुद्धयः मां अव्यक्तं प्रपंचात्परं संसारातीतं संतं॥ स्वस्वावरजन्म
मादिव्यक्तिमापन्नं प्राप्तं मन्यंते॥ जानंते मां ईश्वरमपि संतं मम परं भावं परमात्मस्वरूपं अव्ययं व्ययरहितं अनुत्तमं निरतिशयं चाजा
नंतः न जानंतीत्यर्थः॥२४॥ न ज्ञाने किं निमित्तमित्यत्राह॥ नाहमिति॥ अहं योगमायासमावृतः गुणत्रयघटनयोगः सैव माया तया समावृतः सर्व डुल
लोकस्य स्य प्रकाशो दृश्यो न किं तु केषांचित् मद्भक्तानां एव अतएव अयं मूढो लोकः मां अजं अव्ययं नाभिजानाति॥२५॥ मदीयमायामदीयं ज्ञानं न प्रतिबध्ना

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां॥ देवान्देवयजो यांति मद्भक्ता यांति मामपि॥२३॥ अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः॥ परं भावम
जानंतो ममाव्ययमनुत्तमं॥२४॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः॥ मूढोयं नाभिजानाति लोको मामजमव्ययं॥२५॥ वेदाहं समतीता
नि वर्त्तमानानि चार्जुन॥ भविष्याणि च भूतानि मां तु वेद न कश्चन॥२६॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत॥ सर्वभूतानि संमोहं सर्गे
यांति परंतप॥२७॥ येषां त्वंतर्गतं पापं जनानां पुण्यकर्मणां॥ ते द्वंद्वमोहनिर्मुक्ता भजंते मां दृढव्रताः॥२८॥ राम राम राम राम राम राम राम

ति अन्यस्य मायाविनः स्वस्य मायाहि॥ वेदाहमिति॥ हे अर्जुन अहं भूतानि ब्रह्मादिस्थावरांतानि समतीतानि समतिक्रांतानि तथा वर्त्तमानानि भवि
ष्याणि च वेद जानामि॥ तु पुनः मद्भक्तं विना कश्चित् मां न वेद॥२६॥ कानि पुनः मत्तत्ववेदनप्रतिबंधेन प्रतिबद्धानि संति॥ जायमानानि सर्वभू
तानि मां न विदंतीत्येतदाह॥ इच्छाद्वेषेति॥ हे भारत हे परंतप सर्गे उत्पत्तिकाले सर्वभूतानि इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन इष्टे वस्तुनि
अभिलाषः इच्छा अनिष्टवस्तुनि विरागः द्वेषः तौ इच्छाद्वेषौ द्वंद्वशब्दवाच्यौ तदुत्थितेन मोहेन आत्मात्मज्ञानप्रतिबंधकेन॥ अविवेकेन संमोह
यांति मोहं प्राप्नुवंति तेन मां न जानंति॥२७॥ किं पुनः अनेकद्वंद्वमोहेन विनिर्मुक्ताः संतः त्वां विदित्वा यथाशास्त्रं मामात्मभावेन भजंते न संति॥
अपेक्षितं अर्थं दर्शयितुमाह॥ येषामिति॥ येषां पुण्यकर्मणां जनानां पापं अंतर्गतं क्षयं प्राप्तं भवतीति शेषः ते तेन द्वंद्वमोहेन निर्मुक्ताः दृ
ढनिश्चितपरमात्मतत्वविषयव्रतेता अयं येषां ते मां परमात्मानं भजंते॥२८॥ राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम राम

तेषां चतुर्णां मध्ये ज्ञानी श्रेष्ठः स्यात् ॥ तेषामिति ॥ तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित् नित्ययुक्तः सदा मत्परः मय्येकभक्तिः विशिष्यते अधि-
को भवति ॥ हि यस्मात् अहं ज्ञानिनः आत्मा तस्मात् अत एव अत्यर्थं प्रियः ॥ स च ज्ञानी मम आत्मा इति मम अत्यर्थं प्रियः ॥१७॥ ज्ञानिनः भग-
वत्प्रियत्वप्रतिपादनेन न तु इतरेषां भक्तानां तदप्रियत्वं प्रतिपादितं करोति ॥ उदारा ॥ एते सर्वे भक्ता अपि उदाराः उत्कृष्टाः मम प्रिया एव न हि कश्चि-
न्मम भक्तो ममाप्रियो भवति ॥ ज्ञानी तु अत्यर्थं मम प्रियो भवति ॥ विशेषः तत्कः स्यात् इत्याह ॥ ज्ञानी तु आत्मैव नान्यो मत्त इति ॥ मेम-
तं निश्चयः हि यस्मात् स ज्ञानी आस्थितः आरूढः ॥ अहमेव भगवान् वासुदेवो नान्योऽस्मीत्येवं युक्तात्मा समाहितचित्तः सन् मामेव परं
ब्रह्म गन्तव्यं अनुत्तमां गतिं तु अत्र उद्दिश्य ॥१८॥ ज्ञानिनं पुनरपि स्तौति ॥ बहूनामिति ॥ ज्ञानवान् शमपरिपाकज्ञानः बहूनां जन्मनां

॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥
आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥१८॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः
॥१९॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ॥ तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥२०॥ यो यो यां यां तनुं भक्तः श्रद्धयार्चि-
तुमिच्छति ॥ तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥२१॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते ॥ लभते च ततः कामान्मयैव विहि-
तान्हि तान् ॥२२॥ राम

न्ते च बहूनां जन्मनां पार्जितात्मज्ञानसंस्काराणां समाप्तौ मां वासुदेवः सर्वमिति प्रपद्यते स महात्मा दुर्लभः न तत्समोऽन्योऽधिको वा नास्ति
इत्यर्थः ॥१९॥ सोऽयमेवं सर्वं वासुदेव इत्येवं प्रतिपत्तौ कारणमाह ॥ कामैरिति ॥ स्वया आत्मीयया प्रकृत्या स्वभावेन जन्मान्तरार्जितसंस्कारविशेषेण नि-
यताः देवताराधनया यत्र सिद्धः तं तं नियमं आस्थाय आश्रित्य तैस्तैः कामैः पुत्रपश्वादिस्वर्गविषयैः हृतज्ञानाः अपहृतविवेकज्ञाना अन्-
यदेवताः प्रपद्यन्ते प्राप्नुवन्तीति ॥२०॥ तेषां च कामिनां याचयत इति ॥ यो य इति ॥ यो यः कामी यां यां देवतातनुं श्रद्धया युक्तः सन् भक्तः सन् अर्चितुमिच्छति ॥ त-
स्य तस्य कामिनः अचलां स्थिरां श्रद्धां अहं तामेव विदधामि ॥ स्थिरीकरोमि ॥२१॥ ततो यद्भवति तदाह ॥ स तयेति ॥ स कामी तया मद्विहि-
तया श्रद्धया युक्तः तस्याः देवतातनोः आराधनं प्राप्तिं ईहते चेष्टते ॥ ततः तस्याः देवतातनोः सकाशात् ईप्सितान् हि तान् कामान् मयैव ॥२४॥
विहितान् निर्मितान् लभते ॥२२॥

तस्य देवताविशेषस्य वा

गुणेस्म:

किं चाबलवतामिति॥ हे भारत च पुनः बलवतामहं अस्मि किं भूतं बलं कामरागविवर्जितं बलं ओजः सामर्थ्यं अहं भूतेषु धर्माविरुद्धः शास्त्रार्थाविरुद्धः यः
कामः अस्मि तदाह॥ ये चेति॥ च पुनः ये अन्येपि सात्त्विका भावाः सत्त्वनिष्पन्नाः शमदमादयस्तथा राजसाः रजोगुणनिष्पन्ना हर्ष
दर्पादयः तथा तामसाः तमोगुणनिष्पन्नाः शोकमोहादयः॥ तान् मत्त एव विद्धि तथापि अहं न तेषु वर्त्ते न तदधीनः ते पुनः मयि मदधीनाः
॥१२॥ एवंभूतं त्वा परमेश्वरं स्वयं जनः किमिति न जानाति तत्राह त्रिभिरिति॥ इदं सर्वं जगत् गुणमयैर्गुणविकारैः रागद्वेषादिप्रकारैः ए
वं त्रिभिर्भावैः मोहितं मां एभ्यः परं पृथक्भूतं अव्ययं जन्मादिषड्भावरहितं न अभिजानाति॥१३॥ कथं पुनः एतां त्रिगुणात्मिकां
वैष्णवीं मायां अतिक्रामन्तीति तत्प्रकारमाह दैवीति॥ हि यस्मात् मम एषा दैवी पारमेश्वरी गुणमयी गुणत्रयात्मिका माया दुरत्यया दुःखेन

॥ बलं बलवतां चाहं कामरागविवर्जितं॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ॥११॥ ये चैव सात्त्विका भावा राजसास्तामसाश्च ये॥ म
त्त एवेति तान्विद्धि न त्वहं तेषु ते मयि॥१२॥ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययं॥१३॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया॥ मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥१४॥ न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः॥ मायया
पहृतज्ञाना आसुरं भावमाश्रिताः॥१५॥ चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन॥ आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥१६॥

अतिक्रमणं यस्याः सा॥ ये सर्वधर्मान् परित्यज्य मां एव मायाविनं आत्मनो यत्प्रपद्यन्ते॥ ते एतां सर्वभूतमोहिनीं मायां अतितरन्ति संसा
रबंधनान्मुच्यन्ते इत्यर्थः॥१४॥ यदि त्वां प्रपन्नाः एतां मायां तरन्ति तर्हि कस्मात् त्वामेव सर्वे न प्रपद्यन्ते इत्यत आह न मामिति॥ नराधमाः दुःकृ
तिनः पापकारिणः मूढाः मायया अपहृतज्ञानाः॥ आसुरं भावं हिंसानृतादिलक्षणं आश्रिताः॥ मां परमेश्वरं न प्रपद्यन्ते॥१५॥ ये पुनः सुकृ
तिनो भजन्ति तेषां चातुर्विध्यमाह चतुर्विधेति॥ हे अर्जुन च पुनः चतुर्विधाः सुकृतिनो नराः उत्तमाः जनाः मां भजन्ते हे भरतर्षभ तानाह
निबोध जानीहि॥ आर्त्तः आधिदैवतादिदुःखत्रयपरिभूतः॥ जिज्ञासुः आत्मस्वरूपं ज्ञातुं इच्छुः॥ अर्थार्थी धनकामः ज्ञानी विवेकी
तत्त्ववित्॥१६॥

[illegible]

अपरा प्रकृतिमुपसंहरन् परां प्रकृतिमाह॥ अपरेयमिति॥ हे महाबाहो तु पुनः इयं प्रकृतिः अतः अन्यां विशुद्धां परां प्रकृतिं जीवभूतां क्षेत्रज्ञलक्षणां विद्धि॥

यया अंतःकरणप्रविष्टया इदं जगद्धार्यते॥ तां मम प्रकृतिं परां विद्धि॥५॥ अनयोः प्रकृत्योर्द्वयोर्ईश्वरस्य सृष्ट्यादिकारणत्वमाह॥ एतदिति॥ हे अर्जुन सर्वाणि भूतानि एतद्योनीनि एते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी येषां भूतानां तानि एतद्योनीनि इति उपधारय अवधारय॥ यस्मात् मम प्रकृती सर्वभूतानां कारणं अतः अहं कृत्स्नस्य जगतः प्रभवः उत्पत्तिः प्रलयो विनाशः भवामि॥६॥ यस्मात् एवं तस्मात् मत्त इति॥ हे धनंजय यस्मात् मत्तः परमेश्वरात् परतरं श्रेष्ठतरं अन्यत् कारणांतरं किंचित् नास्ति॥ इदं सर्वं मयि विषये प्रोतं ग्रथितं॥ सूत्रे मणिगणा इव॥ यथा येन प्रकारेण सूत्रे मणिगणाः प्रोताः तथा इदं सर्वं जगत् मयि प्रोतमित्यर्थः॥७॥ केन केन धर्मेण विशिष्टे त्वयि सर्वं प्रोतमित्याह॥ र

त॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां॥ जीवभूतां महाबाहो ययेदं धार्यते जगत्॥५॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥६॥ मत्तः परतरं नान्यत् किंचिदस्ति धनंजय॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥७॥ रसोऽहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥८॥ पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु॥९॥ बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं॥ बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं॥१०॥ रस

सोऽहमिति॥ हे कौंतेय अप्सु अपां यः सारभूतो रसः स अहं तस्मिन् मयि आपः प्रोता इत्यर्थः॥ एवं सर्वत्र॥ शशिसूर्ययोः प्रभा प्रकाशः अहमस्मि॥ सर्ववेदेषु प्रणवः वेदमूलभूतः ॐकारः अहं॥ खे आकाशे शब्दः तन्मात्ररूपः अहं॥ नृषु पुरुषेषु पौरुषं उद्यमः अहं॥८॥ किंच॥ पुण्य इति॥ च पुनः पृथिव्यां पुण्यः सुरभिर्गंधः स्वाभाविकं गंधतन्मात्रं अहं॥ च पुनः विभावसौ वैश्वानरे तेजः दीप्तिः अहमस्मि सर्वभूतेषु जीवनं प्राणधारणं आयुः अहं॥ तपस्विषु शीतोष्णादिद्वंद्वसहनरूपं तपः अहं॥९॥ किंच॥ बीजमिति॥ हे पार्थ सनातनं नित्यं मां सर्वभूतानां सर्वेषां स्थावरजंगमानां भूतानां बीजं सजातीयविजातीयकार्योत्पादनसामर्थ्यं विद्धि॥ बुद्धिमतां बुद्धिः अंतःकरणस्य विवेकशक्तिः अहं तेजस्विनां तेजः प्रागल्भ्यं अहं॥१०॥

आत्मयोगप्रबोधाय प्रोक्तो योगादिसाधनं तं वंदे परमानंदं माधवं भक्तशेवधिं ।
सिद्ध्यै यमात्मनत्वं तत्वं योगं समुदीरितं जनीय मधेत्र्जी मे भरं दत्व मीर्यते २

उक्ताध्यायविज्ञेयं प्रकृतिपन्नयमनियमपराणां मध्ये भगवद्भक्तस्य श्रेष्ठ्यमाह ॥ भगवान्योगिनामपीति ॥ य: अन्तर्गतेनांतरात्मना मयि वासुदेवे समाहि-
तेन मत्प्रेम्णा श्रद्धान्वितः करणेन श्रद्धावान् श्रद्दधान: मां भजते सम सर्वेभ्यो रुद्रादित्यापरायणेभ्यो योगिनो ज्ञानिनां मध्ये मे मम युक्ततम: अतिशयेन यु-
क्तो योगी ज्ञानी मे मम अभिप्रेत ॥४७॥ ॥ इति षष्ठोऽध्याय: ॥ ६ ॥ षष्ठाध्यायान्ते मद्गतेनांतरात्मना यो मां भजते स मे युक्ततमो मत इत्युक्तं
तत्र कीदृशस्त्वं यस्य भक्तिः कर्तव्या कथं च त्वद्गतान्तरात्मा भवतीति अर्जुनस्य प्रश्नं हृदि ज्ञात्वा तन्निरूपयितुं भगवानाह ॥ मय्येति ॥
हे पार्थ मयि आसक्तमना: मयि वक्ष्यमाणविशेषेण परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमना: मदाश्रय: अहमेव परमेश्वर आश्रयो यस्य
येनं. स: न तु अन्यथा आह्निक कर्मतपोदानैर्वा पुरुषार्थसाधनं आश्रयेत ॥ मदाश्रय: योगं युंजन् मन: समाधानं कुर्वन् एवंभूतस्त्वं असंशयं सम-

॥ योगिनामपि सर्वेषां मद्गतेनांतरात्मना ॥ श्रद्धावान्भजते यो मां स मे युक्ततमो मत: ॥४७॥ इति श्रीभगवद्गीता० योग० श्रीकृष्ण० आत्मसं-
यमयोगो नाम षष्ठोऽध्याय: ॥ ६ ॥ श्रीभग० ॥ मय्यासक्तमना: पार्थ योगं युंजन्मदाश्रय: ॥ असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥१॥ ज्ञा-
नं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषत: ॥ यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥२॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि
सिद्धानां कश्चिन्मां वेत्ति तत्त्वत: ॥३॥ भूमिरापोऽनलो वायु: खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥ रामराम रामराम

समग्रं मां समस्तविभूतिबलशक्तिऐश्वर्यादिगुणसंपन्नं यथा येन प्रकारेण ज्ञास्यसि ॥ एवमेव भगवानिति ॥ तत्तं प्रकारं मया उच्यमानं शृणु ॥१॥
तदेव ज्ञानं भगवद्विषयमेवाह श्रोतारं वक्ष्यमाणं स्तौति भगवान् ॥ ज्ञानं तेऽहमिति ॥ ते तुभ्यं अहं इदं विज्ञानसहितं ज्ञानं ज्ञानं शास्त्रजनितं विज्ञा-
नं तु अनुभवरूपं प्रत्यक्षं तेन विज्ञानेन सहितं ज्ञानं ॥ ते तुभ्यं अशेषत: साकल्येन वक्ष्यामि ॥ तज्ज्ञानं प्रशंसति अभिमुखीकरणाय स्तौति ॥ यत् न
ज्ञात्वा इह लोके भूय: पुनरपि ज्ञातव्यं पुरुषार्थसाधनं न अवशिष्यते ॥ मत्तत्त्वज्ञ: सर्वज्ञो भवतीत्यर्थ: ॥२॥ अतो विशिष्टफलत्वात् दुर्लभं भग-
वद्विषयं ज्ञानमित्याह ॥ भगवान् ॥ मनुष्याणामिति ॥ मनुष्याणां सहस्रेषु मध्ये कश्चिदेव सिद्धये मोक्षाय यतते यततामपि मोक्षार्थं यत्नं कुर्वतामपि
सिद्धानां मध्ये कश्चिदेव तत्त्वतो यथार्थेन मां परमेश्वरं वेत्ति ॥३॥ श्रोतारं प्ररोचनेनाभिमुखीकृत्याह ॥ भूमिरापइति ॥ भूम्यादिपंचतन्मात्राणि
मन: तत्कारणभूतो अहंकार: बुद्धि: महत्तत्वं अहंकार: मूलप्रकृति: अव्याकृतमिति अष्टधा प्रकृति: इत्येवंरूपा ॥४॥ रामराम राम रामराम रामराम राम

किं तस्य भवती त्याह ॥ प्राप्येति ॥ योगभ्रष्टः योगमार्गात् भ्रष्टः स ते न मे न्यासी पुण्यकृतां अश्वमेधयाजिनां लोकान् प्राप्य ॥ तत्र शाश्वतीः समाः
दीर्घकालान् उषित्वा तद्भोगक्षये सति शुचीनां पवित्राचरित्राणां श्रीमतां गेहे अभिजायते ॥ ४१ ॥ कथं पूर्वदेहे त्यक्ते अभ्यस्तयोग अभ्यासो
तिरुक्तो विरक्तो अभ्यस्तयोग अन्येषां तु पक्षांतमाह ॥ अथेति ॥ अथवा धीमतां ज्ञानिनां योगिनां कुले जन्म भवति ॥ जायते ॥ हि निश्चितं ॥ यत्
ईदृशं एतत् योगिनां कुले जन्म लोके दुर्लभतरं दुःप्राप्यतरं ॥ श्रीमतां कुले जन्मापि दुर्लभं योगिनां कुले जन्म अत्यंत दुर्लभं ॥ ४२ ॥ तत्तो दुर्लभज
न्मित्यत्राह ॥ हे कुरुनंदन तत्र योगिनां कुले तं पौर्वदैहिकं पूर्वस्मिन् देहे भवं बुद्धिसंयोगं बुद्ध्या सह योगं लभते ॥ च पुनः ततः पूर्वस्मात् संसक्ता
त् भूयः बहुतरं संसिद्धौ मोक्षनिमित्तं यतते प्रयत्नं करोति ॥ ४३ ॥ कथं पूर्वदेहबुद्धिसंयोगं इति तत्राह ॥ पूर्वाभ्यासेनेति ॥ हि यस्मात् स योग

भ्रष्टः पुण्यकृतां लोकान् प्राप्य तत्र शाश्वतीः समाः ॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते ॥ ४१ ॥ अथवा योगिनामेव कुले भवति धीमतां ॥
एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ॥ ४२ ॥ तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकं ॥ यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ ४३ ॥ पूर्वाभ्यासेन ते
नैव ह्रियते ह्यवशोपि सः ॥ जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ॥ अनेकजन्मसं
सिद्धस्ततो याति परां गतिं ॥ ४५ ॥ तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः ॥ कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥

भ्रष्टः तेनैव पूर्वाभ्यासेन पूर्वजन्मनि कृतोभ्यासः पूर्वाभ्यासः तेनैव अवशः अस्वतंत्रः ह्रियते पुनरपि योगाभ्यासे प्रवर्त्यते ॥ योगस्य जिज्ञा
सुरपि योगस्वरूपं ज्ञातुं इच्छन्नपि योगभ्रष्टः शब्दब्रह्म वेदोक्तकर्मफलं अतिनिवर्तते अतिक्रम्य गच्छति ॥ ४४ ॥ प्रयत्नयोगाभ्यासे अतिशयित फलविशे
षमाह ॥ प्रयत्नादिति ॥ तु पुनः योगी प्रयत्नात् अधिकं यतमानः संशुद्धकिल्बिषः निर्धूतपापः अनेकजन्मसंसिद्धः अनेकजन्माभ्याससंस्कारो
पचयेन सम्यक् सिद्धः सम्यग्दर्शनः तदनंतरं परां मोक्षाख्यां गतिं गच्छति ॥ ४५ ॥ यस्मादेवं तस्मात् ॥ तपस्विभ्य इति ॥ हे अर्जुन यस्मात् तपस्वि भ्या
भ्यः तपः कृच्छ्रचांद्रायणादिकं कुर्वद्भ्यः योगी अधिकः ज्ञानिभ्योपि ज्ञानं शास्त्रजनितं तद्वद्भ्यः ज्ञानिभ्योपि अधिकः कर्मिभ्यः अग्निहोत्रादिकं कर्म ॥२२॥
कुर्वद्भ्योपि योगी आत्मवित् अधिकः तस्मात् कारणात् योगी आत्मवित् भव ॥ ४६ ॥ राम राम राम राम राम राम राम राम राम राम राम राम राम

कर्मिभ्य

एतावान्तस्कृद्विरोधदृत्वात् असंयतात्मनेत
असंयतात्मना अभ्यास

तदुक्तं मनः चंचलत्वादिकं अंगीकृत्य मनोनिग्रहोपायं दर्शयति ॥ श्रीभगवानुवाच ॥ असंशयमिति ॥ हे महाबाहो मनः असंशयं निश्चितं दुर्निग्रहं चलं
च तथापि तु असंशयो न तु पुनः हे कौंतेय ॥ अभ्यासेन आत्मविषयासंयतता मनोवृत्तिः आत्मव्यतिरिक्तविषयमनोवृत्तिरहितता अभ्यासस्तेन अ
भ्यासेन दृष्टश्रुतेषु ऐहिकामुष्मिकेषु भोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यं वैराग्यं तेन वैराग्येन गृह्यते निरुध्यत इत्यर्थः ॥ अभ्यासवैराग्याभ्यां असं
यतचित्तेन दुःप्राप्य इति मे मतिः ॥ तु पुनः वश्यात्मना अभ्यासवैराग्याभ्यां वशीकृतमनसा यतता यत्नं कुर्वता उपायतः यथोक्तेन उपायेन प्राप्तुं
शक्य ॥३६॥ अभ्यासवैराग्यरहितोपि ये केचित् श्रद्धया सम्यक् दर्शनं प्रणकाले योगाच्चलितमानसः सर्वकर्मसंन्यासी किं फलं प्राप्नोति इति पृच्छ
ति ॥ अर्जुन अर्जुन उवाच ॥ अयतिरिति ॥ हे कृष्ण अयतिः योगमार्गे अप्रयत्नवान् श्रद्धया आस्तिक्यबुद्ध्यायुक्तः योगात् अंतकाले चलितमनाः

॥ श्रीभगवानुवाच ॥ असंशयं महाबाहो मनो दुर्निग्रहं चलं ॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥३५॥ असंयतात्मना योगो दुःप्राप्य
इति मे मतिः ॥ वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ॥३६॥ अर्जुन उवाच ॥ अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य योगसं
सिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥ कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥३८॥ एतन्
मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥३९॥ श्रीभगवानुवाच ॥ पार्थ नैवेह नामुत्र विना
शस्तस्य विद्यते नहि कल्याणकृत्कश्चित् दुर्गतिं तात गच्छति ॥४०॥

योगसंसिद्धिं योगफलं सम्यक्ज्ञानं अप्राप्य कां गतिं गच्छति ॥३७॥ अभ्यासिप्रायं विवृणोति ॥ कच्चिदिति ॥ कोमलप्रश्ने हे कृष्ण ब्रह्मणः पथि ब्र म्मा
ह्मप्राप्तिमार्गे विमूढः अप्रतिष्ठः निराश्रयः उभयविभ्रष्टः ज्ञानमार्गाच्च कर्ममार्गाच्च उभयविभ्रष्टः छिन्नाभ्रमिव न नश्यति वा न श्य
ति ॥३८॥ हे कृष्ण मम एतत् एवं अमुना प्रकारेण संशयं योगभ्रष्टस्य नाशानाशात्मकं संदेहं अशेषतः सर्वप्रकारेण छेत्तुं अर्हसि ॥ अस्य संशयस्य छि
यस्मात् त्वदन्यः छेत्ता न उपपद्यते ॥३९॥ अथोत्तरमाह ॥ श्रीभगवानुवाच ॥ पार्थेति चतुर्भिः ॥ हे पार्थ तस्य योगभ्रष्टस्य इहलोके परलोके वा
न विनाशः सर्वस्मात् हीनजन्मप्राप्तिः ॥ न विद्यते हि यस्मात् हे तात कश्चित् कल्याणकृत् शुभकृत् दुर्गतिं कुत्सितां गतिं न गच्छति ॥४०॥

गो

अहं योत्स्यमानान् अग्रे युद्धं करिष्यतः अवेक्षे निरीक्षयामि य एते अत्र समतवचसमागमे दुर्बुद्धेः अविचारकारिणो धार्त्तराष्ट्रस्य दुर्यो- ए
धनस्य युद्धे युधस्य लोके प्रियचिकीर्षवः प्रियं विजयं कर्त्तुकामाः समागताः प्रागल्भ्यातिरेकेण सम्यक् वीरोचितसमारंभेन आगताः ते प्य-
एकत्रितियुग्म विचारकारिण इत्यर्थः २३ ततः किं वृत्तमित्यपेक्षायामाह हे भारत गुडाकेशेन गुडाका निद्रा तस्या ईशेन जितनिद्रेण अर्जुनेन एवं
यथावर्णितं उक्तो हृषीकेशः उभयोः सेनयोर्मध्ये रथोत्तमं स्थापयित्वा २४ भीष्मद्रोणेति भीष्मद्रोणयोः प्रमुखे अग्रे द्रोणः शंकत्वा

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः धार्त्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः २३ संजय उवाच एवमुक्तो हृषीकेशो गुडाकेशे-
न भारत सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं २४ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां उवाच पार्थ पश्यैतान्समवेतान्कु-
रूनिति २५ तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा २६

युद्धे पलायनादिनिमित्ततया शंकितव्यां गतोऽयाकुलस्याउन्नोरहित इति द्रोणः तथा सर्वेषां च महीक्षितां मंडलाधिपतीनां राज्ञां यो-
धवराणां अग्रे इति उवाच इतीति किं हे पार्थ एतान् समवेतान् तवद्वेष्ट्रीन् कुरून् पश्य एतेन त्वं युद्धे निर्देश्य भीष्मद्रोणकृपादीन् २५ अ-
थानंतरं पार्थो अर्जुनः तत्र उभयोः सेनयोः स्थितान् पितॄन् अपिबंति चुंबंति लालयंति तर्पयंति च अपत्यानीति पितरः तान् पितॄन् अ- रूरू
त्र च पितृकल्पाः पितृव्यादयः पितामहान् गांगेयादीन् आचार्यान् द्रोणादीन् मातुलान् मात्रा जनन्या साम्यं येषां ते मातुलाः भ्रातॄन् स- ४
सोदरान् पुत्रान् पुन्नाम्नो नरकात् पितॄन् त्रायंत इति पुत्राः पुत्रस्य पुत्रान् तान् पौत्रान् सखीन् मित्राणि अपश्यत् २६

तस्य शंखनादस्य धार्तराष्ट्रानिघात द्रुपदश्चः
से जयपत्रवंजनयात्वमाह

द्रुपदो द्रुपद इति॥ हे पृथिवीपते द्रुपदः च पर द्रौपदीपुत्राः च अपरं महाबाहुः सौभद्रश्च महाबाहुः एते सर्वशः पृथक् पृथक् प्रत्येकं शं
खान् दध्मुः १८ स तुमुलो घोरः पांडवसेनापतीनां शंखादिः जन्यो घोष धार्तराष्ट्राणां हृदयानि व्यदारयन् किं कुर्वन् नभः आकाशं पृ
थिवीं च व्यनुनादयन प्रतिशब्दं कारयन् १९ तस्मिन् समये श्रीकृष्णं प्रति अर्जुने तयदुक्तं तत् चतुर्भिः श्लोकैः संजय आह अथेति।
अथ शंखपूर्णे नंतरं कपिध्वजः पांडवः व्यवस्थितान् विशेषेण उत्साहेन अवस्थितान् शंखनादात् घोरतरात् अपि अपरित्रा। स्तान् धार्त

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते सौभद्रश्च महाबाहुः शंखान् दध्मः १८ स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयन्॥ पृथक् पृथक्
ता नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् १९ अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः प्रवृत्ते शस्त्रसंपाते धनुरुद्य
म्य पांडवः २० हृषीकेशं तदा वाक्यमिदमाह महीपते सेनयोरुभयोर्मध्ये रथं स्थापय मेच्युत २१ यावदेतान्निरीक्षेहं योद्धुकामान
वस्थितान कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे २२

राष्ट्रान् दृष्ट्वा शस्त्रसंपाते उत्साहफले च धार्तराष्ट्राणां प्रवृत्ते सति धनुरुद्यम्य सज्जीकृत्य २० हे महीपते तदा हृषीकेशं इदं
वाक्यं आह किमिति हे अच्युत मे मम रथं उभयोः सेनयोर्मध्ये स्थापय २१ यावदेतान्निति अहं यावत् एतान् प्रधानवीरान् योद्धु
कामान् अवस्थितान् निरीक्षणं पूर्वकं परीक्षां करोमि अस्मिन् रणे समुद्यमे मया कैः सह योद्धव्यं युद्धं कर्तव्यमित्यर्थः २२ योत्स्यमानानिति यो
त्स्यमानान् वेक्षेहं य एते अत्र समागताः धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः

गी॰ स॰

३

अत्यद्भुतं ततः आस्फालिताः सन्तः शब्दस्तुमुलः एकवर्णैर्विवेचनायोग्योऽभवत् १३ ततः पांडवसैन्ये प्रवृत्तं युद्धोत्सवमाह ततः श्वेतैरिति पंचभिः
श्लोकैः ततो दुर्योधनसैन्ये वाद्यकोलाहलानंतरं श्वेतैः शुक्लैः केसरिभिर्वायुकल्पैः परसैन्योत्कर्षतन्त्रकरणसामर्थ्यवद्भिः वाहयैः अतिवेगाति
रेकात्सत्त्वावतो वाहयैः आकाशे यांतीति हयाः विशिष्टाः अश्वास्तैर्युक्ते संयोजिते महति आदित्यमंडलकल्पे एतस्मे स्यंदने संग्रामेस्मिन्प्रइवणेश्च
श्लेषध्वनेः ...मावर्लभा नो माधव मायायाः लक्ष्म्याः धवः पतिर्माधवः कृष्णः पांडवश्चैव अर्जुनश्चापि दिव्यौ दिवि भवौ अप्राकृतौ शंखौ प्रद
ला ध्मतुः प्रकर्षेण ...रकीयवाद्यकोलाहलाभिभवसंपादनेन दध्मतुः आपूरितवंतौ १४ तदेव विभागेन प्रदर्शयन्नाह ॥ पांचजन्यमिति हृषीके
शाः इंद्रियाणि तेषां ईशो अधिष्ठाता लीलागृहीतदेहो भगवान्विष्णुः पांचजन्यं पंचजनासुरदैत्यदेहोद्भवं धनंजयः देवदत्तं वृक्
कोदरः भीमकर्मा महाशंखं पौंड्रं दध्मौ आपूरितवान् १५ अनंतविजयं इति अनंतविजयमित्यादियुग्मे पूर्वश्लोकक्रियया संबंधः

काश्यश्च परमेष्वासः शिखंडी च महारथः धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः १७

तेकुंतीपुत्रो युधिष्ठिरो राजा पांडवानां स्वामी अनंतविजयं महाशंखं दध्मौ यस्य आपूरणात् अनंतः संततो विजयो भवतीति अनंतविजा।
यः नकुलसहदेवश्च सुघोषमणिपुष्पकौ शंखौ दध्मतुः १६ काश्यश्चेति॥ च अपरं काशिराज परमेष्वासः परम उत्कृष्ट इष्वासो धा।
नुर्यस्य स च पुनः शिखंडी महारथः शिखंडवान् सकलकराक्रराजय भीष्मवधार्थमुत्पन्नः पौरुषेयशिखायुक्तः च अपरं धृष्ट
द्युम्नः विराटः सात्यकिः सर्व एव अपराजितः अजेयाः एते सर्वे पृथक् पृथक् शंखान् दध्मौ वादयांचक्रुः इति परेण संबंधः १७॥ कृष्ण

वय अवनारस्यधानेत हिनिघात टापदघा:

सं तदाभिवनीतितिविकर्णः पार्वतीपतिदत्तवरः सोमदत्तः तत्पुत्रो ।
कीर्तिमंजरीवर्णितामांप्रत्यर्थिनः पार्थिवा विगतकर्णा बधिरा इव अद्विजं तेभवंतीतितिविकर्णः पार्वतीपतिदत्तवरः सोमदत्तः तत्पुत्रो ।
भूरिश्रवा सोमदत्तिः तथैव च ययंयथैव जयान् नीषश्च त्रैलोक्यपराक्रमोतथैव इतरेपीत्यर्थः ९ अन्ये अपरं अमेसहायलेनसमा
नृरिश्रवा सोमदत्तिः तथैव च ययं यथैव जयान् भीष्मश्च त्रैलोक्यपराक्रमो तथैव इतरेपीत्यर्थः ९ सैन्यद्वयपरि
ततः जगदत्तशल्यप्रभृतयः वहवः शूरा मदर्थे मम विजयसाधनार्थं त्यक्तजीविताः सर्वेयुद्धविशारदाः युधकृशलाः ९ सैन्यद्वयपरि
कल्पनस्यप्रयोजनमाह ॥ पांडवानां इतितत्पांडवानां वलं सैन्यं भीष्मेण सेनापतिना अभिरक्षितं अस्माकं वलं प्रतित्रपर्याप्तं अपरि
पूर्णं यदि अस्माकं वलं सयर्योप्तं भीष्मस्योजयपक्षपातित्वात् एतेषां च पर्याप्तं भीमस्यैकपक्षपातित्वादितियोजना तदा भीष्मे
वाभिरक्षितत्वात्संगतं स्यात् तथा च नाथांतरे भीमस्य एकपक्षपातित्वात्पांडवानां वलं समर्थं जातिभीष्मस्य उभयपक्षपातित्वात्तच्च
स्माकं वलं च असमर्थं जातिइतिदुर्योधनस्याभिप्रायः १० अयनेषु इति हि यस्मात्सर्वं   यवनवंतो यूयंवीर्येण प्रजयंतोवावीराः सर्वेषु समस्त

अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः नकुलः सहदेवश्च सुघोषमणिपुष्पकौ १९

प्रकारेषु अयनेषु च युद्धदुर्गमार्गेषु गोमूत्रिकादी व्यूहस्य लेखेषु सर्वेषु यथा भागव्यूहविभागं अनतिक्रम्य अवस्थिता वर्तमाना संतः भीष्ममेव सेनायं
नोकमभिन्नादृर्वतोरक्षंतु सव्यूहाद्युत्थाय यापि पालयंतु ११ द्रोणं प्रति राजा भीष्मस्य वक्तुमानपुरःसरं यदुक्तं तच्छ्रुत्वा भीष्मः किमकरोत् तदाह ॥ कुरुवृद्धः
पितामहो ... तस्य एवं द्रोणं प्रति निरूपणं कर्वतो दुर्योधनस्य यद्धर्षः हर्षं प्रीतिं संजनयन् उच्चैः सिंहनादं विनद्य सर्व राजसंत्रासनं सिंहस्य ना
दमिव नादं अहाहृत्य संकृत्वा शंखं दध्मौ आप्रित्तवान् प्रतापयुक्तः तदेवं सेनापतेर्भीष्मस्य युद्धोत्सवमालक्ष्य सर्वतोयुद्धोत्सव प्रवृत्त इ
त्याह ॥ ततः भीष्मस्य शंखवाद्यपूर्णानंतरं शंखाश्च अपरमेयाः पणवानकगोमुखाश्च वाद्यविशेषाः सहसैव युगपदेव एकस्मिन्नेव काले

संख्यायामसामर्थ्येन च इदं तु अस्माकं के वलं पुनः एतेषां पांडवा
नां निमाभिरक्षितं वलं प्रतिपर्याप्तं ३ जीर्वं३

पा २

२ चेकितानः धृष्टः प्रगल्भः शत्रुविनाशनः केतुश्चिन्हं ध्वजादिर्यस्य धृष्टानां रणे प्रगल्भानां केतुर्विनाशक इति वा धृष्टकेतुः चेकिता
नः संग्रामे कुशलः काशिराजः काशीनगरस्य तत्र काशी यस्यां निवसतां सुखं जनः सा काशी तस्या राजा सः पुरुजित् वैरिपुरं जयति विजयी शैः
ब्यः संग्रामे विजयार्हः ५ युधामन्युश्च इति च अपरं विक्रांतः वीर्यवान् उत्तमौजाः सोऽन्यः च अपरे द्रौपदेयाः द्रौपद्याः सुतनयाः एते सर्वे महार
थाः एव महायुद्धोत्सवाय आसमंतात् रथः शास्त्रास्त्रादिसंपन्नो येषां ते महारथाः ६ हे द्विजोत्तम तत्पुनः ये अस्माकं धार्त्तराष्ट्राणां ये विशि

अन्ये च बहवः शूराः मदर्थे त्यक्तजीविताः नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ९ अपर्याप्तं तदस्माकं बलं भीष्माभि
रक्षितं पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं १० अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममेवाभिरक्षंतु भवंतः सर्व
एव हि ११ तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२ ततः शंखाश्च भेर्यश्च पणवा
नकगोमुखाः सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत् १३ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ माधवः पांडवश्चैव दिव्यौ शं
खौ प्रदध्मतुः १४ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः पौंड्रं दध्मौ महाशंखं भीमकर्मा वृकोदरः १५

ष्टाः पांडवसेनावीरेभ्योऽपि श्रेष्ठाः तान् निबोध अवधारय मम सैन्यस्य नायकाः नेतारः तान् तेभ्यः स्वसंज्ञार्थं ब्रवीमि कथयामि ७ भवान् त्वमे
व तावत् यस्मात् बयुद्धकौशल्योपदेशेन भगवान् पशुपतिरपि रूपेण निर्जितः सत् भीष्मः सकलरूपरूपयकारि अक्षौहिणीयुद्धलीलावतारः
परशुरामस्यापि रणे भयंकरत्वात् भीष्मः कर्णः वैरीणां कृन्तनात् कर्णः कृपः शत्रुहिंसनशीलः कृन्तुः हिंसार्थः अश्वत्थामा नीतिवैरिणं
नकुयतिवा अश्वत्थाति स्थापितं गच्छतीति येन तस्य श्यामावलेन ततः अश्वत्थामा च प्रत्ययोः तो वा अश्वत्थामा इति तत्तादृशस्याभवलं यस्य सोः
श्वत्थामा सकल सकल लोकोपसंहारदक्षस्य दारुणाय णीपतेः लीलावतारो यस्य विकर्णः यस्य अश्व समानाः वीरसंग्रामोपार्जित।

वक्ति श्लोकैः कैः संजय उवाच धृतराष्ट्रं दृष्ट्वेत्यादि २ ॥ ३ हे आचार्य एतां पांडुपुत्राणां महतीं सप्ताक्षौहिणीपरिमितां चमूं सेनां पश्य पश्य अवलो
कय कथं भूतां तव शिष्येण द्रुपदपुत्रेण धृष्टद्युम्नेन धीमता तात व शिष्येण सेना व्यूहविन्यासादि बुद्धिमता व्यूढां व्यूहविन्यासेन स्थापितां
तव शिष्येणेति तवापि पांडवसेनायां कश्चिदनुरागोस्तीति कौटिल्यवचनं दुर्योधनस्येति पांडुः पांडुरो धर्मः तत्पुत्रा राजा पुत्रा इति सा
क्षिप्राय वचनं दुर्योधनस्य ॥ ३ अत्र अत्र सां च मात्रमी शूराः शौर्येण दात्र धर्मेण उपेताः महेष्वासाः इषवः अस्यंते यैस्तानि धनूं

म॰ पश्यैतां पांडुपुत्राणां मा चार्य महतीं चमं व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ३ अत्र शूरा महेष्वासा भीमार्जुनसमा युधि युयु
धानो विराटश्च द्रुपदश्च महारथाः ४ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् पुरुजित्कुंतिभोजश्च शैब्यश्च न
रपुंगवः ५ युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ६ अस्माकं तु विशिष्टा ये
तान्निबोध द्विजोत्तम नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ७ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः अश्व
त्थामा विकर्णश्च सौमदत्तिस्तथैव च ८

ति विशिनष्टि येषां ते महेष्वासाः युधि संग्रामे भीमार्जुनसमाः भीमप्रियाः येन जीयंते इति च कि नरैः त्रिलोक्यां इति भीमः अ
र्जुनः पशुपतिसंग्रामे यो पार्जितयशो वितनुते तिः अर्जुनं पांडुं संपादितं विश्वं येन सोयम् अर्जुनः ताभ्यां समाः तुल्याः युयुधानः
वीरः वीरैरेव मिश्रीभावेन युध्यति इष्टः युधि मिश्रणे इति धातुपाठात् विराटः विगतः विपत् ... राजा यस्य उत्तरस्य स विराटः द्रुप
दः द्रुमवत् ... संग्रामे निश्चलो पादो यस्य स द्रुपदः महारथः प्रत्येकं महारथा विशेषणं युयुधानो महारथ इत्यादि ४ धृष्टकेतु इति ॥ धृष्टकेतुः

॥ॐ॥ नमो भगवते वासुदेवाय॥ इह खलु सकललोकहितावतारपरमकारुणिको भगवान् देवकीनंदनः तत्वज्ञानविजृंभितशोकमोहविध्वं-
शितविवेकतया निजधर्मत्यागपरधर्माभिसंधिपरं अर्जुनं धर्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्धार तमेव भगव-
दुपदिष्टमर्थं कृष्णद्वैपायनः सप्तभिः श्लोकशतैरुपनिबबंध तत्र तावद्धर्मक्षेत्रे इत्यादिना विषीदन्निदमब्रवीत् इत्यंतेन ग्रंथेन श्रीकृ-
ष्णार्जुनसंवादप्रस्तावायकथा निरूप्यते ततः परं आसमाप्तेस्तयोर्धर्मज्ञानार्थसंवादः॥ धृतराष्ट्र उवाच॥ धर्मक्षेत्रे इति धर्मक्षे-

धृतराष्ट्र उवाच॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः मामकाः पांडवाश्चैव किमकुर्वत संजय १ संजय उवाच दृष्ट्वा तु पांडवानीकं
व्यूढं दुर्योधनस्तदा आचार्यमुपसंगम्य राजा वचनमब्रवीत् २

णां उपसंगम्य आ॥ अधिक्येन आचार्यं विकृतेन संगम्यो कृत्वा वचनं अनंतरं उच्यमानं अब्रवीत् उक्तवान् किं कृत्वा पांडवानीकं पांडवानां युधिष्ठिरादीनां अनीकं

णां उपसंगम्य आधिक्येन आचार्यं लततकृतेन संगम्यो कृत्वा वचनं अनंतरं उच्यमानं अब्रवीत् उक्तवान् किं कृत्वा पांडवानीं युधिष्ठिरादीनामनीकं
तत्र धर्मक्षेत्रे इत्यनेन श्लोकेन धृतराष्ट्रेण हस्तिनापुरस्थितेन ससारथिं समीपस्थं संजयं प्रति कुरुक्षेत्रे वृत्तांते पृष्टे स संजयः हस्तिनापुरस्थोपि
व्यासप्रसादाल्लब्धदिव्यचक्षुः कुरुक्षेत्रे वृत्तांतं साक्षात्पश्यन्निव धृतराष्ट्राय निवेदयामास दृष्ट्वा तु पांडवानीकमित्यादिना हे संजय मामकाः
दुर्योधनादयश्चापरं पांडवाः युधिष्ठिरादयश्च युयुत्सवः योद्धुकामा धर्मक्षेत्रे [illegible] प्रसवन्नमो कुरुक्षेत्रे समवेता मिलिताः संतः किमकुर्वत॥
किं विदधुः १ तत्पुनः तदा तेषु मिलितेषु सत्सु राजा दुर्योधनः अनेकवीरसमुदाये [illegible] पितुः सुखेन योधयितुं आचार्यं धनुर्वेदोपदेष्टारं द्रो-

સત્યનારાયણકથા

૧૦૯ B [illegible]

[illegible]